श्रीमद्भगवद्गीता

[१०८ प्रेरकश्लोकाः]

श्रीगणेशाय नमः

॥ वन्दे महापुरुष ते चरणारविन्दम् ॥

==============================

❖ *कौरवपाण्डवानां युद्धवृत्तं जिज्ञासोः धृतराष्ट्रस्य सञ्जयं प्रति प्रश्नः* ❖

(०१) धृतराष्ट्र उवाच।

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।

मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥ अर्जुनविषादयोगः- ०१-०१॥

पदच्छेदः धर्म-क्षेत्रे कुरु-क्षेत्रे समवेताः युयुत्सवः।

मामकाः पाण्डवाः च एव किम् अकुर्वत सञ्जय॥

अन्वयः - सञ्जय धर्मक्षेत्रे कुरुक्षेत्रे समवेताः युयुत्सवः मामकाः च एव पाण्डवाः किम् अकुर्वत।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
सञ्जय	सञ्जय [पुं-सं-एक]	मामकाः	मामक [पुं-प्र-बहु]
धर्मक्षेत्रे	धर्मक्षेत्र [नपुं-स-एक]	चैव	चैव [अव्य]
कुरुक्षेत्रे	कुरुक्षेत्र [नपुं-स-एक]	पाण्डवाः	पाण्डव [पुं-प्र-बहु]
समवेताः	समवेत [पुं-प्र-बहु]	किम्	किम् [नपुं-द्वि-एक]
युयुत्सवः	युयुत्सु [पुं-प्र-बहु]	अकुर्वत	कृ [कर्तरि-लङ्-प्र-बहु-आत्मने]

पदार्थः

मूलम्	हिन्दी	English
सञ्जय	हे संजय	O Saṃjaya
धर्मक्षेत्रे	धर्मभूमि	in the place of pilgrimage
कुरुक्षेत्रे	कुरुक्षेत्र में	in Kurukṣetra
समवेताः	एकत्रित	assembled
युयुत्सवः	युद्ध की इच्छा वाले	desiring to fight
मामकाः	मेरे	my
चैव	और	and
पाण्डवाः	पाण्डु के पुत्रों ने	the sons of Pāṇḍu
किम्	क्या	what
अकुर्वत	किया	did they do

भावार्थः

हिन्दी : हे संजय ! धर्मभूमि कुरुक्षेत्र में एकत्रित युद्ध की इच्छा रखने वाले मेरे और पाण्डु के पुत्रों ने क्या किया ?

English : Saṃjaya, assembled in place of pilgrimage, Kurukṣetra, desiring to fight, what did my sons and the sons of Pāṇḍu do ?

सन्धिः -			
	समवेताः+युयुत्सवः	समवेता युयुत्सवः	रुत्व >यत्व>लोप-सन्धिः[1]
	पाण्डवाः+च	पाण्डवाश्च	सत्व>श्चुत्व-सन्धिः[2]
	च+एव	चैव	वृद्धि-सन्धिः[3]

समासः -			
	धर्मक्षेत्रे	धर्मस्य क्षेत्रम् धर्मक्षेत्रम् तस्मिन्	षष्ठी तत्पुरुषः
	कुरुक्षेत्रे	कुरूणाम् क्षेत्रम् कुरुक्षेत्रम् तस्मिन्	षष्ठी तत्पुरुषः

1 ससजुषो रुः (८।२।६६)>भोभगोअघो अपूर्वस्य योऽशि (८।३।१७)>हलि सर्वेषाम् (८।३।२२)
2 विसर्जनीयस्य सः (८।३।३४)>स्तोः श्चुना श्चुः (८।४।४०)
3 वृद्धिरेचि (६।१।८८)

पदार्थकोशः

धर्मक्षेत्रे धर्मप्रसवभूमौ [पै०]। धर्मभूमौ [सुबो०]। धर्मस्य क्षेत्रम् [गीता०]।
कुरुक्षेत्रे कुरोः राज्ञः क्षेत्रं कुरुक्षेत्रं तस्मिन् [टि०]।
समवेताः मिलिताः [पै०,सुबो०,चतु०]।
युयुत्सवः योद्धुकामाः [पै०]। योद्धुमिच्छन्तः [सुबो०]। योद्धुमिच्छवः [चतु०]।
मामकाः दुर्योधनादयश्चान्ये [पै०]। मत्पुत्राः दुर्योधनादयः [सुबो०]। मम इति कायन्तीति; अविद्यापुरुषोचिता अविद्यामयाः सङ्कल्पाः [गीता०]।
चैव निपातसमुदायः समुच्चयार्थकः [टि०]।
पाण्डवाः युधिष्ठिरादयः [पै०]। पाण्डुपुत्राः [सुबो०]। शुद्धविद्यापुरुषोचिता विद्यात्मानः, पाण्डुः शुद्धः [गीता०]।
अकुर्वत विदधुः [पै०]। कृतवन्तः/विदधुः [सुबो०]।

==

❖ *विषीदन्तं पार्थं युद्धे प्रविवर्तयिषोर्भगवतस्तद्विषादनिबर्हणोक्तिः* ❖

(०२) **क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।**
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥ साङ्ख्ययोगः - ०२-०३॥

पदच्छेदः क्लैब्यम् मा स्म गमः पार्थ न एतत् त्वयि उपपद्यते।
क्षुद्रम् हृदय-दौर्बल्यम् त्यक्त्वा उत्तिष्ठ परन्तप॥

अन्वयः - पार्थ क्लैब्यं मा स्म गमः एतत् त्वयि न उपपद्यते परन्तप क्षुद्रं हृदयदौर्बल्यं त्यक्त्वा उत्तिष्ठ।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
पार्थ	पार्थ [पुं-सं-एक]	**न**	न [अव्य]
क्लैब्यम्	क्लैब्य [नपुं-द्वि-एक]	**उपपद्यते**	उप-पद् [कर्तरि-लट्-प्र-एक-आत्मने]
मा	मा [अव्य]	**परन्तप**	परन्तप [पुं-सं-एक]
स्म	स्म [अव्य]	**क्षुद्रम्**	क्षुद्र [नपुं-द्वि-एक]
गमः(अगमः)	गम [पुं-प्र-एक]	**हृदयदौर्बल्यम्**	हृदयदौर्बल्य [नपुं-द्वि-एक]
एतत्	एतद् [नपुं-प्र-एक]	**त्यक्त्वा**	त्यज् [कृत् प्रत्ययः:क्त्वा- त्यजँ-भ्वादिः]
त्वयि	युष्मद् [स-एक]	**उत्तिष्ठ**	उद्-स्था [कर्तरि-लोट्-म- एक-परस्मै]

पदार्थः

मूलम्	हिन्दी	English
पार्थ	हे पृथापुत्र अर्जुन!	O Pārtha
क्लैब्यम्	नपुंसकता को	impotence
मा	मत	do not
गमः	प्राप्त	take
स्म	हो	be
एतत्	यह	this
त्वयि	तुम्हारे लिए	unto you
न	नहीं	never
उपपद्यते	उचित लगता है।	is befitting
परन्तप	हे परन्तप !	O conqueror of the enemies
क्षुद्रम्	तुच्छ	poor
हृदयदौर्बल्यम्	हृदय की दुर्बलता को	weakness of heart
त्यक्त्वा	त्यागकर	giving up
उत्तिष्ठ	खड़े हो जाओ।	get up

भावार्थः

हिन्दी : इसलिये हे पृथापुत्र अर्जुन तुम पर कायरता शोभा नहीं देती, हे परन्तप ! हृदय की तुच्छ दुर्बलता को तुम छोड़कर युद्ध के लिये खड़े हो जाओ।

English - O Pārtha, do not yield to this degrading impotence. It does not befit you. Give up such petty weakness of heart and arise, O chastiser of the enemies.

सन्धिः -			
	न+एतत्	नैतत्	वृद्धि-सन्धिः[1]
	एतत्+त्वयि	एतत्त्वयि	चर्त्व-सन्धिः[2]

1 वृद्धिरेचि (६।१।८८)
2 खरि च (८।४।५५)

त्वयि+उपपद्यते	त्वय्युपपद्यते	यण्-सन्धिः[1]
त्यक्त्वा+उत्तिष्ठ	त्यक्त्वोत्तिष्ठ	गुण-सन्धिः[2]

समासः हृदयदौर्बल्यम् हृदयस्य दौर्बल्यम् षष्ठी-तत्पुरुषः

पदार्थकोशः

क्लैब्यम्	कातर्यम् [पै०/सुबो०]। निर्वीर्यत्वम् [चतु०]।
गमः	प्राप्नुहि [पै०/सुबो०]।
त्वयि	महादेवप्रतिभटे [चतु०]।
उपपद्यते	युक्तं न भवति [पै०]। योग्यं न भवति [सुबो०]। न युक्तम् [चतु०]।
परन्तप	शत्रुतापन [सुबो०/चतु०]।
क्षुद्रम्	तुच्छम् [पै०/सुबो०/चतु०]।
हृदयदौर्बल्यम्	कातर्यम् [पै०/सुबो०]। हृदयकृतम् एव तव दौर्बल्यम् [चतु०]।
उत्तिष्ठ	युद्धाय [चतु०]।

===

❖ ***जयापजयसन्दिहानस्य अर्जुनस्य श्रीकृष्णं प्रति शरणोपसर्पणम्*** ❖

(०३) **कार्पण्यदोषोपहतस्वभावः**
पृच्छामि त्वान्धर्मसम्मूढचेताः ।
यच्छ्रेयः स्यान्निश्चितम्ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मान्त्वाम्प्रपन्नम् ॥ साङ्ख्ययोगः - **०२-०७॥**

पदच्छेदः कार्पण्य-दोषः-उपहत-स्वभावः।
पृच्छामि त्वाम् धर्म-सम्मूढ-चेताः।
यत् श्रेयः स्यात् निश्चितम् ब्रूहि तत् मे।
शिष्यः ते अहम् शाधि माम् त्वाम् प्रपन्नम्।।

अन्वयः - कार्पण्यदोषोपहतस्वभावः धर्मसम्मूढचेताः (अहम्) त्वाम् पृच्छामि यत् निश्चितं श्रेयः स्यात् तत् मे ब्रूहि अहं ते शिष्यः (अस्मि) त्वाम् प्रपन्नम् मां शाधि।

---

1 इको यणचि (६।१।७७)
2 आद् गुणः (६।१।८७)

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
कार्पण्यदोषो-पहतस्वभावः	कार्पण्यदोषोपहतस्वभाव [पुं-प्र-एक]	तत्	तद् [नपुं-द्वि-एक]
		मे	अस्मद् [ष-एक]
धर्मसम्मूढचेताः	धर्मसम्मूढचेता [पुं-प्र-बहु]	ब्रूहि	ब्रू [कर्तरि-लोट्-म-एक-आत्मने]
त्वाम्	युष्मद् [द्वि-एक]	अहम्	अस्मद् [प्र-एक]
पृच्छामि	प्रछ् [कर्तरि-लट्-उ-एक-परस्मै]	ते	युष्मद् [ष-एक]
यत्	यद् [नपुं-द्वि-एक]	शिष्यः	शिष्य [पुं-प्र-एक]
निश्चितम्	निश्चित [नपुं-प्र-एक]	त्वाम्	युष्मद् [द्वि-एक]
श्रेयः	श्रेयस् [नपुं-प्र-एक]	प्रपन्नम्	प्रपन्न [पुं-द्वि-एक]
स्यात्	अस् [कर्तरि-विधिलिङ्-प्र-एक-परस्मै]	माम्	अस्मद् [द्वि-एक]
		शाधि	शास् [कर्तरि-लोट्-म-एक-परस्मै]

पदार्थः

मूलम्	हिन्दी	English
कार्पण्यदोषोपहत-स्वभावः	कायरतारूप दोष से युक्त स्वभाव वाला	having nature of being inflicted by misery and weakness
धर्मसम्मूढचेताः	धर्म के विषय में मोहित चित्त	bewildered in Dharma
त्वाम्	आपसे	unto You
पृच्छामि	पूछता हूँ	ask
यत्	जो	what
निश्चितम्	निश्चित	certainly
श्रेयः	कल्याणकारक	good
स्यात्	हो	may be
तत्	वह	that
मे	मुझसे	unto me
ब्रूहि	कहिए	tell
अहम्	मैं	I
ते	आपका	your
शिष्यः	शिष्य	disciple

त्वाम्	आपके	unto You
प्रपन्नम्	शरण हुए	surrendered
माम्	मुझको	me
शाधि	शिक्षा दीजिये।	instruct

भावार्थः

हिन्दी : इसलिये कारयता रूप दोष से युक्त स्वभाववाला तथा धर्म के विषय में मोहित चित्त हुआ मैं आपसे पूछता हूँ कि जो साधन निश्चित कल्याणकारक हो, वह मुझसे कहिए, क्योंकि मैं आपका शिष्य हूँ, इसलिये आपके शरणागत मुझको शिक्षा प्रदान कीजिए।

English - Now I am confused about my Dharma and have lost all composure because of miserly weakness. In this condition I am asking You to tell me for certain which is better for me. I am Your disciple, and am seeking your shelter. Please instruct me.

सन्धिः -			
	यत्+श्रेयः	यच्छ्रेयः	जश्त्व>श्चुत्व>चर्त्व>छत्व[1]
	स्यात्+निश्चितम्	स्यान्निश्चितम्	अनुनासिक-सन्धिः[2]
	तत्+मे	तन्मे	अनुनासिक-सन्धिः[3]
	शिष्यः+ते	शिष्यस्ते	सत्व-सन्धिः[4]
	ते+अहम्	तेऽहम्	पूर्वरूप-सन्धिः[5]

समासः -		
कार्पण्यदोषोपहतस्वभावः	कार्पण्यम् एव दोषः कार्पण्यदोषः	कर्मधारयः
	कार्पण्यदोषेण उपहतः कार्पण्यदोषोपहतः	तृतीया-तत्पुरुषः
	कार्पण्यदोषोपहतः स्वभावः यस्य सः	षष्ठ्यर्थ बहुव्रीहि
धर्मसम्मूढचेताः	धर्मे सम्मूढः धर्मसम्मूढः	सप्तमी-तत्पुरुषः
	धर्मसम्मूढः चेतः यस्य सः	षष्ठ्यर्थ बहुव्रीहिः

1 झलां जशोऽन्ते (८।२।३९)>स्तोः श्चुना श्चुः (८।४।४०)>खरि च (८।४।५५)>शश्छोऽटि (८।४।६३)
2 यरोऽनुनासिकेऽनुनासिको वा (८।४।४५)
3 यरोऽनुनासिकेऽनुनासिको वा (८।४।४५)
4 विसर्जनीयस्य सः (८।३।३४)
5 एङः पदान्तादति (६।१।१०९)

पदार्थकोशः

कार्पण्यदोषोपहतस्वभावः स्वभावः शौर्यलक्षणो; कृपणस्य भावः कार्पण्यं दैन्यमज्ञाननिमित्तं तदेव दोषः [पै०]। एतान् हत्वा कथं जीविष्याम इति कार्पण्यदोषः स्वकुलं क्षयकृतस्ताभ्यामुपहताः अभिभूतः स्वभावः शौर्यादिलक्षणो यस्य [सुबो०]।

कार्पण्यं दीनत्वम्। स्वभावः शौर्यं तेजो धृतिर्दाक्ष्यम् इत्यादिना वक्ष्यमाणलक्षणः [चतु०]।

धर्मसम्मूढचेताः विवेकविज्ञानानुदयात् [पै०]। धर्मे सम्मूढं चेतो यस्य सः, युद्धं त्यक्त्वा भिक्षाटनमपि क्षत्रियस्य धर्मो वा अधर्मः चेति सन्दिग्धचित्तः सन् [सुबो०]।

पृच्छामि अनुयुञ्जे [टि०]।

निश्चितम् ऐकान्तिकम् अनापेक्षिकं यथा तथा [टि०]।

श्रेयः हितम् [पै०]। युक्तम् [सुबो०]।

स्यात् भवति अस्ति; स्यात् इति तिङन्तप्रतिरूपकमव्ययम् [टि०]।

शिष्यः शासनार्हः [पै०/सुबो०]।

प्रपन्नम् शरणमागतम् [पै०]। शरणागतम् [सुबो०]।

शाधि शिक्षय [पै०]। शिक्षयादेशं कुरु [सुबो०]।

==

❖ स्वजनवधात् विषीदन्तं युद्धात् उपरतम् अर्जुनं प्रति आत्मानात्मज्ञानोत्पादनपूर्वकं शोकमोहहरं युद्धप्रवृत्तिकरं भगवद्वचनम् ❖

(०४) श्रीभगवानुवाच

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः॥ साङ्ख्ययोगः - ०२-११॥

पदच्छेदः अ-शोच्यान् अन्वशोचः त्वम् प्रज्ञा-वादान् च भाषसे।
गत-आसून् अ-गत-आसून् च न अनुशोचन्ति पण्डिताः॥

अन्वयः - त्वम् अशोच्यान् अन्वशोचः (असि) च (त्वम्) प्रज्ञावादान् भाषसे पण्डिताः गतासून् च अगतासून् न अनुशोचन्ति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
त्वम्	युष्मद् [प्र.एक]	पण्डिताः	पण्डित [पुं-प्र-बहु]
अशोच्यान्	अशोच्य [पुं-द्वि-बहु]	गतासून्	गतासु [पुं-द्वि-बहु]
अन्वशोचः	अन्वशोच [पु-प्र.एक]	च	च [अव्य]
च	च [अव्य]	अगतासून्	अगतासु [पुं-द्वि-बहु]
प्रज्ञावादान्	प्रज्ञावाद [पुं-द्वि-बहु]	न	न [अव्य]
भाषसे	भाष् [कर्तरि-लट्-म-एक-आत्मने]	अनुशोचन्ति	अनु-शुच् [कर्तरि-लट्-प्र-बहु-परस्मै]

पदार्थः

मूलम्	हिन्दी	English
त्वम्	तुम	you
अशोच्यान्	न शोक करने योग्य मनुष्यों के लिये	those who are not worthy of lamentation
अन्वशोचः	शोक करते	lamenting
(असि)	हो	are
च	और	and
(त्वम्)	तुम	you
प्रज्ञावादान्	पण्डितों जैसे वचनों को	learned talks
भाषसे	कहते हो	speak
पण्डिताः	पण्डितजन	the learned
गतासून्	जिनके प्राण चले गये हैं	lost lives
च	और	and
अगतासून्	जिनके प्राण नहीं गये हैं	lives not lost
न	नहीं	never
अनुशोचन्ति	शोक करते।	lament

भावार्थः

हिन्दी : हे अर्जुन! तुम न शोक करने योग्य मनुष्यों के लिये शोक करते हो और पण्डितों जैसे वचनों को कहते हो, परन्तु जिनके प्राण चले गये हैं, उनके लिये और जिनके प्राण नहीं गये है उनके लिये भी पण्डित जन शोक नहीं करते।

English - The Supreme Lord said: - O Arjuna! While speaking learned words, you are mourning for what is not worthy of grief. Those who are wise lament neither for the dead nor for the living.

सन्धिः -	अन्वशोचः+त्वम्	अन्वशोचस्त्वम्	सत्व-सन्धिः[1]
	प्रज्ञावादान्+च	प्रज्ञावादांश्च	रुत्व-सन्धिः[2]
	अगतासून्+च	अगतासूंश्च	रुत्व-सन्धिः[3]
	न+अनुशोचन्ति	नानुशोचन्ति	सवर्णदीर्घ-सन्धिः[4]

समासः -	अशोच्यान्	न शोच्यः अशोच्यः तान् अशोच्यान्	नञ्-तत्पुरुषः
	प्रज्ञावादान्	प्रज्ञावतां वादाः प्रज्ञावादाः तान्	षष्ठी-तत्पुरुषः
	गतासून्	गताः असवः येभ्यः ते गतासवः तान्	पञ्चम्यर्थ-बहुव्रीहिः
	अगतासून्	गताः असवः येभ्यः ते गतासवः	पञ्चम्यर्थ-बहुव्रीहिः
		न गतासवः यस्य सः अगतासवः तान्	नञ्-बहुव्रीहिः

पदार्थकोशः

अशोच्यान् न शोच्या अशोच्याः [शा०]। न शोच्या भीष्मद्रोणादयः [पै०]। शोचितुम् अशक्यम् [गीता०]।

अन्वशोचः अनुशोचितवान् [शा०/पै०/सुबो०]।

---

1 विसर्जनीयस्य सः (८।३।३४)

2 नश्छव्यप्रशान् (८।३।७)>अनुनासिकात् परोऽनुस्वारः (८।३।४)>खरवसानयोर्विसर्जनीयः (८।३।१५)> विसर्जनीयस्य सः (८।३।३४)>स्तोः श्चुना श्चुः (८।४।४०)

3 नश्छव्यप्रशान् (८।३।७)>अनुनासिकात् परोऽनुस्वारः (८।३।४)>खरवसानयोर्विसर्जनीयः (८।३।१५)> विसर्जनीयस्य सः (८।३।३४)>स्तोः श्चुना श्चुः (८।४।४०)

4 अकः सवर्णे दीर्घः (६।१।१०१)

प्रज्ञावादान् प्रज्ञावतां बुद्धिमतां वादांश्च वचनानि च [शा०]। प्रज्ञा परमात्मज्ञानं तन्निमित्तांश्च वादान् वचनान् [पै०]। अजानतां पण्डितानां वादान् शब्दान् प्रज्ञावताम् [सुबो०]। प्रज्ञावतां देहात् अन्यम् आत्मानं जानतां वादान् शब्दान् [चतु०]।

भाषसे कथं भीष्ममहं सङ्ख्ये इत्यादीन् केवलं भाषसे [सुबो०]।

पण्डिताः आत्मज्ञा:, पण्डा आत्मविषया बुद्धिः येषां ते हि पण्डिता: [शा०]। परमार्थविद: [पै०]।

गतासून् गतप्राणान् मृतान् [शा०]। गता असव: प्राणा येषां ते [पै०]। गतप्राणान् बन्धून् [सुबो०]। गतप्राणान् देहान् [चतु०]। मृत: [गीता०]।

अगतासून् अगतप्राणान् जीवतश्च [शा०]। जीवतोऽपि बन्धून् [सुबो०]। जीवन् [गीता०]।

===

❖ *आत्मनः अविनाशित्वात् नित्यत्वे दृष्टान्तः* ❖

(०५) **देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा ।**
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ साङ्ख्ययोगः - **०२-१३॥**

पदच्छेदः देहिनः अस्मिन् यथा देहे कौमारम् यौवनम् जरा।
तथा देह-अन्तर-प्राप्तिः धीरः तत्र न मुह्यति॥

अन्वयः - यथा देहिनः अस्मिन् देहे कौमारं यौवनं (च) जरा (भवति) तथा देहान्तरप्राप्तिः (भवति) तत्र धीरः न मुह्यति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
यथा	यथा [अव्य]	**जरा**	जरा [स्त्री-प्र.एक]
देहिनः	देहिन् [नपुं-ष.एक]	**तथा**	तथा [अव्य]
अस्मिन्	इदम् [नपुं-स.एक]	**देहान्तरप्राप्तिः**	देहान्तरप्राप्ति [स्त्री-प्र.एक]
देहे	देह [नपुं-स.एक]	**तत्र**	तत्र [अव्य]
कौमारम्	कौमार [नपुं-द्वि.एक]	**धीरः**	धीर [पुं-प्र.एक]
यौवनम्	यौवन [नपुं-द्वि.एक]	**न**	न [अव्य]
		मुह्यति	मुह् [कर्तरि-लट्-प्र-एक-परस्मै]

पदार्थः		
मूलम्	**हिन्दी**	**English**
यथा	जैसे	as
देहिनः	जीवात्मा की	of the embodied
अस्मिन्	इस	in this
देहे	देह में	in the body
कौमारम्	कुमारता	childhood
यौवनम्	युवावस्था	youth
(च)	(और)	and
जरा	वृद्धावस्था	old age
(भवति)	(होती है)	is
तथा	वैसे ही	similarly
देहान्तरप्राप्तिः	अन्य शरीर की प्राप्ति	achievement of another body
(भवति)	(होती है)	becomes
तत्र	उस विषय में	thereupon
धीरः	धीर पुरुष	the wise man
न	नहीं	never
मुह्यति	मोहित होता है	is perplexed

भावार्थः

हिन्दी : जैसे जीवात्मा की इस देह में कुमारावस्था, युवावस्था और वृद्धावस्था होती है, वैसे ही अन्य शरीर की प्राप्ति होती है, उस विषय में धीर पुरुष मोहित नहीं होता है।

English - Just as in the body is the process of childhood, youth and old age; similarly the transmigration from one body to another; thus wise are never deluded in this matter.

सन्धिः -देहिनः+अस्मिन् देहिनोऽस्मिन् रुत्व>उत्व>गुण>पूर्वरुप-सन्धिः[1]

---

1 ससजुषो रुः (८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)> आद् गुणः (६।१।८७)>एङः पदान्तादति (६।१।१०९)

देहान्तरप्राप्तिः+धीरः	देहान्तरप्राप्तिर्धीरः	रेफ-सन्धिः[1]
धीरः+तत्र	धीरस्तत्र	सत्व-सन्धिः[2]

सन्धिः - देहान्तरप्राप्तिः देहस्य अन्तरः देहान्तरः षष्ठी-तत्पुरुषः
देहान्तरस्य प्राप्तिः षष्ठी-तत्पुरुषः

पदार्थकोशः

यथा येन प्रकारेण [टि०]।
देहिनः देहः अस्य अस्तीति देही, तस्य देहिनः [शा०]। देहवतः [पै०]। देहाऽभिमानिनो जीवस्य [सुबो०]। देहौ स्थूलसूक्ष्मौ विद्येते अस्य सः देही चिदात्मा तस्य [चतु०]।
अस्मिन् वर्तमाने [शा०/पै०]। स्थूलशरीरे [चतु०]।
देहे स्थूले [सुबो०]।
कौमारम् कुमारभावो बाल्यावस्था [शा०]। कुमारभावः [पै०]। कौमाराद्यवस्था [सुबो०]।
यौवनम् यूनो भावो मध्यमावस्था [शा०]। यूनो भावः [पै०]।
जरा वयोहानिः जीर्णावस्था [शा०]। वृद्धत्वम् [पै०]।
तथा तद्वद् एव [शा०]। तद्वत् [पै०]।
देहान्तरप्राप्तिः देहात् अन्यो देहो देहान्तरम्, तस्य प्राप्तिः देहान्तरप्राप्तिः [शा०]। स्थूलाच्छरीरात् अन्येषां लिङ्गशरीराणां सूक्ष्माणां स्थूलशरीरा-नुकारिणां प्राप्तिः [चतु०]।
तत्र देहनाशोत्पत्त्योः [सुबो०]। तस्मिन् विषये [चतु०]।
धीरः धीमान् [शा०/पै०/सुबो०]।
मुह्यति मोहमापद्यते [शा०]। मोहं गच्छति [पै०]।

===

❖ *आत्मनः नित्यत्वे अविक्रियत्वे च सहेतुकं दृष्टान्तान्तरम्* ❖

(०६) **वासांसि जीर्णानि यथा विहाय**
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णानि ।
अन्यानि संयाति नवानि देही ॥ साङ्ख्ययोगः - ०२-२२॥

---

1 ससजुषो रुः (८।२।६६)
2 विसर्जनीयस्य सः (८।३।३४)

पदच्छेद: वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरः अपराणि।
तथा शरीराणि विहाय जीर्णानि
अन्यानि संयाति नवानि देही॥

अन्वय: - यथा नरः जीर्णानि वासांसि विहाय अपराणि नवानि गृह्णाति तथा देही जीर्णानि शरीराणि विहाय अन्यानि नवानि संयाति।

पदपरिचय:

मूलम्	पदपरिचय:	मूलम्	पदपरिचय:
यथा	यथा [अव्य]	**तथा**	तथा [अव्य]
नरः	नर [पुं-प्र.एक]	**देही**	देहिन् [पुं-प्र.एक]
जीर्णानि	जीर्ण [नपुं-द्वि-बहु]	**जीर्णानि**	जीर्ण [नपुं-द्वि-बहु]
वासांसि	वासस् [नपुं-द्वि-बहु]	**शरीराणि**	शरीर [नपुं-द्वि-बहु]
विहाय	वि हा [कृत् प्रत्ययः:ल्यप्]	**विहाय**	वि-हा [कृत् प्रत्ययः:ल्यप्]
अपराणि	अपर [नपुं-द्वि-बहु]	**अन्यानि**	अन्य [नपुं-द्वि-बहु]
नवानि	नव [नपुं-द्वि-बहु]	**नवानि**	नव [नपुं-द्वि-बहु]
गृह्णाति	ग्रह् [कर्तरि-लट्-प्र-एक-परस्मै]	**संयाति**	सम्-या [कर्तरि-लट्-प्र-एक-परस्मै].

पदार्थ:

मूलम्	हिन्दी	English
यथा	जैसे	just as
नरः	मनुष्य	a man
जीर्णानि	पुराने	old and worn out
वासांसि	वस्त्रों को	garments
विहाय	त्यागकर	giving up
अपराणि	दूसरे	other
नवानि	नये (वस्त्रों को)	new garments
गृह्णाति	ग्रहण करता है,	does accept
तथा	वैसे ही	in the same way
देही	जीवात्मा	the embodied

जीर्णानि	पुराने	old
शरीराणि	शरीरों को	bodies
विहाय	त्यागकर	giving up
अन्यानि	दूसरे	different
नवानि	नूतन को	new sets
संयाति	प्राप्त होता है।	accepts

भावार्थः

हिन्दी : जैसे मनुष्य पुराने वस्त्रों को त्यागकर दूसरे नए वस्त्रों को ग्रहण करता है, वैसे ही जीवात्मा पुराने शरीरों को त्यागकर दूसरे नए शरीरों को प्राप्त होता है।

English : Just as a man wears new clothes by discarding the worn-out ones, similarly the soul gets new bodies after casting away the old ones.

सन्धिः - नरः+अपराणि नरोऽपराणि रुत्व >उत्व>गुण>पूर्वरुप-सन्धिः[1]
जीर्णानि+अन्यानि जीर्णान्यन्यानि यण्-सन्धिः[2]

पदार्थकोशः

नर पुरुषः [शा०]।
जीर्णानि निर्बलतां गतानि [शा०]।
वासांसि वस्त्राणि [शा०]।
विहा परित्यज्य [शा०]।
अपराणि अन्यानि [शा०]।
नवानि अभिनवानि [शा०]। वस्त्राणि [पै०]।
गृह्णाति उपादत्ते [शा०]।
तथा तद्वदेव [शा०]।
देही आत्मा [शा०]। स्वयं पूर्वदेहविनाशेऽप्यविक्रियो विनाशरहितः [पै०]।

1 ससजुषो रुः (८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)>
आद् गुणः (६।१।८७)>एङः पदान्तादति (६।१।१०९)
2 इको यणचि (६।१।७७)

जीर्णानि	वयोहानिं गतानि [टि०]।
विहाय	परित्यज्य [टि०]।
संयाति	सङ्गच्छति [शा०]।

==

❖ *आत्मनः नित्यत्वे अविक्रियत्वे च सहेतुकं दृष्टान्तान्तरम्* ❖

(०७) **नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।**
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥ साङ्ख्ययोगः - ०२-२३॥

पदच्छेदः न एनम् छिन्दन्ति शस्त्राणि न एनम् दहति पावकः।
न च एनम् क्लेदयन्ति आपः न शोषयति मारुतः॥

अन्वयः - एनं शस्त्राणि न छिन्दन्ति एनम् पावकः न दहति एनम् आपः न क्लेदयन्ति च (एनम्) मारुतः न शोषयति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
एनम्	इदम् [पुं-द्वि.एक]	**एनम्**	इदम् [पुं-द्वि.एक]
शस्त्राणि	शस्त्र [नपुं-प्र-बहु]	**आपः**	आपस् [नपुं-प्र.एक]
न	न [अव्य]	**न**	न [अव्य]
छिन्दन्ति	छिद् [कर्तरि-लट्-प्र-बहु-परस्मै]	**क्लेदयन्ति**	क्लिद्-णिच् [कर्तरि-लट्-प्र-बहु-परस्मै]
एनम्	इदम् [पुं-द्वि.एक]	**च**	च [अव्य]
पावकः	पावक [पुं-प्र.एक]	**मारुतः**	मारुत [पुं-प्र.एक]
न	न [अव्य]	**न**	न [अव्य]
दहति	दह् [कर्तरि-लट्-प्र-एक-परस्मै]	**शोषयति**	शुष्-णिच् [कर्तरि-लट्-प्र-एक-परस्मै]

पदार्थः

मूलम्	हिन्दी	**English**
एनम्	इसको	this
शस्त्राणि	शस्त्र	weapons

न	नहीं	never
छिन्दन्ति	काट सकते,	can cut to pieces
एनम्	इसको	unto this
पावकः	आग	fire
न	नहीं	never
दहति	जला सकती	burns
एनम्	इसको	unto this
आपः	जल	water
न	नहीं	never
क्लेदयन्ति	गला सकता	moistens
च	और	also
(एनम्)	इसको	unto this soul
मारुतः	वायु	wind
न	नहीं	never
शोषयति	सुखा सकता।	dries

भावार्थः

हिन्दी : इस आत्मा को शस्त्र नहीं काट सकते, इसको आग नहीं जला सकती, इसको जल नहीं गला सकता और वायु नहीं सुखा सकती।

English - Neither the weapons can cleave it (the soul), nor can fire burn; water can not drench it, nor can wind dry.

सन्धिः -	न+एनम्	नैनम्	वृद्धि-सन्धिः[1]
	च+एनम्	चैनम्	वृद्धि-सन्धिः[2]
	क्लेदयन्ति+आपः	क्लेदयन्त्यापः	यण्-सन्धिः[3]
	आपः+न	आपो न	रुत्व>उत्व>गुण-सन्धिः[4]

1 वृद्धिरेचि (६।१।८८)
2 वृद्धिरेचि (६।१।८८)
3 इको यणचि (६।१।७७)
4 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)

पदार्थकोशः

एनम् प्रकृतं देहिनम् [शा०/पै०]। आत्मानम् [गीता०]।
शस्त्राणि गदाखड्गादयः पृथिवीविकाराः [टि०]।
छिन्दन्ति निरवयवत्वात् न अवयवविभागं कुर्वन्ति [पै०]। द्वेधा कुर्वन्ति [चतु०]।
पावकः अग्निः [शा०/पै०]।
दहति भस्मी करोति [टि०]।
आपः अपां हि सावयववस्तुन्यार्द्रभावकरणेनावयवविश्लेषणापादने सामर्थ्यम् [पै०]।
क्लेदयन्ति मृदूकरणेन शिथिलं न कुर्वन्ति [सुबो०]।
मारुतः स्नेहवत् द्रव्यं स्नेहशोषणेन नाशयति वायुः [शा०]। वायुः स्नेहद्रव्यं स्नेहशोषणेन [पै०]।

==

❖ *लौकिकदृष्ट्या अपि आत्मनः सहेतुकं शोकमोहान् अर्हत्वम्* ❖

(०८) **जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।**
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि॥ साङ्ख्ययोगः - **०२-२७॥**

पदच्छेदः जातस्य हि ध्रुवः मृत्युः ध्रुवम् जन्म मृतस्य च।
तस्मात् अ-परिहार्ये अर्थे न त्वम् शोचितुम् अर्हसि॥

अन्वयः - हि जातस्य मृत्युः ध्रुवः (अस्ति) च मृतस्य जन्म ध्रुवम् (अस्ति) तस्मात् अपरिहार्ये अर्थे त्वं शोचितुं न अर्हसि।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
हि	हि [अव्य]	**तस्मात्**	तद् [पुं-पं-एक]
जातस्य	जात [पुं-ष.एक]	**अपरिहार्ये**	अपरिहार्य [पुं-स.एक]
मृत्युः	मृत्यु [पुं-प्र.एक]	**अर्थे**	अर्थ [पुं-स.एक]
ध्रुवः	ध्रुव [पुं-प्र.एक]	**त्वम्**	युष्मद् [प्र.एक]
च	च [अव्य]	**शोचितुम्**	शुच् [कृत् प्रत्ययः:तुमुन्]
मृतस्य	मृत [पुं-ष.एक]	**न**	न [अव्य]
जन्म	जन्मन् [नपुं-प्र.एक]	**अर्हसि**	अर्ह् [कर्तरि-लट्-म-एक-परस्मै]
ध्रुवम्	ध्रुव [नपुं-प्र.एक]		

पदार्थः

मूलम्	हिन्दी	English
हि	क्योंकि	because
जातस्य	जन्म लिए हुए की	one who is born
मृत्युः	मृत्यु	death
ध्रुवः	निश्चित	certain
(अस्ति)	है	is
च	और	and
मृतस्य	मरे हुए का	of the dead
जन्म	जन्म	birth
ध्रुवम्	निश्चित	certain
(अस्ति)	है	is
तस्मात्	इससे	therefore
अपरिहार्ये	बिना उपाय वाले	for that which is unavoidable
अर्थे	विषय में	in this matter
त्वम्	तुम	you
शोचितुम्	शोक करने के लिए	to lament
न	नहीं	do not
अर्हसि	योग्य हो	deserve

भावार्थः

हिन्दी : क्योंकि इस मान्यता के अनुसार जन्म लिए हुए की मृत्यु निश्चित है और मरे हुए का जन्म निश्चित है। इससे भी इस बिना उपाय वाले विषय में तुम शोक करने योग्य नहीं हो।

English -(Because) death is inevitable for the born and certain is birth for the dead. Therefor, for what is inevitable situation, you should not grieve.

सन्धिः - ध्रुवः+मृत्युः ध्रुवो मृत्युः रुत्व>उत्व>गुण-सन्धिः[1]

1 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)

मृत्युः+ध्रुवम्	मृत्युर्ध्रुवम्	रेफ-सन्धिः[1]
तस्मात्+अपरिहार्ये	तस्मादपरिहार्ये	जश्त्व-सन्धिः[2]
अपरिहार्ये+अर्थे	अपरिहार्येऽर्थे	पूर्वरूप-सन्धिः[3]

समासः - अपरिहार्ये न परिहार्यम् अपरिहार्यम् तस्मिन् नञ्-तत्पुरुषः

पदार्थकोशः

हि यस्मात् [सुबो०]।
जातस्य लब्धजन्मनः [शा०]। जन्मवतः [पै०]।
मृत्युः मरणम् [शा०/चतु०]। नाशः [पै०]।
ध्रुव अव्यभिचारी [शा०]। निश्चितः [सुबो०]। अपरिहार्यः [चतु०]।
मृतस्य नाशवतः [पै०]।
जन्म पुनर्जनिश्च [टि०]।
अपरिहार्ये परिहर्तुं योग्यम् [टि०]।
अर्थे अवश्यम्भाविनि जन्ममरणलक्षणे [सुबो०]। मरणाख्ये [चतु०]।
त्वम् विद्वान् [सुबो०]।
अर्हसि योग्यो भवति [सुबो०]।

===

❖ *कामात्मनां फलीभूताद्वेदोदितात् अपि मुमुक्षुणा स्वोचितसारग्राहिणा भाव्यम्* ❖

(०९) **कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥ साङ्ख्ययोगः ०२-४७॥

पदच्छेदः कर्मणि एव अधिकारः ते मा फलेषु कदाचन।
मा कर्म-फल-हेतुः भूः मा ते सङ्गः अस्तु अ-कर्मणि॥

अन्वयः - ते अधिकारः कर्मणि एव (अस्ति) फलेषु (अधिकारः) कदाचन मा (अस्ति) (त्वम्) कर्मफलहेतुः मा (अ)भूः ते सङ्गः अकर्मणि मा अस्तु।

1 ससजुषो रुः (८।२।६६)
2 झलां जशोऽन्ते (८।२।३९)
3 एङः पदान्तादति (६।१।१०९)

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
ते	युष्मद् [ष.एक]	**मा**	मा [अव्य]
अधिकारः	अधिकार [पुं-प्र.एक]	**(अ)भूः**	भू [कर्तरि-लुङ्-म-एक-परस्मै]
कर्मणि	कर्मन् [नपुं-स.एक]	**ते**	युष्मद् [ष.एक]
एव	एव [अव्य]	**सङ्गः**	सङ्ग [पुं-प्र.एक]
फलेषु	फल [नपुं-स-बहु]	**अकर्मणि**	अकर्मन् [पुं-स.एक]
कदाचन	कदाचन [अव्य]	**मा**	मा [अव्य]
मा	मा [अव्य]	**अस्तु**	अस् [कर्तरि-लोट्-प्र-एक-परस्मै]
कर्मफलहेतुः	कर्मफलहेतु [पुं-प्र.एक]		

पदार्थः

मूलम्	हिन्दी	English
ते	तुम्हारा	your
अधिकारः	अधिकार	right
कर्मणि	कर्म करने में	in prescribed duties
एव	ही	certainly
(अस्ति)	है	is
फलेषु	फलों में	in the fruits
(अधिकारः)	अधिकार	right
कदाचन	कभी	at any time
मा	नहीं	never
(अस्ति)	है	is
(त्वम्)	तुम	you
कर्मफलहेतुः	कर्मों के फल का हेतु	cause in the result of the actions
मा	मत	never
(अ)भूः	बनो	become
ते	तुम्हारी	your
सङ्गः	आसक्ति	attachment
अकर्मणि	अकर्म में	in inaction

मा	नहीं	never
अस्तु	हो	be there

भावार्थः

हिन्दी : तुम्हारा कर्म करने में ही अधिकार है, उसके फलों में कभी नहीं हो। इसलिए तुम कर्मों के फल की प्राप्ति के लिए मत बनो, तुम्हारी कर्म न करने में भी आसक्ति न हो।

English - Your right is only to perform your duty, but never to its results. Let not the results of the actions be your motive, nor there be attachment in you for inaction.

सन्धिः -	कर्मणि+एव	कर्मण्येव	यण्-सन्धिः[1]
	एव+अधिकारः	एवाधिकारः	सवर्णदीर्घ-सन्धिः[2]
	अधिकारः+ते	अधिकारस्ते	सत्व-सन्धिः[3]
	कर्मफलहेतुः+भूः	कर्मफलहेतुर्भूः	रेफ-सन्धिः[4]
	भूः+मा	भूर्मा	रेफ-सन्धिः[5]
	सङ्गः+अस्तु	सङ्गोऽस्तु	रुत्व >उत्व>गुण>पूर्वरुप-सन्धिः[6]
	अस्तु+अकर्मणि	अस्त्वकर्मणि	यण्-सन्धिः[7]

समासः -	कर्मफलहेतुः	कर्मणः फलम् कर्मफलम्,	षष्ठी-तत्पुरुषः
		कर्मफलम् हेतुः यस्य सः	षष्ठ्यर्थ बहुव्रीहिः
	अकर्मणि	न कर्म अकर्म तस्मिन् अकर्मणि	नञ्-तत्पुरुषः

1 इको यणचि (६।१।७७)
2 अकः सवर्णे दीर्घः (६।१।१०१)
3 विसर्जनीयस्य सः (८।३।३४)
4 ससजुषो रुः (८।२।६६)
5 ससजुषो रुः (८।२।६६)
6 ससजुषो रुः (८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)>आद्गुणः (६।१।८७)>एङः पदान्तादति (६।१।१०९)
7 इको यणचि (६।१।७७)

पदार्थकोशः

ते	तव [शा०/पै०]। तव तत्त्वज्ञानार्थिनः [सुबो०]।
अधिकारः	बन्धहेतुधनाधिकारः [सुबो०]।
फलेषु	कामः [टि०]।
कदाचन	कस्याञ्चित् अवस्थायाम् [पै०]।
कर्मफलहेतुः	कर्मफलस्य एव जन्मनो हेतुः [शा०]। कर्मफलं प्रवृत्तिहेतुर्यस्य [सुबो०]। कर्मफलं स्वर्गपश्वादिहेतुः कर्मसु प्रवर्तकं यस्य [चतु०]।
सङ्गः	प्रीतिः [पै०]।
अकर्मणि	अकरणे [पै०]। कर्म अकरणे [चतु०]।
अस्तु	भूत् [पै०]।

==

❖ ***कामात्मनां फलीभूताद्वेदोदितात् अपि मुमुक्षुणा स्वोचितसारग्राहिणा भाव्यम्*** ❖

(१०) **योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।**
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥ साङ्ख्ययोगः ०२-४८॥

पदच्छेदः योगस्थः कुरु कर्माणि सङ्गम् त्यक्त्वा धनञ्जय।
सिद्धि-असिद्ध्योः समः भूत्वा समत्वम् योगः उच्यते॥

अन्वयः - धनञ्जय (त्वम्) सङ्गं त्यक्त्वा सिद्ध्यसिद्ध्योः समः भूत्वा योगस्थः कर्माणि कुरु समत्वं योगः उच्यते।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
धनञ्जय	धनञ्जय [पुं-सं.एक]	**योगस्थः**	योगस्थ [पुं-प्र.एक]
सङ्गम्	सङ्ग [पुं-द्वि.एक]	**कर्माणि**	कर्मन् [नपुं-द्वि-बहु]
त्यक्त्वा	त्यज् [कृत् प्रत्ययः:क्त्वा]	**कुरु**	कृ [कर्तरि-लोट्-म-एक-परस्मै]
सिद्ध्यसिद्ध्योः	सिद्ध्यसिद्धि [स्त्री-ष.द्वि]	**समत्वम्**	समत्व [नपुं-द्वि.एक]
समः	सम [पुं-प्र.एक]	**योगः**	योग [पुं-प्र.एक]
भूत्वा	अस् [कृत् प्रत्ययः:क्त्वा]	**उच्यते**	वच् [कर्मणि-लट्-प्र-एक-आत्मने]

पदार्थः		
मूलम्	हिन्दी	English
धनञ्जय	हे धनंजय!	O Dhanañjaya
(त्वम्)	तुम	you
सङ्गम्	आसक्ति को	attachment
त्यक्त्वा	त्यागकर	having abandoned
सिद्ध्यसिद्ध्योः	सिद्धि और असिद्धि में	in success and failure
समः	समान	equal
भूत्वा	होकर	having become
योगस्थः	योग में स्थित हुए	steadfast in yoga
कर्माणि	कर्तव्य कर्मों को	your duties
कुरु	करो,	perform
समत्वम्	समत्व	evenness of mind
योगः	योग	yoga
उच्यते	कहलाता है।	is called

भावार्थः

हिन्दी : हे धनंजय! तुम आसक्ति को त्यागकर तथा सिद्धि और असिद्धि में समान बुद्धिवाले होकर योग में स्थित हुए कर्तव्य कर्मों को करो, समत्व ही योग कहलाता है।

English - Giving up the attachment of success and failure, O Dhanañjaya, be established in yoga. Equipoise in yoga perform your duty. This evenness of mind is known as yoga.

सन्धिः -	समः+भूत्वा	समो भूत्वा	रुत्व>उत्व>गुण-सन्धिः[1]
	योगः+उच्यते	योग उच्यते	रुत्व >यत्व>लोप-सन्धिः[2]

---

1 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)

2 ससजुषो रुः (८।२।६६)>भोभगो अघो अपूर्वस्य योऽशि (८।३।१७)>लोपः शाकल्यस्य (८।३।१९)

समासः - सिद्ध्यसिद्ध्योः — न सिद्धिः असिद्धिः — नञ्-तत्पुरुषः
सिद्धिः च असिद्धिः च सिद्ध्यसिद्धी तयोः — इतरेतरयोगद्वन्द्वः
योगस्थः — योगे तिष्ठति इति योगस्थः — उपपदसमासः

पदार्थकोशः

धनञ्जय धनं जयतीति धनञ्जय: पार्थ: धनं स्वर्गसुखं जयति तुच्छत्वेन त्यजतीति धनञ्जय:[टि०]।
सङ्गम् कर्तृत्वाभिनिवेशम् [सुबो०]। फलतृष्णां कर्तृत्वाभिमानम् [चतु०]।
सिद्ध्यसिद्ध्योःफलतृष्णाशून्येन क्रियमाणे कर्मणि सत्त्वशुद्धिजा ज्ञानप्राप्तिलक्षणा सिद्धिः, तद्विपर्ययजा असिद्धिः, तयो: सिद्ध्यसिद्ध्यो: [शा०]। सत्त्वशुद्धिज्ञानप्राप्तिलक्षणा सिद्धि: तत् विपर्ययोऽसिद्धि: तयो: [पै०]।
समः तुल्य: [शा०/पै०]। हर्षविषादशून्य: [चतु०]।
योगस्थः योग: परमेश्वरैकपरता तत्र स्थित: [सुबो०]। योगे स्थित्वा [गीता०]।
कर्माणि ज्ञानार्थम् [चतु०]।
समत्वम् समस्य भाव: समत्वम् ब्रह्मत्वम् [टि०]।

==

❖ *श्रीभगवदुक्तानि स्थितप्रज्ञस्य ज्ञाननिष्ठस्य ससाधनानि लक्षणानि* ❖

(११) **दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।**
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥ साङ्ख्ययोगः **०२-५६॥**

पदच्छेदः दुःखेषु अनुद्विग्न-मनाः सुखेषु विगत-स्पृहः।
वीत-राग-भय-क्रोधः स्थित-धीः मुनिः उच्यते॥

अन्वयः - दुःखेषु अनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः मुनिः स्थितधीः उच्यते।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
दुःखेषु	दुःख [नपुं-स-बहु]	वीतरागभयक्रोधः	वीतरागभयक्रोध [पुं-प्र.एक]
अनुद्विग्नमनाः	अनुद्विग्नमनस् [पुं-प्र.एक]	मुनिः	मुनि [पुं-प्र.एक]
सुखेषु	सुख [नपुं-स-बहु]	स्थितधीः	स्थितधी [पुं-प्र.एक]
विगतस्पृहः	विगतस्पृह [पुं-प्र.एक]	उच्यते	वच् [कर्मणि-लट्-प्र-एक-आत्मने]

पदार्थः

मूलम्	हिन्दी	English
दुःखेषु	दुःख में	in the midst of sorrows
अनुद्विग्नमनाः	जिसके मन में उद्वेग नहीं होता	whose mind is unagitated
सुखेषु	सुखों में	in happiness
विगतस्पृहः	जो सर्वथा निःस्पृह है	without being too interested
वीतरागभयक्रोधः	जिसके राग, भय और क्रोध नष्ट हो गये हैं	free from passion, fear and anger
मुनिः	मुनि	a sage
स्थित-धीः	स्थिरबुद्धि	steady intelligence
उच्यते	कहा जाता है।	is called

भावार्थः

हिन्दी : दुःखों की प्राप्ति होने पर जिसके मन में उद्वेग नहीं होता, सुखों की प्राप्ति में सर्वथा निःस्पृह है तथा जिसके राग, भय और क्रोध नष्ट हो गए हैं, ऐसा मुनि स्थिरबुद्धि कहा जाता है।

English - He is called an enlightened sage of steady intellect who remains unperplexed in the moments of sorrow, who does not crave for any desire while in comfort and who is completely liberated from attachment, fear and anger.

सन्धिः-

दुःखेषु+अनुद्विग्नमनाः	दुःखेष्वनुद्विग्नमनाः	यण्-सन्धिः[1]
स्थितधीः+मुनिः	स्थितधीर्मुनिः	रेफ-सन्धिः[2]
मुनिः+उच्यते	मुनिरुच्यते	रेफ-सन्धिः[3]

समासः-

अनुद्विग्नमनाः	न उद्विग्नः अनुद्विग्नः	नञ्-तत्पुरुषः
	अनुद्विग्नम् मनः यस्य सः अनुद्विग्नमनः ते	षष्ठ्यर्थ बहुव्रीहिः

1 इको यणचि (६।१।७७)
2 ससजुषो रुः (८।२।६६)
3 ससजुषो रुः (८।२।६६)

विगतस्पृहः	विगता स्पृहा यस्मात् सः विगतस्पृहः	पञ्चम्यर्थ बहुव्रीहिः
वीतरागभयक्रोधः	रागः च भयम् च क्रोधः च रागभयक्रोधाः	इतरेतरयोगद्वन्द्वः
	वीताः रागभयक्रोधाः यस्मात् सः	पञ्चम्यर्थ बहुव्रीहिः
स्थितधीः	स्थिता धीः यस्य सः स्थितधीः	षष्ठ्यर्थ बहुव्रीहिः

पदार्थकोशः

दु:खेषु आध्यात्मिकादिषु [पै०]। अतिदु:खेषु प्राप्तेषु [सुबो०]। शस्त्रपातादिषु दु:खसाधनेषु प्राप्तेषु [चतु०]।

अनुद्विग्नमना: न उद्विग्नं न प्रक्षुभितं दु:खप्राप्तौ मनो यस्य सोऽयम् अनुद्विग्नमना: [शा०]। अनुद्विग्नम् अप्रक्षुभितं मनो यस्य स [पै०]। अनुद्विग्नमक्षुभितं मनो यस्य स: [सुबो०]। अचञ्चलमना: [चतु०]।

सुखेषु प्राप्तेषु [पै०]। सुखसाधनेषु स्रक्चन्दनादिषु प्राप्तेषु [चतु०]।

विगतस्पृह: विगता स्पृहा तृष्णा यस्य, न अग्नि: इव इन्धनाद्याधाने सुखानि अनुविवर्धते स विगतस्पृह: [शा०]। विगता स्पृहा तृष्णा यस्य [पै०/सुबो०]।

वीतरागभयक्रोध: राग: च भयं च क्रोध: च वीता विगता यस्मात् स वीतरागभयक्रोध: [शा०]। वीता अपगता रागभयक्रोधा यस्मात्, राग: प्रीति: [सुबो०]। वीता: रागभयक्रोधा यस्मात् स: [चतु०]।

मुनि: सन्न्यासी [शा०]। मननशील: [पै०]।

स्थितधी: स्थितप्रज्ञ: [शा०/पै०/सुबो०/चतु०]।

==

❖ *अनात्मज्ञस्य कर्मयोगावश्यकत्वनिरूपणम्* ❖

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवश: कर्म सर्व: प्रकृतिजैर्गुणै:॥ कर्मयोग: **०३-०५॥**

पदच्छेदः न हि कश्चित् क्षणम् अपि जातु तिष्ठति अ-कर्मकृत्।
कार्यते हि अ-वशः कर्म सर्वः प्रकृतिजैः गुणैः॥

अन्वयः - हि कश्चित् जातु क्षणम् अपि अकर्मकृत् न तिष्ठति हि सर्वः प्रकृतिजै: गुणैः अवशः कर्म कार्यते।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
हि	हि [अव्य]	हि	हि [अव्य]
कश्चित्	किञ्चित् [पुं-प्र-एक]	सर्वः	सर्व [पुं-प्र-एक]
जातु	जातु [अव्य]	प्रकृतिजैः	प्रकृतिज [पुं-तृ-बहु]
क्षणम्	क्षण [पुं-द्वि-एक]	गुणैः	गुण [पुं-तृ-बहु]
अपि	अपि [अव्य]	अवशः	अवश [पुं-प्र-एक]
अकर्मकृत्	अकर्मकृत् [पुं-प्र-एक]	कर्म	कर्मन् [नपुं-प्र-एक]
न	न [अव्य]	कार्यते	कृ-णिच् [कर्तरि-लट्-प्र-एक-आत्मने]
तिष्ठति	स्था [कर्तरि-लट्-प्र-एक-परस्मै]		

पदार्थः

मूलम्	हिन्दी	English
हि	निःसन्देह	certainly
कश्चित्	कोई भी	anyone
जातु	किसी भी काल में	ever
क्षणम्	क्षणमात्र	even a moment
अपि	भी	also
अकर्मकृत्	बिना कर्म किये	without doing something
न	नहीं	not
तिष्ठति	रहता	stands
हि	क्योंकि	certainly
सर्वः	सभी	everything
प्रकृतिजैः	प्रकृतिजनित	out of the modes of material nature
गुणैः	गुणों द्वारा	by the qualities
अवशः	परवश हुआ	helplessly
कर्म	कर्म करने के लिये	work
कार्यते	बाध्य किया जाता है	forced to work

भावार्थः

हिन्दी - निःसन्देह कोई भी मनुष्य किसी भी काल में क्षण मात्र भी बिना कर्म किये नहीं रहता, क्योंकि सभी मनुष्य समुदाय प्रकृति जनित गुणों द्वारा परवश हुआ कर्म करने के लिये बाध्य किया जाता है।

English - Surely none can ever remain inactive even for a moment; for everyone is helplessly driven to action by nature-born qualities.

सन्धिः -			
	कश्चित्+क्षणम्	कश्चित्क्षणम्	चर्त्व-सन्धिः[1]
	तिष्ठति+अकर्मकृत्	तिष्ठत्यकर्मकृत्	यण्-सन्धिः[2]
	हि+अवशः	ह्यवशः	यण्-सन्धिः[3]
	प्रकृतिजैः+गुणैः	प्रकृतिजैर्गुणैः	रेफ-सन्धिः[4]

समासः -			
	अकर्मकृत्	कर्म करोतीति कर्मकृत्	उपपदम्
		न कर्मकृत् अकर्मकृत्	नञ्-तत्पुरुषः
	प्रकृतिजैः	प्रकृतेः जायन्ते इति प्रकृतिजाः तैः	उपपदम्
	अवशः	न वशः अवशः	नञ्-तत्पुरुषः

पदार्थकोशः

हि	यस्मात् [शा०/पै०/चतु०]।
कश्चित्	ज्ञानी वा अज्ञानी वा अज्ञो वा [सुबो०]।
जातु	कदाचित् [शा०/पै०/चतु०]। कस्याञ्चिद् अवस्थायाम् [सुबो०]।
क्षणम्	कालम् [शा०]। समाधिकाले [चतु०]।
अकर्मकृत्	अक्रियः [पै०]। कर्माणि अकुर्वाणः [सुबो०]। कर्माणि दुर्मनोरथादीन्यकुर्वन् [चतु०]।
हि	यस्मात् [शा०/चतु०]।
सर्वः	प्राणी [शा०/पै०]। जनः [सुबो०]। लोकः [चतु०]।
प्रकृतिजैः	प्रकृतितो जातैः [शा०]। स्वभावप्रभवैः [सुबो०]। सत्त्वरजस्तमोभिः स्वभावप्रभवैः रागद्वेषादिभिः वा [चतु०]।

1 खरि च (८।४।५५)
2 इको यणचि (६।१।७७)
3 इको यणचि (६।१।७७)
4 ससजुषो रुः (८।२।६६)

गुणैः	सत्त्वरजस्तमोभिः गुणैः [शा०/पै०]। रागद्वेषादिभिः गुणैः [सुबो०]।
अवशः	स्वतन्त्रः सन् [सुबो०]। कर्मजशुद्ध्यभावादजितचित्तः [चतु०]।
कर्म	कर्मणि [सुबो०]। कायिकं वाचिकं मानसिकं वा [चतु०]।
कार्यते	प्रवर्त्यते प्रवर्तते [सुबो०/चतु०]।

==

❖ *असम्यग्ज्ञानिनः एव निष्कामकर्मोपदेशः* ❖

(१३) **यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।**
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥ कर्मयोगः ०३-२१॥

पदच्छेदः यत् यत् आचरति श्रेष्ठः तत् तत् एव इतरः जनः।
सः यत् प्रमाणम् कुरुते लोकः तत् अनुवर्तते॥

अन्वयः - श्रेष्ठः यत् यत् आचरति इतरः जनः तत् तत् एव (आचरति) सः यत् प्रमाणं कुरुते लोकः तत् अनुवर्तते।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
श्रेष्ठः	श्रेष्ठ [पुं-प्र-एक]	**एव**	एव [अव्य]
यत्	यद् [नपुं-द्वि-एक]	**सः**	तद् [पुं-प्र-एक]
यत्	यद् [नपुं-द्वि-एक]	**यत्**	यद् [नपुं-द्वि-एक]
आचरति	आङ्-चर् [कर्तरि-लट्-प्र-एक-परस्मै]	**प्रमाणम्**	प्रमाण [नपुं-द्वि-एक]
इतरः	इतर [पुं-प्र-एक]	**कुरुते**	कृ [कर्तरि-लट्-प्र-एक-आत्मने]
जनः	जन [पुं-प्र-एक]	**लोकः**	लोक [पुं-प्र-एक]
तत्	तद् [नपुं-द्वि-एक]	**तत्**	तद् [नपुं-द्वि-एक]
तत्	तद् [नपुं-द्वि-एक]	**अनुवर्तते**	अनु वृत् [कर्तरि-लट्-प्र-एक-आत्मने]

पदार्थः

मूलम्	हिन्दी	English
श्रेष्ठः	श्रेष्ठ पुरुष	great man
यत्	जो	whatever
यत्	जो	and whichever

आचरति	आचरण करता है	does he act
इतरः	अन्य	other
जनः	पुरुष	person
तत्	वैसा	that
तत्	वैसा	and that alone
एव	ही	certainly
(आचरति)	(आचरण करते हैं)।	does he act
सः	वह	he
यत्	जो कुछ	whatever
प्रमाणम्	प्रमाण	evidence
कुरुते	कर देता है,	does perform
लोकः	लोक	all the world
तत्	उसी के	that
अनुवर्तते	अनुसरण करता है	follow in the footsteps

भावार्थः

हिन्दी - श्रेष्ठ पुरुष जो-जो आचरण करते हैं, अन्य पुरुष भी वैसा ही आचरण करते हैं। वे जो कुछ प्रमाण कर देते हैं, समस्त लोक उसी का अनुसरण करते हैं।

English - For whatever a great man does, that very thing other men also do; whatever standard he sets up the generality of men follow the same.

सन्धिः -

यत्+यत्	यद्यत्	जश्त्व-सन्धिः[1]
यत्+आचरति	यदाचरति	जश्त्व-सन्धिः[2]
श्रेष्ठः+तत्	श्रेष्ठस्तत्	सत्व-सन्धिः[3]
तत्+तत्	तत्तत्	चर्त्व-सन्धिः[4]

1 झलां जशोऽन्ते (८।२।३९)
2 झलां जशोऽन्ते (८।२।३९)
3 विसर्जनीयस्य सः (८।३।३४)
4 खरि च (८।४।५५)

तत्+एव	तदेव	जश्त्व-सन्धिः[1]
एव+इतरः	एवेतरः	गुण-सन्धिः[2]
इतरः+जनः	इतरो जनः	रुत्व>उत्व>गुण-सन्धिः[3]
सः+यत्	स यत्	विसर्गलोप-सन्धिः[4]
यत्+प्रमाणम्	यत्प्रमाणम्	जश्त्व >चर्त्व-सन्धिः[5]
लोकः+तत्	लोकस्तत्	सत्व-सन्धिः[6]
तत्+अनुवर्तते	तदनुवर्तते	जश्त्व-सन्धिः[7]

पदार्थकोशः

श्रेष्ठ	प्रधान: [शा०/पै०]। जन: [सुबो०]।
यत्	कर्म [टि०]।
आचरति	करोति [टि०]।
इतर:	प्राकृत: [सुबो०]।
जन:	तदनुगत: [पै०]।
स:	श्रेष्ठ: [शा०/पै०]।
यत्	लौकिकं वैदिकं वा [पै०]। कर्मशास्त्रं प्रवृत्तिशास्त्रं निवृत्तिशास्त्रं वा [सुबो०]।
प्रमाणम्	व्यवहरति वा [टि०]।
कुरुते	मन्यते [टि०]।
लोक:	प्रमाणी [पै०]।
तत्	तदेव [पै०]।
अनुवर्तते	प्रमाणीकरोति [शा०]। करोति [पै०]। अनुसरति [सुबो०]

==

1 झलां जशोऽन्ते (८।२।३९)
2 आद् गुणः (६।१।८७)
3 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
4 एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६।१।१३२)
5 झलां जशोऽन्ते (८।२।३९)>खरि च (८।४।५५)
6 विसर्जनीयस्य सः (८।३।३४)
7 झलां जशोऽन्ते (८।२।३९)

❖ *परधर्मात्स्वधर्मस्य एव श्रेयस्करत्वम्* ❖

(१४) **श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।**
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥ कर्मयोगः ०३-३५॥

पदच्छेदः श्रेयान् स्व-धर्मः विगुणः पर-धर्मात् स्वनुष्ठितात्।
स्व-धर्मे निधनम् श्रेयः पर-धर्मः भय-आवहः॥

अन्वयः - स्वानुष्ठितात् परधर्मात् विगुणः स्वधर्मः श्रेयान् (अस्ति) स्वधर्मे निधनं श्रेयः (अस्ति) परधर्मः भयावहः (भवति)।

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
स्वानुष्ठितात्	स्वानुष्ठित [पुं-प-एक]	**स्वधर्मे**	स्वधर्म [पुं-स-एक]
परधर्मात्	परधर्म [पुं-प-एक]	**निधनम्**	निधन [नपुं-प्र-एक]
विगुणः	विगुण [पुं-प्र-एक]	**श्रेयः**	श्रेयस् [नपुं-प्र-एक]
स्वधर्मः	स्वधर्म [पुं-प्र-एक]	**(अस्ति)**	(अस् [कर्तरि-लट्-प्र-एक-परस्मै])
श्रेयान्	श्रेयस् [पुं-प्र-एक]	**परधर्मः**	परधर्म [पुं-प्र-एक]
(अस्ति)	(अस् [कर्तरि-लट्-प्र-एक-परस्मै])	**भयावहः**	भयावह [पुं-प्र-एक]
		(भवति)	(भू [कर्तरि-लट्-प्र-एक-परस्मै])

पदार्थः

मूलम्	**हिन्दी**	**English**
स्वानुष्ठितात्	अच्छी प्रकार आचरण में लाये हुए	than perfectly done
परधर्मात्	दूसरे के धर्म से	from duties mentioned for others
विगुणः	गुणरहित	even faulty
स्वधर्मः	अपना धर्म	one's prescribed duties
श्रेयान्	अति उत्तम	far better
(अस्ति)	(है)	is
स्वधर्मे	अपने धर्म में	in one's prescribed duties
निधनम्	मरना	death
श्रेयः	कल्याणकारक	better

(अस्ति)	(है)	is
परधर्मः	दूसरे का धर्म	duties prescribed for others
भयावहः	भय देने वाला	fearful
(भवति)	है	becomes

भावार्थः

हिन्दी - अच्छी प्रकार आचरण में लाये हुए दूसरे के धर्म से गुणरहित भी अपना धर्म अति उत्तम है। अपने धर्म के लिए तो मरना भी कल्याणकारक है और दूसरे का धर्म भय प्रदान करने वाला है।

English - One's own duty, though devoid of merit, is preferable to the duty of another well performed. Even death in the performance of one's own duty brings blessedness; another's duty is fraught with fear.

सन्धिः -	स्वधर्मः+विगुणः	स्वधर्मो विगुणः	रुत्व>उत्व>गुण-सन्धिः[1]
	परधर्मात्+स्वनुष्ठितात्	परधर्मात्स्वनुष्ठितात्	चर्त्व-सन्धिः[2]
	परधर्मः+भयावहः	परधर्मो भयावहः	रुत्व>उत्व>गुण-सन्धिः[3]

समासः -	स्वानुष्ठितात्	सम्यक् अनुष्ठितः स्वनुष्ठितः तस्मात्	प्रादि-तत्पुरुषः
	परधर्मात्	परेषां धर्मः परधर्मः तस्मात्	षष्ठी-तत्पुरुषः
	विगुणः	विगतः गुणः यस्मात् सः विगुणः	पञ्चमी बहुव्रीहिः
	सर्वधर्मः	स्वस्य धर्मः स्वधर्मः	षष्ठी-तत्पुरुषः
	परधर्मः	परेषां धर्मः परधर्मः	षष्ठी-तत्पुरुषः
	भयावहः	भयं आवहति इति भयावहः	उपपदम्

पदार्थकोशः

स्वानुष्ठितात् साद्गुण्येन सम्पादिताद् [शा०]। सकलाङ्गसम्पूर्त्या कृतात् सर्वाङ्गसम्पूर्त्या कृतात् [सुबो०]। सर्वाङ्गोपसंहारेण सम्यग् अनुष्ठितात् [चतु०]।

1 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
2 खरि च (८।४।५५)
3 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)

परधर्मात् परस्य धर्म: [पै०]। हिंसादिदोषरहितपरधर्मापेक्षया [चतु०]।
विगुण: विगतगुण: [शा०]। कतिपयाङ्गै रहित: [पै०]। हिंसादिमिश्र: [चतु०]।
स्वधर्म: स्वो धर्म: स्वधर्म: [शा०]। स्वस्य वर्णाश्रमानुरूप्येण ईश्वरेण विहितत्वात् [चतु०]।
श्रेयान् प्रशस्यतर: [शा०/पै०/सुबो०/चतु०]।
स्वधर्मे युद्धादौ प्रवर्त्तमानस्य स्वस्य धर्म: [सुबो०]। युद्धादौ [चतु०]।
निधनम् मरणम् [शा०/सुबो०/चतु०]।
श्रेय: प्रशस्यतरम् [पै०]। श्रेष्ठम्, स्वर्गादिप्रापकत्वात् [सुबो०]।
परधर्म: परस्य [सुबो०]। परस्य धर्मो भैक्षचर्यादि: [चतु०]।
भयावह: नरकादिलक्षणं भयम् आवहति [शा०]। भयम् आवहति [पै०]।
निषिद्धत्वेन नरकप्रापकत्वात् [सुबो०]।

==

❖ *भगवदाविर्भावस्य काल: प्रयोजनं च* ❖

(१५) **यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥ ज्ञानकर्मसन्न्यासयोग: **०४-०७॥**

पदच्छेद: यदा यदा हि धर्मस्य ग्लानि: भवति भारत।
अभ्युत्थानम् अ-धर्मस्य तदा आत्मानम् सृजामि अहम्॥

अन्वय: - भारत यदा यदा धर्मस्य ग्लानि: (च) अधर्मस्य अभ्युत्थानं भवति तदा हि अहम् आत्मानं सृजामि।

पदपरिचय:

मूलम्	**पदपरिचय:**	**मूलम्**	**पदपरिचय:**
भारत	भारत [पुं-सं-एक]	**अभ्युत्थानम्**	अभ्युत्थान [नपुं-प्र-एक]
यदा	यदा [अव्य]	**भवति**	भू [कर्तरि-लट्-प्र-एक-परस्मै]
यदा	यदा [अव्य]	**तदा**	तदा [अव्य]
धर्मस्य	धर्म [पुं-ष-एक]	**हि**	हि [अव्य]
ग्लानि:	ग्लानि [स्त्री-प्र-एक]	**अहम्**	अस्मद् [प्र-एक]
(च)	(च [अव्य])	**आत्मानम्**	आत्मन् [पुं-द्वि-एक]
अधर्मस्य	अधर्म [पुं-ष-एक]	**सृजामि**	सृज् [कर्तरि-लट्-उ-एक-परस्मै]

पदार्थः

मूलम्	**हिन्दी**	**English**
भारत	हे भारत !	Bhārata
यदा	जब	whenever
यदा	जब	wherever
धर्मस्य	धर्म की	of religion
ग्लानिः	हानि	discrepancies
(च)	(और)	and
अधर्मस्य	अधर्म की	of irreligion
अभ्युत्थानम्	वृद्धि	predominance
भवति	होती है,	manifested, becomes
तदा	तब	at that time
हि	ही	certainly
अहम्	मैं	I
आत्मानम्	स्वयं का	Self
सृजामि	सृजन करता हूँ	manifest

भावार्थः

हिन्दी - हे भारत ! जब-जब धर्म की हानि और अधर्म की वृद्धि होती है, तब-तब ही मैं अपने स्वरूप का सृजन करता हूँ अर्थात् साकार रूप से लोगों के सम्मुख प्रकट होता हूँ।

English - Whenever and wherever there is a decline in religious practice, O descendant of Bhārata, and a predominant rise of irreligion at that time I manifest Myself.

सन्धिः -

ग्लानिः+भवति	ग्लानिर्भवति	रेफ-सन्धिः[1]
तदा+आत्मानम्	तदात्मानम्	सवर्णदीर्घ-सन्धिः[2]
सृजामि+अहम्	सृजाम्यहम्	यण्-सन्धिः[3]

1 ससजुषो रुः (८।२।६६)
2 अकः सवर्णे दीर्घः (६।१।१०१)
3 इको यणचि (६।१।७७)

समासः - अधर्मस्य न धर्मः अधर्मः तस्य नञ्-तत्पुरुषः

पदार्थकोशः

भारत अर्जुन भाशब्दितज्ञानरतत्वेन [टि०]।
यदा यस्मिन् काले [पै०]।
धर्मस्य वर्णाश्रमादिलक्षणस्य प्राणिनामभ्युदयनि:श्रेयससाधनस्य [शा०]।
प्राणिनामभ्युदयस्य नि:श्रेयसाधनस्य [पै०]।
ग्लानिः हानि: [शा०/सुबो०]। ह्रास: [चतु०]।
अभ्युत्थानम् उद्भव: [शा०/पै०]। आधिक्यम् [सुबो०]। वृद्धि: [चतु०]।
आत्मानम् आत्मा पूर्णषाड्गुण्य: अंश: उपकारकत्वेन प्रधानभूतो यत्र तदात्मांशं शरीरम् [गीता०]।
सृजामि उत्पत्स्यामि [पै०]। गृह्णाति [गीता०]।

===

❖ *भगवदाविर्भावस्य कालः प्रयोजनं च* ❖

(१६) **परित्राणाय साधूनां विनाशाय च दुष्कृताम्।**
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥ ज्ञानकर्मसन्न्यासयोगः ०४-८॥

पदच्छेदः परित्राणाय साधूनाम् विनाशाय च दुष्कृताम्।
धर्म-संस्थापना-अर्थाय सम्भवामि युगे युगे॥

अन्वयः - (अहम्) साधूनाम् परित्राणाय दुष्कृतां विनाशाय च धर्मसंस्थापनार्थाय युगे युगे सम्भवामि।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
(अहम्)	(अस्मद् [प्र-एक])	**च**	च [अव्य]
साधूनाम्	साधु [पुं-ष-बहु]	**धर्मसंस्थापनार्थाय**	धर्मसंस्थापनार्थ [पुं-च-एक]
परित्राणाय	परित्राण [नपुं-च-एक]	**युगे**	युग [नपुं-स-एक]
दुष्कृताम्	दुष्कृत् [पुं-ष-बहु]	**युगे**	युग [नपुं-स-एक]
विनाशाय	विनाश [पुं-च-एक]	**सम्भवामि**	सम्-भू [कर्तरि-लट्-उ-एक-परस्मै]

पदार्थः

मूलम्	हिन्दी	English
(अहम्)	मैं	I
साधूनाम्	साधु पुरुषों का	of the pious
परित्राणाय	रक्षण करने के लिये	for the deliverance
दुष्कृताम्	पापकर्म करने वालों का	of the miscreants
विनाशाय	विनाश करने के लिये	for the annihilation
च	और	also
धर्मसंस्थापनार्थाय	धर्म की स्थापना हेतु	to reestablish the principles of religion
युगे	युग	millennium
युगे	युग में	after millennium
सम्भवामि	प्रकट होता हूँ।	do appear

भावार्थः

हिन्दी - साधु पुरुषों का रक्षण करने के लिये, पाप-धर्म करने वालों का विनाश करने के लिये और धर्म की अच्छी तरह से स्थापना करने के लिये मैं युग-युग में प्रकट होता हूँ।

English - In order to deliver the pious and to annihilate the miscreants, as well as to reestablish the principles of religion, I advent Myself millennium after millennium.

समासः	दुष्कृताम्	दुष्टं कुर्वन्तीति दुष्कृतः तेषाम्	उपपदम्
	धर्मसंस्थापनार्थाय	धर्मस्य संस्थापना धर्मसंस्थापना	षष्ठी-तत्पुरुषः
		धर्मसंस्थापनायै इदम् धर्मसंस्थापनार्थम् तस्मै	चतुर्थी तत्पुरुषः

पदार्थकोशः

साधूनाम् सन्मार्गस्थानाम् [शा०]। स्वधर्मवर्त्तिनाम् [सुबो०]।

परित्राणाय परिरक्षणाय [शा०]। रक्षणाय [सुबो०]।

दुष्कृताम्	पापकारिणाम् [शा०]। दुष्टं कर्म कुर्वन्ति इति दुष्कृत: तेषाम् [सुबो०]। दुष्टं कर्म कुर्वतां पापिनाम् [चतु०]।
विनाशाय	वधाय [सुबो०]।
धर्मसंस्थापनार्थाय	धर्मस्य सम्यक् स्थापनं तदर्थम् [शा०]। धर्मस्य संस्थापनार्थाय, धर्मं स्थिरीकर्तुम् [सुबो०]।
युगे	प्रतियुगम् [पै०]। तत् तत् अवसरे [सुबो०]।
सम्भवामि	आविर्भवामि [चतु०]।

==

❖ *अकर्मणि कर्म कर्मणि च अकर्म पश्यत: विदुष: प्रशंसा* ❖

(१७) **यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः।**
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः॥ ज्ञानकर्मसन्न्यासयोगः **०४-१९॥**

पदच्छेदः यस्य सर्वे समारम्भाः काम-सङ्कल्प-वर्जिताः।
ज्ञान-अग्नि-दग्ध-कर्माणम् तम् आहुः पण्डितम् बुधाः॥

अन्वयः - यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः (सन्ति) तं ज्ञानाग्निदग्धकर्माणं बुधाः पण्डितम् आहुः।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
यस्य	यद् [पुं-ष-एक]	**तम्**	तद् [पुं-द्वि-एक]
सर्वे	सर्व [पुं-प्र-बहु]	**ज्ञानाग्नि-दग्धकर्माणम्**	ज्ञानाग्निदग्धकर्मन् [पुं-द्वि-एक]
समारम्भाः	समारम्भ [पुं-प्र-बहु]	**बुधाः**	बुध [पुं-प्र-बहु]
कामसङ्कल्प-वर्जिताः	कामसङ्कल्पवर्जित [पुं-प्र-बहु]	**पण्डितम्**	पण्डित [पुं-द्वि-एक]
(सन्ति)	(अस् [कर्तरि-लट्-प्र-बहु-परस्मै])	**आहुः**	ब्रू [कर्तरि-लट्-प्र-बहु-आत्मने]

पदार्थः

मूलम्	हिन्दी	English
यस्य	जिनका	one whose
सर्वे	सम्पूर्ण	all sorts of
समारम्भाः	कर्म	actions
कामसङ्कल्पवर्जिताः	बिना कामना और संकल्प के वर्जित	devoid of desire and determination
(सन्ति)	होता है	are
तम्	उसको	him
ज्ञानाग्निदग्धकर्माणम्	जिसके समस्त कर्म ज्ञानरूप अग्निके द्वारा भस्म हो गये हैं	whose complete karma has been burnt by the fire of perfect knowledge
बुधाः	ज्ञानीजन	wise
पण्डितम्	पण्डित	Paṇḍita (learned)
आहुः	कहते हैं।	declare

भावार्थः

हिन्दी - जिसके सम्पूर्ण शास्त्रसम्मत कर्म बिना कामना और संकल्प के होते हैं तथा जिसके समस्त कर्म ज्ञानरूप अग्नि के द्वारा भस्म हो गये हैं, उस महापुरुष को ज्ञानीजन भी पण्डित कहते हैं।

English - Even the wise call him a Paṇḍita (sage), whose undertaking are all free from desire and thoughts of the world, and whose actions are burnt up by the fire of wisdom.

समासः - कामसङ्कल्पवर्जिताः	कामः च सङ्कल्पः च कामसङ्कल्पौ	इतरेतरयोग-द्वन्द्वः
	कामसङ्कल्पाभ्यां वर्जितः	तृतीया-तत्पुरुषः
	कामसङ्कल्पवर्जितः ते	
ज्ञानाग्निदग्धकर्माणम्	ज्ञानम् एव अग्निः ज्ञानाग्निः	अवधारणपूर्वपद-कर्मधारयः
	ज्ञानाग्निना दग्धः ज्ञानाग्निदग्धः	तृतीया-तत्पुरुषः
	ज्ञानाग्निदग्धं कर्मा यस्य सः	षष्ठ्यर्थ-बहुव्रीहिः
	ज्ञानाग्निदग्धकर्मा तम्	

पदार्थकोशः

यस्य	यथोक्तदर्शिनः [शा०]। विदुषः [चतु०]।
समारम्भाः	सर्वाणि कर्माणि, समारभ्यन्ते इति समारम्भाः [शा०]। सम्यगारभ्यन्ते इति समारम्भाः [सुबो०]। समारभ्यन्ते इति समारम्भाः कर्माणि [चतु०]।
कामसङ्कल्पवर्जिताः	कामैः तत्कारणैः च सङ्कल्पैः वर्जिताः [शा०]। फलसङ्कल्परहिताः [पै०]। काम्यते इति कामः, फलं तत्सङ्कल्पेन वर्जिताः, कामः फलविषयः तदर्थम् इदं कर्म कर्त्तव्यम् इति कर्मविषयः सङ्कल्पः च ताभ्यां वर्जिताः [सुबो०]। कामेन फलेच्छया, सङ्कल्पेन अहमिदं करोमि इति अभिमानेन च वर्जिताः [चतु०]। कामेषु काम्यमानेषु फलेषु सङ्कल्पं विहाय [गीता०]।
तम्	आरूढावस्थायान् [सुबो०]।
ज्ञानाग्निदग्धकर्माणम्	कर्मादौ अकर्मादिदर्शनं ज्ञानं तद् एव अग्निः तेन ज्ञानाग्निना दग्धानि शुभाशुभलक्षणानि कर्माणि यस्य तम् [शा०]। शुद्धचित्ते सति जातेन ज्ञानाग्निना दग्धानि अकर्मतां नीतानि कर्माणि [सुबो०]। ज्ञानाग्निना कर्मादावकर्मादिदर्शनेन दग्धान्यङ्कुरीभावाच्च्यावितानि कर्माणि शुभाशुभानि येन तम् [चतु०]। कर्माणि ज्ञानाग्नौ अनुप्रविश्य दह्यन्ते [गीता०]।
बुधाः	ब्रह्मविदः [शा०/पै०]।
पण्डितम्	पण्डा विलक्षणा बुद्धिः अस्य सञ्जाता इति पण्डिताः पण्डाशब्दितविलक्षण-बुद्धिमन्तं विद्वांसः [टि०]।

==

❖ *ज्ञानिना क्रियमाणस्य कर्मणः ब्रह्मात्मकत्वेन ज्ञानयज्ञसम्पादनम्* ❖

(१८) **ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।**
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना॥ ज्ञानकर्मसन्यासयोगः **०४-२४॥**

पदच्छेदः ब्रह्म अर्पणम् ब्रह्म हविः ब्रह्म-अग्नौ ब्रह्मणा हुतम्।
ब्रह्म एव तेन गन्तव्यम् ब्रह्म-कर्म-समाधिना॥

अन्वयः - अर्पणम् ब्रह्म (अस्ति) हविः ब्रह्म (अस्ति) ब्रह्मणा ब्रह्माग्नौ हुतं तेन ब्रह्मकर्मसमाधिना ब्रह्म एव गन्तव्यम्।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
अर्पणम्	अर्पण [नपुं-प्र-एक]	ब्रह्माग्नौ	ब्रह्माग्नि [पुं-स-एक]
ब्रह्म	ब्रह्मन् [नपुं-प्र-एक]	हुतम्	हुत [नपुं-प्र-एक]
(अस्ति)	(अस् [कर्तरि-लट्-प्र-एक-परस्मै])	तेन	तद् [पुं-तृ-एक]
हविः	हविस् [नपुं-प्र-एक]	ब्रह्मकर्म-समाधिना	ब्रह्मकर्मसमाधि [पुं-तृ-एक]
ब्रह्म	ब्रह्मन् [नपुं-प्र-एक]	ब्रह्म	ब्रह्मन् [नपुं-प्र-एक]
(अस्ति)	(अस् [कर्तरि-लट्-प्र-एक परस्मै])	एव	एव [अव्य]
ब्रह्मणा	ब्रह्मन् [नपुं-तृ-एक]	गन्तव्यम्	गम् [कृत्-प्रत्ययः-तव्यत्-नपुं-प्र-एक]

पदार्थः

मूलम्	हिन्दी	English
अर्पणम्	अर्पण	devotional offering
ब्रह्म	ब्रह्म	the Brahma
(अस्ति)	है	is
हविः	हवन का द्रव्य	oblation
ब्रह्म	ब्रह्म	Brahma
(अस्ति)	है	is
ब्रह्मणा	ब्रह्मरूप कर्ता के द्वारा	by Brahma
ब्रह्माग्नौ	ब्रह्मरूप अग्नि में	in the spiritual fire
हुतम्	आहुति देना	offered
तेन	उस	by him
ब्रह्मकर्मसमाधिना	ब्रह्मकर्म में स्थित रहने वाले योगी द्वारा	by complete absorption in spiritual activities
ब्रह्म	ब्रह्म	Brahma
एव	ही	certainly
गन्तव्यम्	प्राप्त किये जाने योग्य है	to be reached

भावार्थः

हिन्दी - जिस यज्ञ में अर्पण भी ब्रह्म है और हवन किये जाने योग्य द्रव्य भी ब्रह्म हैं तथा ब्रह्मरूप कर्ता के द्वारा ब्रह्मरूप अग्नि में आहुति देना रूप क्रिया भी ब्रह्म है- उस ब्रह्म कर्म में स्थित रहने वाले योगी द्वारा प्राप्त किये जाने योग्य फल भी ब्रह्म ही हैं।

English - In the practice of seeing Brahma everywhere as a form of sacrifice Brahma is the ladle, Brahma, again, is the oblation; Brahma is the fire, Brahma itself the sacrificer, and so Brahma itself constitutes the act of pouring the oblation into the fire. And finally Brahma is the goal to be reached by him who is absorbed in Brahma as the act of such sacrifice.

सन्धिः -	ब्रह्म+अर्पणम्	ब्रह्मार्पणम्	सवर्णदीर्घ-सन्धिः[1]
	हविः+ब्रह्माग्नौ	हविर्ब्रह्माग्नौ	रेफ-सन्धिः[2]
	ब्रह्म+एव	ब्रह्मैव	वृद्धि-सन्धिः[3]

समासः -	ब्रह्माग्नौ	ब्रह्म एव अग्निः ब्रह्माग्निः तस्मिन्	अवधारणपूर्वपद-कर्मधारयः
	ब्रह्मकर्मसमाधिना	ब्रह्म एव कर्म ब्रह्मकर्म	अवधारणपूर्वपद-कर्मधारयः
		ब्रह्मकर्मणि समाधिः यस्य सः	षष्ठ्यर्थ-बहुव्रीहिः
		ब्रह्मकर्मसमाधिः तेन	

पदार्थकोशः

अर्पणम्	येन करणेन [शा०]। अर्प्यते हूयते अनेन इति [पै०]।
	अर्प्यते अनेन इति अर्पणम् [सुबो०]। अर्पणसाधनम् [चतु०]।
ब्रह्म	परमात्मा [पै०]।
	ब्रह्मणि परमबोधे प्रशान्ते अग्नौ, ब्रह्मस्वभावदेवतोद्देशेन [गीता०]।
हविः	अग्नौ [शा०]। हूयत इति हविः चरुपुरोडाशादिकम् [पै०]। घृतादिकम् [सुबो०]।

---

1 अकः सवर्णे दीर्घः (६।१।१०१)

2 ससजुषो रुः (८।२।६६)

3 वृद्धिरेचि (६।१।८८)

ब्रह्म	समग्रं विश्वात्मकम् [गीता०]।
ब्रह्मणा	येन केनचित् कर्मणा [गीता०]।
ब्रह्माग्नौ	ब्रह्म एव अग्नि: तत्र [पै०/सुबो०]।
हुतम्	हवनक्रिया [शा०]। प्रक्षिप्तम् [पै०]। होम: अग्नि: च [सुबो०]। हवनक्रिया, तर्पितं देवब्राह्मणादि वा [चतु०]। तद्दीप्त्यभिवृद्धये समर्पितम् [गीता०]।
तेन	पुरुषेण [पै०]।
ब्रह्मकर्मसमाधिना	ब्रह्म एव कर्म ब्रह्मकर्म तस्मिन् समाधि: यस्य स: ब्रह्मकर्मसमाधि: तेन ब्रह्मकर्मसमाधिना [शा०]। ब्रह्मणि एवं कर्मात्मके समाधि: चित्तैकाग्र्यं यस्य तेन [सुबो०]। ब्रह्मकर्मैव समाधि: यस्य योगिन: तेन [गीता०]।
एव	एवशब्द: सर्वत्रानुषञ्जनीय: [चतु०]।
गन्तव्यम्	प्राप्यम् [सुबो०]। प्राप्तव्यम् [चतु०]। ज्ञेयम् [गीता०]।

==

❖ *सर्वयज्ञेभ्य: ज्ञानयज्ञस्य वैशिष्ट्यम्* ❖

(१९) **श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप।**
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते॥ ज्ञानकर्मसन्न्यासयोगः ०४-३३॥

पदच्छेद: श्रेयान् द्रव्यमयात् यज्ञात् ज्ञान-यज्ञः परन्तप।
सर्वम् कर्म अखिलम् पार्थ ज्ञाने परिसमाप्यते॥

अन्वय: - परन्तप पार्थ द्रव्यमयात् यज्ञात् ज्ञानयज्ञः श्रेयान् (अस्ति) अखिलं सर्वं कर्म ज्ञाने परिसमाप्यते।

पदपरिचय:

मूलम्	पदपरिचय:	मूलम्	पदपरिचय:
परन्तप	परन्तप [पुं-सं-एक]	**(अस्ति)**	(अस् [कर्तरि-लट्-प्र-एक-परस्मै])
पार्थ	पार्थ [पुं-सं-एक]	**अखिलम्**	अखिल [नपुं-प्र-एक]
द्रव्यमयात्	द्रव्यमय [पुं-प-एक]	**सर्वम्**	सर्व [नपुं-प्र-एक]
यज्ञात्	यज्ञ [पुं-प-एक]	**कर्म**	कर्मन् [नपुं-प्र-एक]
ज्ञानयज्ञः	ज्ञानयज्ञ [पुं-प्र-एक]	**ज्ञाने**	ज्ञान [नपुं-स-एक]
श्रेयान्	श्रेयस् [पुं-प्र-एक]	**परिसमाप्यते**	परि-सम्-आप् [कर्मणि-लट्-प्र-एक;आत्मने]

पदपरिचयः

मूलम्	हिन्दी	English
परन्तप	हे परंतप अर्जुन!	O chastiser of the enemy
पार्थ	पार्थ	O Pārtha
द्रव्यमयात्	द्रव्यमय	material possessions
यज्ञात्	यज्ञ की अपेक्षा	from sacrifice
ज्ञानयज्ञः	ज्ञानयज्ञ	sacrifice in knowledge
श्रेयान्	अत्यन्त श्रेष्ठ	greater
(अस्ति)	है	is
अखिलम्	यावन्मात्र	in totality
सर्वम्	सम्पूर्ण	all
कर्म	कर्म	activities
ज्ञाने	ज्ञानमें	in knowledge
परिसमाप्यते	समाप्त हो जाते हैं।	ends in

भावार्थः

हिन्दी - हे परन्तप अर्जुन ! द्रव्यमय यज्ञ की अपेक्षा ज्ञान यज्ञ अत्यन्त श्रेष्ठ है, तथा यावन्मात्र सम्पूर्ण कर्म ज्ञान में समाप्त हो जाते हैं।

English - O Arjuna, sacrifice through knowledge is superior to sacrifice performed with material things. For all actions without exception culminate in knowledge, O Pārtha.

सन्धिः -

द्रव्यमयात्+यज्ञात्	द्रव्यमयाद्यज्ञात्	जश्त्व-सन्धिः[1]
यज्ञात्+ज्ञानयज्ञः	यज्ञाज्ज्ञानयज्ञः	जश्त्व >श्चुत्व-सन्धिः[2]
कर्म+अखिलम्	कर्माखिलम्	सवर्णदीर्घ-सन्धिः[3]

---

1 झलां जशोऽन्ते (८।२।३९)
2 झलां जशोऽन्ते (८।२।३९)>स्तोः श्चुना श्चुः (८।४।४०)
3 अकः सवर्णे दीर्घः (६।१।१०१)

समासः - ज्ञानयज्ञः — ज्ञानमेव यज्ञः ज्ञानयज्ञः — अवधारणपूर्वपद-कर्मधारयः
अखिलम् — न खिलम् अखिलम् — नञ्-तत्पुरुषः

पदार्थकोशः

परन्तप परान् शत्रून् तपतीति परन्तपः अर्जुनः [टि०]।
द्रव्यमयात् द्रव्यसाधनसाध्यात् [शा०]। अनात्मव्यापारजन्यात् [सुबो०]।
बाह्यमाभ्यन्तरं च देहेन्द्रियादितत्साध्यात् द्रव्यमयात् [चतु०]। मयट् प्रत्ययः [गीता०]।
यज्ञात् दैवादियज्ञात् [सुबो०]।
ज्ञानयज्ञः ज्ञाननिर्वृत्तो यज्ञः [पै०]। निःशेषवाङ्मनःकायप्रवृत्त्युपरमात्मकः [चतु०]।
ज्ञानदीपितो यज्ञः [गीता०]।
श्रेयान् श्रेष्ठः [सुबो०]। प्रशस्ततरः, ईयसुप्रत्ययः [चतु०]।
अखिलम् अप्रतिबद्धम् [शा०]। फलसहितम् [सुबो०]। सर्वाङ्गोपसंहारयुक्तम् [चतु०]।
सर्वम् समस्तम् [टि०]।
कर्म कर्मफलम् [चतु०]।
ज्ञाने मोक्षसाधने [शा०]। परमात्मसम्बोधे [पै०]।
परिसमाप्यते अन्तर्भवति [शा०]। विलीयते, विलयनं गच्छति [पै०]। अन्तर्भवति [सुबो०/चतु०]।

===

❖ ***गुरुप्रणिपातादिना यथोक्तज्ञानस्य प्राप्तिकथनम्। ज्ञानप्राप्त्युपायः तत्फलं च*** ❖

(२०) **तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥ ज्ञानकर्मसन्न्यासयोगः **०४-३४॥**

पदच्छेदः तत् विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानम् ज्ञानिनः तत्त्व-दर्शिनः॥

अन्वयः - तत् प्रणिपातेन परिप्रश्नेन (च) सेवया विद्धि ते तत्त्वदर्शिनः ज्ञानिनः ज्ञानम् उपदेक्ष्यन्ति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
तत्	तद् [नपुं-प्र-एक]	**ते**	तद् [पुं-प्र-बहु]
प्रणिपातेन	प्रणिपात [पुं-तृ-एक]	**तत्त्वदर्शिनः**	तत्त्वदर्शिन् [पुं-ष-एक]

परिप्रश्नेन	परिप्रश्न [पुं-तृ-एक]	**ज्ञानिनः**	ज्ञानिन् [पुं-प्र-एक]
(च)	(च [अव्य])	**ज्ञानम्**	ज्ञान [नपुं-द्वि-एक]
सेवया	सेवा [स्त्री-तृ-एक]	**उपदेक्ष्यन्ति**	उप-दिश् [कर्तरि-लृट्-प्र-बहु-उभयपदी]
विद्धि	विद् [कर्तरि-लोट्-म-एक-परस्मै]		

पदार्थः

मूलम्	**हिन्दी**	**English**
तत्	उस ज्ञान को	that knowledge
प्रणिपातेन	भली भाँति प्रणाम करने से	by respectful obeisance
परिप्रश्नेन	सरलतापूर्वक प्रश्न करने से	by submissive inquiries
(च)	और	and
सेवया	सेवा करने से	by the rendering of service
विद्धि	समझ	try to understand
ते	वे	unto you
तत्त्वदर्शिनः	तत्त्व को जानने वाले	the seers who experienced the truth
ज्ञानिनः	ज्ञानी महात्मा	the self-realised
ज्ञानम्	तत्त्वज्ञान का	knowledge
उपदेक्ष्यन्ति	उपदेश करेंगे	initiate

भावार्थः

हिन्दी - उस ज्ञान को तुम तत्त्वदर्शी ज्ञानियों के पास जाकर समझो, उनको भली-भाँति प्रणाम करने से, उनकी सेवा करने से और सरलतापूर्वक प्रश्न करने से, वे तत्त्व को भली-भाँति जानने वाले ज्ञानी महात्मा तुमको उस तत्त्व ज्ञान का उपदेश करेंगे।

English - Understand the true nature of that knowledge by approaching illumined soul. If you respectfully prostrate at their feet, render them service, and question them with an open and guileless heart, those wise seers of Truth will instruct you in that knowledge.

सन्धिः -	तत्+विद्धि	तद्विद्धि	जश्त्व-सन्धिः[1]
	ज्ञानिनः+तत्त्वदर्शिनः	ज्ञानिनस्तत्त्वदर्शिनः	सत्व-सन्धिः[2]

समासः -	तत्त्वदर्शिनः	तत्त्वं दर्शयन्ति इति	उपपदम्

पदार्थकोशः

तत् ज्ञानरूपम् ब्रह्म [पै०]। ज्ञानम् [सुबो०/गीता०]।

प्रणिपातेन प्रकर्षेण नीचैः पतनं प्रणिपातः दीर्घनमस्कारः तेन [शा०]। प्रकर्षेण नीचैः दण्डवत्पतनं प्रणिपातो नमस्कारविशेषः तेन [पै०]। दण्डवत् नमस्कारेण [सुबो०]। भक्त्या [गीता०]।

परिप्रश्नेन परितः सर्वतो अवलोक्य गुरोश्चित्तप्रसादावगत्या प्रश्नः तेन [पै०]। ऊहापोहतर्कवितर्कादिभिः [गीता०]।

सेवया गुरुशुश्रूषया [शा०]। इच्छानुवर्तनेन [पै०]। शुश्रूषया [सुबो०]। अभ्यासेन [गीता०]।

विद्धि विजानीहि [शा०/पै०]। प्राप्नुहि [सुबो०]। जानीहि [गीता०]।

ते तव [पै०]। तुभ्यम् [सुबो०]।

तत्त्वदर्शिनः साक्षात्कृतपरमार्थाः [पै०]। अपरोक्षानुभवसम्पन्नाः [सुबो०]। अनुभववन्तः [चतु०]। तत्त्वं दर्शयन्तीति [गीता०]।

ज्ञानिनः ज्ञानवन्तः [पै०]। शास्त्रज्ञाः [सुबो०]। ग्रन्थज्ञाः [चतु०]।

ज्ञानम् परमार्थसम्बोधनस्वरूपं ब्रह्म [पै०]। ब्रह्म [चतु०]।

उपदेक्ष्यन्ति कथयिष्यन्ति [शा०]। उपदेशेन सम्पादयिष्यन्ति [सुबो०]। उप समीपे देक्ष्यन्ति प्रापयिष्यन्ति [गीता०]।

===

❖ *सर्वयज्ञेभ्यः ज्ञानयज्ञस्य वैशिष्ट्यम्* ❖

(२१) **यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।**
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥ ज्ञानकर्मसन्न्यासयोगः **०४-३७॥**

पदच्छेदः यथा एधांसि समिद्धः अग्निः भस्मसात् कुरुते अर्जुन।
ज्ञान-अग्निः सर्व-कर्माणि भस्मसात् कुरुते तथा॥

अन्वयः - अर्जुन यथा समिद्धः अग्निः एधांसि भस्मसात् कुरुते तथा ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते।

---

1 झलां जशोऽन्ते (८।२।३९)
2 विसर्जनीयस्य सः (८।३।३४)

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
अर्जुन	अर्जुन [पुं-सं-एक]	**कुरुते**	कृ [कर्तरि-लट्-प्र-एक-आत्मने]
यथा	यथा [अव्य]	**तथा**	तथा [अव्य]
समिद्धः	समिद्ध [पुं-प्र-एक]	**ज्ञानाग्निः**	ज्ञानाग्निः [पुं-प्र-एक]
अग्निः	अग्नि [पुं-प्र-एक]	**सर्वकर्माणि**	सर्वकर्मन् [नपुं-द्वि-बहु]
एधांसि	एधस् [नपुं-द्वि-बहु]	**भस्मसात्**	भस्मसात् [अव्य]
भस्मसात्	भस्मसात् [अव्य]	**कुरुते**	कृ [कर्तरि-लट्-प्र-एक-आत्मने]

पदार्थः

मूलम्	हिन्दी	English
अर्जुन	हे अर्जुन !	O Arjuna
यथा	जैसे	just as
समिद्धः	प्रज्वलित	blazing
अग्निः	अग्नि	fire
एधांसि	ईन्धनों को	firewood
भस्मसात्	भस्म	into ashes
कुरुते	कर देता है,	so does
तथा	वैसे ही	similarly
ज्ञानाग्निः	ज्ञानरूप अग्नि	the fire of knowledge
सर्वकर्माणि	सम्पूर्ण कर्मों को	material activities
भस्मसात्	भस्म	into ashes
कुरुते	कर देता है।	so does

भावार्थः

हिन्दी - क्योंकि हे अर्जुन ! जैसे प्रज्वलित अग्नि ईन्धनों को भस्ममय कर देता है, वैसे ही ज्ञानरूप अग्नि सम्पूर्ण कर्मों को भस्ममय कर देता है।

English - For as the blazing fire turns the fuel to ashes, Arjuna, even so the fire of knowledge turns all actions to ashes.

सन्धिः -	यथा+एधांसि	यथैधांसि	वृद्धि-सन्धिः[1]
	समिद्धः+अग्निः	समिद्धोऽग्निः	रुत्व >उत्व>गुण>पूर्वरुप-सन्धिः[2]
	अग्निः+भस्मसात्	अग्निर्भस्मसात्	रेफ-सन्धिः[3]
	भस्मसात्+कुरुते	भस्मसात्कुरुते	चर्त्व-सन्धिः[4]
	कुरुते+अर्जुन	कुरुतेऽर्जुन	पूर्वरूप-सन्धिः[5]

समासः -	ज्ञानाग्निः	ज्ञानम् एव अग्निः ज्ञानाग्निः	अवधारणपूर्वपद-कर्मधारयः
	सर्व-कर्माणि	सर्वम् तत् कर्म च सर्वकर्म तानि	कर्मधारयः

पदार्थकोशः

यथा	अयं दृष्टान्तः [पै०]।
समिद्धः	सम्यक् इद्धः दीप्तः [शा०]। ज्वलितः [पै०]। प्रदीप्तः [सुबो०]।
एधांसि	काष्ठानि [शा०/पै०/सुबो०/चतु०]।
भस्मसात्	भस्मीभावम् [शा०/सुबो०]।
कुरुते	नयति [सुबो०]।
ज्ञानाग्निः	ज्ञानम् एव अग्निः ज्ञानाग्निः [शा०/पै०]। आत्मज्ञानरूपोऽग्निः [सुबो०]।
सर्वकर्माणि	नित्यनैमित्तिककाम्यप्रतिषिद्धरूपाणि [पै०]।
	प्रारब्धकर्मव्यतिरिक्तानि सर्वाणि कर्माणि [सुबो०]। प्रारब्धात् अन्यानि [चतु०]।
कुरुते	निर्बीजीकरोति [शा०]। भस्मीकरोति [सुबो०]।

===

❖ *ज्ञानमहत्त्वकथनम्* ❖

(२२) **न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।**
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥ ज्ञानकर्मसन्यासयोगः **०४-३८॥**

---

1 वृद्धिरेचि (६।१।८८)
2 ससजुषो रुः (८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)>
आद् गुणः (६।१।८७)>एङः पदान्तादति (६।१।१०९)
3 ससजुषो रुः (८।२।६६)
4 खरि च (८।४।५५)
5 एङः पदान्तादति (६।१।१०९)

पदच्छेदः न हि ज्ञानेन सदृशम् पवित्रम् इह विद्यते।
तत् स्वयम् योग-संसिद्धः कालेन आत्मनि विन्दति॥

अन्वयः - इह ज्ञानेन सदृशम् पवित्रं न हि विद्यते तत् कालेन योगसंसिद्धः स्वयम् आत्मनि विन्दति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
इह	इह [अव्य]	तत्	तद् [नपुं-द्वि-एक]
ज्ञानेन	ज्ञान [नपुं-तृ-एक]	कालेन	काल [पुं-तृ-एक]
सदृशम्	सदृश [नपुं-प्र-एक]	योगसंसिद्धः	योगसंसिद्ध [पुं-प्र-एक]
पवित्रम्	पवित्र [पुं-द्वि-एक]	स्वयम्	स्वयम् [अव्य]
न	न [अव्य]	आत्मनि	आत्मन् [पुं-स-एक]
हि	हि [अव्य]	विन्दति	विद् [कर्तरि-लट्-प्र-एक-परस्मै]
विद्यते	विद् [कर्तरि-लट्-प्र-एक-आत्मने]		

पदार्थः

मूलम्	हिन्दी	English
इह	यहाँ	here
ज्ञानेन	ज्ञान के	knowledge
सदृशम्	समान	in comparison
पवित्रम्	पवित्र करने वाला	sanctified
न	नहीं	never
हि	निःसन्देह	certainly
विद्यते	है	exists
तत्	उसको	that
कालेन	काल से	in course of time
योगसंसिद्धः	कर्मयोग के द्वारा शुद्धान्तःकरण	matured in devotion
स्वयम्	स्वयं	himself
आत्मनि	आत्मा में	in himself
विन्दति	पहुँचता है।	enjoys

भावार्थः

हिन्दी - इस संसार में ज्ञान के समान पवित्र करने वाला नि:संदेह कुछ भी नहीं है। उस ज्ञान को कितने ही काल से कर्मयोग के द्वारा शुद्धान्त:करण हुआ मनुष्य स्वयं ही आत्मा में प्राप्त कर लेता है।

English - On earth there is no purifier as great as knowledge, he who has attained purity of heart through a prolonged practice of Karmayoga automatically sees the light of truth in the self in course of time.

सन्धिः -	तत्+स्वयम्	तत्स्वयम्	चर्त्व-सन्धिः[1]
	कालेन+आत्मनि	कालेनात्मनि	सवर्णदीर्घ-सन्धिः[2]

समासः -	योगसंसिद्धः	सम्यक् सिद्धः संसिद्धः,	प्रादि तत्पुरुषः
		योगेन संसिद्धः योगसंसिद्धः	तृतीया-तत्पुरुषः

पदार्थकोशः

इह	लोके [पै०]। तपोयोगादिषु मध्ये [सुबो०]।
ज्ञानेन	तत्त्वावबोधेन [पै०]।
सदृशम्	तुल्यम् [शा०]। ज्ञानतुल्यम् [सुबो०]।
पवित्रम्	पावनं शुद्धिकरम् [शा०]। पावनम् [पै०]। शुद्धकरम् [सुबो०]।
हि	प्रसिद्धम् वेदशास्त्रादिषु प्रसिद्धम् [टि०]।
तत्	ज्ञानम् [पै०]।
कालेन	परिपाकेण [पै०]। महता [सुबो०]। चिरप्रयत्नसाध्यत्वम् [चतु०]।
योगसंसिद्धः	योगेन कर्मयोगेन समाधियोगेन च संसिद्धः संस्कृतः योग्यताम् आपन्नः मुमुक्षुः [शा०]। योगानुष्ठानेन संस्कृतान्त:करणः [पै०]। कर्मयोगेन संसिद्धः योग्यतां प्राप्तः [सुबो०]। योगेन निष्कामकर्मानुष्ठानेन समाधियोगेन वा संसिद्धः संस्कृतो योग्यताम् आपन्नः[चतु०]।
स्वयम्	अनायासेन [सुबो०]।
आत्मनि	अन्त:करणे [पै०]। विषये [सुबो०]।
विन्दति	लभते [शा०/पै०/सुबो०]।

1 खरि च (८।४।५५)
2 अकः सवर्णे दीर्घः (६।१।१०१)

❖ ज्ञानप्राप्तिं प्रत्युपायं प्रदर्श्य ज्ञानहेतौ कर्मयोगे अर्जुनप्रवर्तनम् ❖

(२३) **श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।**
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥ ज्ञानकर्मसन्यासयोगः ०४-३९॥

पदच्छेदः श्रद्धावान् लभते ज्ञानम् तत्-परः संयत-इन्द्रियः।
ज्ञानम् लब्ध्वा पराम् शान्तिम् अ-चिरेण अधिगच्छति॥

अन्वयः - संयतेन्द्रियः तत्परः श्रद्धावान् ज्ञानं लभते ज्ञानं लब्ध्वा अचिरेण परां शान्तिम् अधिगच्छति।

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
संयतेन्द्रियः	संयत-इन्द्रिय [पुं-प्र-एक]	**लब्ध्वा**	लभ् [कृत्-प्रत्ययः-क्त्वा]
तत्परः	तत्पर [पुं-प्र-एक]	**अचिरेण**	अचिर [नपुं-तृ-एक]
श्रद्धावान्	श्रद्धावत् [पुं-प्र-एक]	**पराम्**	परा [स्त्री-द्वि-एक]
ज्ञानम्	ज्ञान [नपुं-द्वि-एक]	**शान्तिम्**	शान्ति [स्त्री-द्वि-एक]
लभते	लभ् [कर्तरि-लट्-प्र-एक-आत्मने]	**अधिगच्छति**	अधि-गम् [कर्तरि-लट्-प्र-एक-परस्मै]
ज्ञानम्	ज्ञान [नपुं-द्वि-एक]		

पदार्थः

मूलम्	**हिन्दी**	**English**
संयतेन्द्रियः	जितेन्द्रिय	controlled senses
तत्परः	साधन परायण	very much attached to it
श्रद्धावान्	श्रद्धावान्	the faithful
ज्ञानम्	ज्ञान को	knowledge
लभते	प्राप्त करता है	achieves
ज्ञानम्	ज्ञान को	knowledge
लब्ध्वा	प्राप्त कर	having achieved
अचिरेण	शीघ्र ही	very soon
पराम्	परम	transcendental
शान्तिम्	शान्ति को	peace
अधिगच्छति	प्राप्त हो जाता है।	attains

भावार्थः

हिन्दी - जितेन्द्रिय, साधनपरायण और श्रद्धावान् मनुष्य ज्ञान को प्राप्त करता है तथा ज्ञान को प्राप्त कर वह अविलम्ब ही भगवत्प्राप्ति रूप परम शान्ति को प्राप्त कर लेता है।

English - He who has mastered his senses, is exclusively devoted to his practice and is full of faith, attains knowledge; having had the revelation to truth, he immediately attains supreme peace.

सन्धिः -	श्रद्धावान्+लभते	श्रद्धावाँल्लभते	परसवर्ण-सन्धिः[1]
	अचिरेण+अधिगच्छति	अचिरेणाधिगच्छति	सवर्णदीर्घ-सन्धिः[2]

समासः -	संयतेन्द्रियः	संयतम् इन्द्रियम् यस्य सः संयतेन्द्रियः	षष्ठ्यर्थ-बहुव्रीहिः
	तत्परः	तत् परं यस्य सः तत्परः	षष्ठ्यर्थ-बहुव्रीहिः

पदार्थकोशः

संयतेन्द्रियः	संयतानि विषयेभ्यो निवर्तितानि यस्य इन्द्रियाणि स संयतेन्द्रियः [शा०]। संयाति निरुद्धानि इन्द्रियाणि चक्षुरादीनि येन सः [पै०]।
तत्परः	गुरूपासनादौ अभियुक्तः [शा०]। तदेव परं प्रधानं यस्य सः, ज्ञाननिष्ठः [पै०]। तदेकनिष्ठः [सुबो०]।
श्रद्धावान्	श्रद्धालुः [शा०]। श्रद्दधानः [पै०]। गुरूपदिष्टेऽर्थे आस्तिक्यबुद्धिमान् [सुबो०]।
ज्ञानम्	एकत्वावबोधम् [पै०]।
लभते	प्राप्नोति [पै०]।
लब्ध्वा	प्राप्य [पै०]। ज्ञानलाभानन्तरम् [सुबो०]।
अचिरेण	क्षिप्रम् [शा०]। अल्पकालेन [पै०]।
पराम्	मोक्षाख्याम् [शा०]। मोक्षलक्षणाम् [पै०]।
शान्तिम्	उपरतिम् [शा०]। मोक्षम् [सुबो०]। विदेहकैवल्यम् [चतु०]।
अधिगच्छति	प्राप्नोति [सुबो०]।

==

1 तोर्लि (८।४।६०)

2 अकः सवर्णे दीर्घः (६।१।१०१)

❖ *सम्यग्दर्शनप्राप्त्यर्थं कर्म कुर्वतः अपि योगिनः सकारणा कर्मालिप्तता* ❖

(२४) **ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।**
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥ कर्मसन्यासयोगः ०५-१०॥

पदच्छेदः ब्रह्मणि आधाय कर्माणि सङ्गम् त्यक्त्वा करोति यः।
लिप्यते न सः पापेन पद्म-पत्रम् इव अम्भसा॥

अन्वयः - यः कर्माणि ब्रह्मणि आधाय सङ्गं त्यक्त्वा करोति सः अम्भसा पद्मपत्रम् इव पापेन न लिप्यते।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
यः	यद् [पुं-प्र-एक]	**सः**	तद् [पुं-प्र-एक]
कर्माणि	कर्मन् [नपुं-द्वि-बहु]	**अम्भसा**	अम्भस् [नपुं-तृ-एक]
ब्रह्मणि	ब्रह्मन् [नपुं-स-एक]	**पद्मपत्रम्**	पद्मपत्र [नपुं-द्वि-एक]
आधाय	आङ्-धा [कृत्-प्रत्ययः-ल्यप्]	**इव**	इव [अव्य]
सङ्गम्	सङ्ग [पुं-द्वि-एक]	**पापेन**	पाप [नपुं-तृ-एक]
त्यक्त्वा	त्यज् [कृत्-प्रत्ययः-क्त्वा]	**न**	न [अव्य]
करोति	कृ [कर्तरि-लट्-प्र-एक-परस्मै]	**लिप्यते**	लिप् [कर्मणि-लट्-प्र-एक-आत्मने]

पदार्थः

मूलम्	हिन्दी	English
यः	जो	who
कर्माणि	कर्मों को	actions
ब्रह्मणि	परमात्मा में	in Brahma
आधाय	अर्पण करके	surrendering unto
सङ्गम्	आसक्ति को	attachment
त्यक्त्वा	त्यागकर	giving up
करोति	करता है,	performs
सः	वह	he
अम्भसा	जल से	in the water
पद्मपत्रम्	कमल के पत्ते की	lotus leaf

इव	भाँति	like
पापेन	पाप के द्वारा	by sin
न	नहीं	never
लिप्यते	लिप्त होता।	is affected

भावार्थः

हिन्दी - जो पुरुष सब कर्मों को ब्रह्म में अर्पण करके और आसक्ति को त्याग कर कर्म करता है, वह पुरुष जल से कमल के पत्ते की भाँति पाप के द्वारा लिप्त नहीं होता है।

English - He who acts offering all actions to Brahma, and shaking off attachment, remains untouched by sin, as the lotus leaf by water.

सन्धिः -	ब्रह्मणि+आधाय	ब्रह्मण्याधाय	यण्-सन्धिः[1]
	सः+पापेन	स पापेन	विसर्गलोप-सन्धिः[2]
	इव+अम्भसा	इवाम्भसा	सवर्णदीर्घ-सन्धिः[3]

समासः -	पद्मपत्रम्	पद्मस्य पत्रम् पद्मपत्रम्	षष्ठी-तत्पुरुषः

पदार्थकोशः

ब्रह्मणि	ईश्वरे [शा०/पै०]। परमेश्वरे [सुबो०]। सर्वान्तर्यामिणि [चतु०]।
आधाय	निक्षिप्य [शा०]। समर्प्य [सुबो०]।
सङ्गम्	फलेच्छाम् [टि०]।
अम्भसा	उदकेन [शा०/पै०]।
पापेन	बन्धहेतुतया पापिष्ठेन पुण्यपापात्मकेन [सुबो०]।
लिप्यते	सम्बध्यते [शा०/पै०]।

===

1 इको यणचि (६।१।७७)
2 एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६।१।१३२)
3 अकः सवर्णे दीर्घः (६।१।१०१)

❖ *ज्ञानिनो ब्राह्मणादौ सर्वत्र समदर्शित्ववर्णनम्। ज्ञानिनां समदर्शित्वं जीवन्मुक्तित्वं च* ❖

(२५) **विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।**
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥ कर्मसन्न्यासयोगः **०५-१८॥**

पदच्छेदः विद्या-विनय-सम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि च एव श्वपाके च पण्डिताः सम-दर्शिनः॥

अन्वयः - पण्डिताः विद्याविनयसम्पन्ने ब्राह्मणे च गवि हस्तिनि शुनि च श्वपाके समदर्शिनः एव (भवन्ति)।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
पण्डिताः	पण्डित [पुं-प्र-बहु]	**शुनि**	श्वन् [पुं-स-एक]
विद्याविनय-सम्पन्ने	विद्याविनयसम्पन्न [पुं-स-एक]	**च**	च [अव्य]
ब्राह्मणे	ब्राह्मण [पुं-स-एक]	**श्वपाके**	श्वपाक [पुं-स-एक]
च	च [अव्य]	**समदर्शिनः**	समदर्शिन् [पुं-प्र-बहु]
गवि	गो [पुं-स-एक]	**एव**	एव [अव्य]
हस्तिनि	हस्तिन् [पुं-स-एक]	**(भवन्ति)**	(भू [कर्तरि-लट्-प्र-बहु-परस्मै])

पदार्थः

मूलम्	हिन्दी	English
पण्डिताः	ज्ञानीजन	Paṇḍitas
विद्याविनयसम्पन्ने	विद्या और विनययुक्त	fully equipped with education and politeness
ब्राह्मणे	ब्राह्मण में	in the brāhmaṇa
च	तथा	respectively
गवि	गौ	in the cow
हस्तिनि	हाथी	in the elephant
शुनि	कुत्ते	in the dog
च	और	and

श्वपाके	चाण्डाल में	in the outcaste (Cāṇḍāla)
समदर्शिनः	समदर्शी	do see with equal vision
एव	ही	certainly
(भवन्ति)	(होते हैं)	becomes

भावार्थः

हिन्दी - वे ज्ञानीजन विद्या और विनययुक्त ब्राह्मण में तथा गौ, हाथी, कुत्ते और चाण्डाल में भी समान रूप से देखने वाले ही होते हैं।

English - The Paṇḍitas look with the same eye on a brāhmaṇa endowed with learning and culture, a cow, an elephant, a dog, and an outcaste (Cāṇḍāla) too.

सन्धिः - च+एव चैव वृद्धि-सन्धिः[1]

समासः -	विद्याविनयसम्पन्ने	विद्या च विनयः च विद्याविनयौ,	इतरेतरयोगद्वन्द्वः
		विद्याविनयाभ्यां सम्पन्नः	तृतीया तत्पुरुषः
		विद्याविनयसम्पन्नः तस्मिन्	
	समदर्शिनः	समं पश्यन्तीति समदर्शी ते	उपपदम्

पदार्थकोशः

पण्डिताः ज्ञानिनः [सुबो०]।

विद्याविनयसम्पन्ने विद्या च विनयः च विद्याविनयौ, विद्या आत्मनो बोधो विनयः उपशमः, ताभ्यां विद्याविनयाभ्यां सम्पन्नो विद्याविनयसम्पन्नः विद्वान् विनीतः च [शा०]। विद्याविनयाभ्यां युक्ते [सुबो०]।

ब्राह्मणे उत्तमसंस्कारवति सात्त्विके [पै०]।

गवि मध्यमायां राजस्यां संस्कारहीनायाम् [पै०]।

हस्तिनि अत्यन्तमेव केवलतामसे [पै०]।

1 वृद्धिरेचि (६।१।८८)

शुनि	परमाधमे [टि०]।
च	इति जातितो वैषम्यं दर्शितम् [सुबो०]।
श्वपाके	शुनो यः पचति तस्मिन् श्वपचे च इति [सुबो०]।
समदर्शिनः	सममेव अविक्रियं ब्रह्म द्रष्टुं शीलं येषां ते पण्डिताः [पै०]। समं ब्रह्मैव द्रष्टुं शीलं येषां ते [सुबो०]। समं ब्रह्मैव सद्रूपेण स्फुरणरूपेण च भासमानं द्रष्टुं शीलं येषां ते [चतु०]।

==

❖ *योगारूढस्य मनोनिग्रह एव साधनं लक्षणं च* ❖

(२६) **उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।**
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥ आत्मसंयमयोगः **०६-०५॥**

पदच्छेदः उद्धरेत् आत्मना आत्मानम् न आत्मानम् अवसादयेत्।
आत्मा एव हि आत्मनः बन्धुः आत्मा एव रिपुः आत्मनः॥

अन्वयः - आत्मना आत्मानम् उद्धरेत् आत्मानं न अवसादयेत् हि आत्मा एव आत्मनः बन्धुः (अस्ति) आत्मा एव आत्मनः रिपुः (अस्ति)।

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
आत्मना	आत्मन् [पुं-तृ-एक]	**आत्मनः**	आत्मन् [पुं-ष-एक]
आत्मानम्	आत्मन् [पुं-द्वि-एक]	**बन्धुः**	बन्धु [पुं-प्र-एक]
उद्धरेत्	उद्-हृ [कर्तरि-विधिलिङ्-प्र-एक-परस्मै]	**एव**	एव [अव्य]
आत्मानम्	आत्मन् [पुं-द्वि-एक]	**आत्मा**	आत्मन् [पुं-प्र-एक]
न	न [अव्य]	**एव**	एव [अव्य]
अवसादयेत्	अव-सद्-णिच् [कर्तरि-विधिलिङ्-प्र-एक-परस्मै]	**आत्मनः**	आत्मन् [पुं-ष-एक]
हि	हि [अव्य]	**रिपुः**	रिपु [पुं-प्र-एक]
आत्मा	आत्मन् [पुं-प्र-एक]		

पदार्थः

मूलम्	हिन्दी	English
आत्मना	स्वयं	by the Self
आत्मानम्	अपना	the Self
उद्धरेत्	उद्धार करे	must deliver
आत्मानम्	अपने को	the Self
न	न	never
अवसादयेत्	अवसाद में डाले	put into degradation
हि	क्योंकि	indeed
आत्मा	स्वयं	Self
एव	ही	certainly
आत्मनः	अपना	of the Self
बन्धुः	मित्र	friend
(अस्ति)	(है)	is
आत्मा	स्वयं	Self
एव	ही	certainly
आत्मनः	अपना	of the Self
रिपुः	शत्रु	enemy
(अस्ति)	(है)	is

भावार्थः

हिन्दी - स्वयं ही अपना संसार समुद्र से उद्धार करें और स्वयं को अधोगति में न डाले, क्योंकि यह मनुष्य स्वयं ही तो अपना मित्र है और स्वयं ही अपना शत्रु है।

English - One should uplift oneself by one's own efforts and should not degrade oneself; for one's own self is one's friend, and one's own self is one's enemy.

सन्धिः - उद्धरेत्+आत्मना उद्धरेदात्मना जश्त्व-सन्धिः[1]

1 झलां जशोऽन्ते (८।२।३९)

आत्मना+आत्मानम्	आत्मनात्मानम्	सवर्णदीर्घ-सन्धिः[1]
न+आत्मानम्	नात्मानम्	सवर्णदीर्घ-सन्धिः[2]
आत्मा+एव	आत्मैव	वृद्धि-सन्धिः[3]
हि+आत्मनः	ह्यात्मनः	यण्-सन्धिः[4]
आत्मनः+बन्धुः	आत्मनो बन्धुः	रुत्व>उत्व>गुण-सन्धिः[5]
बन्धुः+आत्मा	बन्धुरात्मा	रेफ-सन्धिः[6]
रिपुः+आत्मनः	रिपुरात्मनः	रेफ-सन्धिः[7]

पदार्थकोशः

आत्मना विवेकयुक्तेन [सुबो०]।

उद्धरेत् उत् ऊर्ध्वं हरेत् उद्धरेत्, योगारूढताम् आपादयेद् [शा०]।
ऊर्ध्वं हरेः योगारूढताम् आपादयेत् इति [पै०]।

अवसादयेत् अधः नयेत्, अधः गमयेत् [शा०]। अधो नयेत् [पै०]। नयेत् [सुबो०]।

हि यस्मात् [शा०/पै०/सुबो०/चतु०]।

आत्मा मनःसङ्घातोपरतः [सुबो०]। मनः [गीता०]।

आत्मनः स्वस्य [सुबो०]।

बन्धुः उपकारकः [सुबो०]।

रिपुः शत्रुः [शा०/पै०]। अपकारकः [सुबो०]।

==

❖ *सम्प्रज्ञातसमाधेः साङ्गानि बाह्यान्तरुपकरणानि* ❖

(२७) **नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।**
न चाति स्वप्नशीलस्य जाग्रतो नैव चार्जुन॥ आत्मसंयमयोगः **०६-१६॥**

---

1 अकः सवर्णे दीर्घः (६।१।१०१)
2 अकः सवर्णे दीर्घः (६।१।१०१)
3 वृद्धिरेचि (६।१।८८)
4 इको यणचि (६।१।७७)
5 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
6 ससजुषो रुः (८।२।६६)
7 ससजुषो रुः (८।२।६६)

पदच्छेद: न अति अश्नतः तु योगः अस्ति न च एकान्तम् अन्-अश्नतः।
न च अति स्वप्न-शीलस्य जाग्रतः न एव च अर्जुन॥

अन्वयः - अर्जुन योगः न तु अति अश्नतः च न एकान्तम् अनश्नतः च न अतिस्वप्नशीलस्य च न जाग्रतः एव अस्ति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
अर्जुन	अर्जुन [पुं-सं-एक]	**च**	च [अव्य]
योगः	योग [पुं-प्र-एक]	**न**	न [अव्य]
न	न [अव्य]	**अतिस्वप्न-शीलस्य**	अतिस्वप्नशील [पुं-ष-एक]
तु	तु [अव्य]		
अत्यश्नतः	अत्यश् [कृत्-प्रत्ययः-शतृ-पुं-ष-एक]	**च**	च [अव्य]
च	च [अव्य]	**न**	न [अव्य]
न	न [अव्य]	**जाग्रतः**	जागृ [कृत्-प्रत्ययः-शतृ-पुं-ष-एक]
एकान्तम्	एकान्त [नपुं-द्वि-एक]	**एव**	एव [अव्य]
अनश्नतः	अन्-अश् [कृत्-प्रत्ययः-शतृ-पुं-ष-एक]	**अस्ति**	अस् [कर्तरि-लट्-प्र-एक-परस्मै]

पदार्थः

मूलम्	हिन्दी	English
अर्जुन	हे अर्जुन	O Arjuna
योगः	योग	Yoga
न	न	never
तु	तो	but
अत्यश्नतः	बहुत खाने वाले का	of one who eats too much
च	और	also
न	न	nor
एकान्तम्	बिलकुल	completely
अनश्नतः	न खाने वाले का	abstains from eating
च	तथा	also
न	न	nor
अतिस्वप्नशीलस्य	बहुत शयन करने वाले का	of one who sleeps too much

च	और	and
न	न	not
जाग्रतः	जागने वाले का	one who keeps awake too much
एव	ही	ever
अस्ति	सिद्ध होता है	is

भावार्थः

हिन्दी - हे अर्जुन ! यह योग न तो बहुत खाने वाले का, न बिल्कुल न खाने वाले का, न बहुत शयन करने के स्वभाव वाले का और न सदा जागने वाले का ही सिद्ध होता है।

English - Arjuna, this yoga is neither for him who overeats, nor for him who observes a complete fast; it is neither for him who is given to too much sleep; nor even for him who is ceaselessly awake.

सन्धिः -	न+अति	नाति	सवर्णदीर्घ-सन्धिः[1]
	अति+अश्नतः	अत्यश्नतः	यण्-सन्धिः[2]
	अश्नतः+तु	अश्नतस्तु	सत्व-सन्धिः[3]
	योगः+अस्ति	योगोऽस्ति	रुत्व>उत्व>गुण>पूर्वरुप-सन्धिः[4]
	च+एकान्तम्	चैकान्तम्	वृद्धि-सन्धिः[5]
	च+अति	चाति	सवर्णदीर्घ-सन्धिः[6]
	जाग्रतः+न	जाग्रतो न	रुत्व>उत्व>गुण-सन्धिः
	न+एव	नैव	वृद्धि-सन्धिः
	च+अर्जुन	चार्जुन	सवर्णदीर्घ-सन्धिः[7]

1 अकः सवर्णे दीर्घः (६।१।१०१)
2 इको यणचि (६।१।७७)
3 विसर्जनीयस्य सः (८।३।३४)
4 ससजुषो रुः (८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)> आद् गुणः (६।१।८७)>एङः पदान्तादति (६।१।१०९)
5 वृद्धिरेचि (६।१।८८)
6 अकः सवर्णे दीर्घः (६।१।१०१)
7 अकः सवर्णे दीर्घः (६।१।१०१)

समासः -	अनश्नतः	न अश्नन् अनश्नन् तस्य अनश्नतः	नञ्-तत्पुरुषः
	स्वप्नशीलस्य	स्वप्नम् शीलम् यस्य सः स्वप्नशीलः तस्य	षष्ठी-बहुव्रीहिः

पदार्थकोशः

योगः समाधिः [सुबो०]।

अति अश्नतः आत्मसम्मितम् अन्नपरिमाणम् अतीत्य अश्नतः अत्यश्नतः [शा०]।
अत्यन्तं अधिकं भुञ्जानस्य [सुबो०]।

एकान्तम् अत्यन्तम् [सुबो०]। अतिशयेन [चतु०]।

अति स्वप्नशीलस्य अतिनिद्राशीलस्य [सुबो०]।

जाग्रतः अति जाग्रत इत्यत्राप्यतिशब्दो योज्यः [चतु०]।

==

❖ *सम्प्रज्ञातसमाधेः साङ्गानि बाह्यान्तरुपकरणानि* ❖

(२८) **युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥ आत्मसंयमयोगः **०६-१७॥**

पदच्छेदः युक्त-आहार-विहारस्य युक्त-चेष्टस्य कर्मसु।
युक्त-स्वप्न-अवबोधस्य योगः भवति दुःख-हा॥

अन्वयः - युक्ताहारविहारस्य कर्मसु युक्तचेष्टस्य (च) युक्तस्वप्नावबोधस्य योगः दुःखहा भवति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
युक्ताहार-विहारस्य	युक्ताहारविहार [पुं-ष-एक]	**युक्तस्वप्ना-वबोधस्य**	युक्तस्वप्नावबोध [पुं-ष-एक]
कर्मसु	कर्मन् [नपुं-स-बहु]	**योगः**	योग [पुं-प्र-एक]
युक्तचेष्टस्य	युक्तचेष्ट [पुं-ष-एक]	**दुःखहा**	दुःखहन् [पुं-प्र-एक]
(च)	(च [अव्य])	**भवति**	भू [कर्तरि-लट्-प्र-एक-परस्मै]

पदार्थः		
मूलम्	हिन्दी	English
युक्ताहारविहारस्य	उचित आहार-विहार करने वाले का	regulated eating and recreation
कर्मसु	कर्मों में	in discharging duties
युक्तचेष्टस्य	यथा योग्य चेष्टा करने वाले का	of one who has regulated work for maintenance
(च)	(और)	also
युक्तस्वप्नावबोधस्य	यथा योग्य सोने तथा जागने वाले का	regulated sleep and wakefulness
योगः	योग	practice of yoga
दुःखहा	दुःखों का नाश करने वाला	diminishing pains
भवति	होता है	becomes

भावार्थः

हिन्दी - दु:खों का नाश करने वाला योग तो यथा योग्य आहार-विहार करने वाले का, कर्मों में यथा योग्य चेष्टा करने वाले का और यथा योग्य सोने तथा जागने वाले का ही सिद्ध होता है।

English - Yoga, which rids one of woe, is accomplished only by him who is regulated in diet and recreation, regulated in performing actions, and regulated in sleep and wakefulness.

सन्धिः - योगः+भवति योगो भवति रुत्व>उत्व>गुण-सन्धिः[1]

समासः -	युक्ताहारविहारस्य	आहारः च विहारः च आहारविहारौ	इतरेतरयोगद्वन्द्वः
		आहारविहारौ युक्तौ यस्य सः	षष्ठी बहुव्रीहिः
		युक्ताहारविहारः तस्य	
	युक्तचेष्टस्य	युक्ता चेष्टा यस्य सः युक्तचेष्टः तस्य	षष्ठी बहुव्रीहिः

1 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)

युक्तस्वप्नावबोधस्य	स्वप्नः च अवबोधः च स्वप्नावबोधौ	इतरेतरयोगद्वन्द्वः
	स्वप्नावबोधौ युक्तौ यस्य सः युक्तस्वप्नावबोधः तस्य	षष्ठी बहुव्रीहिः
दुःखहा	दुःखं हन्ति दुःखहा	उपपदम्

पदार्थकोशः

युक्ताहारविहारस्य आह्रियते इति आहारः अन्नम्, विहरणं विहारः पादक्रमः, तौ युक्तौ नियतपरिमाणौ यस्य सः युक्ताहारविहारः तस्य [शा०/पै०]। युक्तो नियुक्तो नियतः आहारो विहारश्च गतिः यस्य [सुबो०]। युक्ताः परिमिताः आहारादयो यस्य सः [चतु०]। आहारेषु आह्रियमाणेषु विषयेषु; विहारः उपभोगाय प्रवृत्तिः; तस्याश्च युक्तत्वं नात्यन्तासक्तिः नात्यन्तपरिवर्जनम् [गीता०]।

कर्मसु कार्येषु [सुबो०]।

युक्तचेष्टस्य युक्ता नियता चेष्टा यस्य [शा०/सुबो०]।

युक्तस्वप्नावबोधस्य युक्तौ स्वप्नः च अवबोधः च तौ नियतकालौ यस्य तस्य [शा०]। युक्तौ नियतौ स्वप्नाऽवबोधौ निद्राजागरौ यस्य [सुबो०]।

दुःखहा दुःखानि सर्वाणि हन्ति इति दुःखहा [शा०]। दुःखनिवर्तकः [सुबो०]।

भवति सिद्ध्यति [सुबो०]।

==

❖ *सिद्धयोगस्य योगिनः सम्प्रज्ञातसमाधिरूपफलप्राप्तिः* ❖

(२९) **यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति।**
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति॥ आत्मसंयमयोगः ०६-३०॥

पदच्छेदः यः माम् पश्यति सर्वत्र सर्वम् च मयि पश्यति।
तस्य अहम् न प्रणश्यामि सः च मे न प्रणश्यति॥

अन्वयः - यः सर्वत्र माम् पश्यति च सर्वं मयि पश्यति तस्य अहं न प्रणश्यामि च सः मे न प्रणश्यति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
यः	यद् [पुं-प्र-एक]	तस्य	तद् [पुं-ष-एक]
सर्वत्र	सर्वत्र [अव्य]	अहम्	अस्मद् [प्र-एक]

माम्	अस्मद् [द्वि-एक]	**न**	न [अव्य]
च	च [अव्य]	**प्रणश्यामि**	प्र-नश् [कर्तरि-लट्-उ-एक-परस्मै]
सर्वम्	सर्व [पुं-द्वि-एक]	**सः**	तद् [पुं-प्र-एक]
मयि	अस्मद् [स-एक]	**मे**	अस्मद् [च-एक]
पश्यति	दृश् [कर्तरि-लट्-प्र-एक-परस्मै]		

पदार्थः

मूलम्	**हिन्दी**	**English**
यः	जो	whoever
सर्वत्र	सब जगह	everywhere
माम्	मुझको	me
पश्यति	देखता है	sees
च	और	and
सर्वम्	सबको	everything
मयि	मुझमें	in me
पश्यति	देखता है	sees
तस्य	उसके लिये	his
अहम्	मैं	I
न	नहीं	not
प्रणश्यामि	अदृश्य होता	am lost
च	और	also
सः	वह	he
मे	मेरे लिये	to me
न	नहीं	nor
प्रणश्यति	अदृश्य होता	is lost

भावार्थः

हिन्दी - जो पुरुष सम्पूर्ण भूतों में सबमें मुझको ही देखता है और सबको मुझमें देखता है, उसके लिये मैं अदृश्य नहीं होता और वह मेरे लिये अदृश्य नहीं होता।

English - He who sees Me present in all beings, and all beings existing within Me, never loses sight of Me, and I never lose sight of him.

सन्धिः -	यः+माम्	यो माम्	रुत्व>उत्व>गुण-सन्धिः[1]
	तस्य+अहम्	तस्याहम्	सवर्णदीर्घ-सन्धिः[2]
	सः+च	स च	विसर्गलोप-सन्धिः[3]

पदार्थकोशः

यः	योगी [चतु०]
सर्वत्र	सर्वेषु भूतेषु [शा०/पै०]। भूतमात्रे [सुबो०]।
माम्	वासुदेवं सर्वस्य आत्मानम् [शा०]। वासुदेवम् [पै०]। परमेश्वरम् [सुबो०]। परमात्मन: सर्वगतं रूपम् [गीता०]।
सर्वम्	ब्रह्मादिभूतजातम् [शा०/पै०]। प्राणिमात्रमपि [सुबो०]।
मयि	सर्वात्मनि [शा०/पै०]।
तस्य	आत्मैकत्वदर्शिन: [शा०/पै०]।
अहम्	ईश्वरः [शा०/पै०]।
प्रणश्यामि	परोक्षतां गमिष्यामि [शा०/पै०]। अदृश्यो न भवामि [सुबो०]।
सः	विद्वान् [शा०]।
मे	मम [चतु०]।
प्रणश्यति	परोक्षीभवति [शा०/पै०]। मयादृश्यो न भवति ममादृश्यो न भवति [सुबो०]। अदर्शनं न गच्छति, न तिरोभवति मदभिन्नत्वात् [चतु०]।

===

❖ *भगवता उक्तयोगं चित्तचाञ्चल्याद् दुस्साध्यं मन्यमानस्य अर्जुनस्य उपायान्तरबुभुत्सया प्रश्नः* ❖

(३०) अर्जुन उवाच

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥ आत्मसंयमयोगः ०६-३४॥

1 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
2 अकः सवर्णे दीर्घः (६।१।१०१)
3 एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६।१।१३२)

पदच्छेदः चञ्चलम् हि मनः कृष्ण प्रमाथि बलवत् दृढम्।
तस्य अहम् निग्रहम् मन्ये वायोः इव सु-दुष्करम्॥

अन्वयः - हि कृष्ण मनः चञ्चलम् प्रमाथि दृढम् बलवत् (च) (अस्ति) अहं तस्य निग्रहं वायोः (निग्रहम्) इव सुदुष्करम् मन्ये।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
हि	हि [अव्य]	**अहम्**	अस्मद् [प्र-एक]
कृष्ण	कृष्ण [पुं-सं-एक]	**तस्य**	तद् [पुं-ष-एक]
मनः	मनस् [नपुं-प्र-एक]	**निग्रहम्**	निग्रह [पुं-द्वि-एक]
चञ्चलम्	चञ्चल [नपुं-प्र-एक]	**वायोः**	वायु [पुं-ष-एक]
प्रमाथि	प्रमाथिन् [नपुं-प्र-एक]	**(निग्रहम्)**	(निग्रह [पुं-द्वि-एक])
दृढम्	दृढ [नपुं-प्र-एक]	**इव**	इव [अव्य]
बलवत्	बलवत् [नपुं-प्र-एक]	**सुदुष्करम्**	सुदुष्कर [पुं-द्वि-एक]
(च)	(च [अव्य])	**मन्ये**	मन् [कर्तरि-लट्-उ-एक-आत्मने]
(अस्ति)	(अस् [कर्तरि-लट्-प्र-एक-परस्मै])		

पदार्थः

मूलम्	हिन्दी	English
हि	क्योंकि	certainly
कृष्ण	हे श्रीकृष्ण	O Śrī Kṛṣṇa
मनः	मन	mind
चञ्चलम्	चंचल	unsteady
प्रमाथि	प्रमथन स्वभाव वाला	agitating
दृढम्	दृढ़	obstinate
बलवत्	बलवान्	powerful
(च)	(और)	also
(अस्ति)	(है)	is
अहम्	मैं	I
तस्य	उसका	its
निग्रहम्	वश में करना	subduing

वायोः	वायु को रोकने की	of the wind
(निग्रहम्)	(वश में करना)	subduing
इव	जैसे	like
सुदुष्करम्	अत्यन्त दुष्कर	difficult
मन्ये	मानता हूँ	think

भावार्थः

हिन्दी - क्योंकि हे श्रीकृष्ण ! यह मन बड़ा चंचल, प्रमथन स्वभाव वाला, दृढ़ और बलवान् है। इसलिये उसको वश में करना मैं वायु के रोकने की भाँति अत्यन्त दुष्कर मानता हूँ।

English - For Śrī Kṛṣṇa, the mind is very unsteady, agigating, obstinate, and powerful therefore, I consider it as difficult to subdue as the wind.

सन्धिः -

बलवत्+दृढम्	बलवद्दृढम्	जश्त्व-सन्धिः[1]
तस्य+अहम्	तस्याहम्	सवर्णदीर्घ-सन्धिः[2]
वायोः+इव	वायोरिव	रेफ-सन्धिः[3]

पदार्थकोशः

हि हेतौ [टि०]।

कृष्ण कृषतेः विलेखनार्थस्य रूपम् भक्तजनपापादिदोषाकर्षणात् कृष्णः [शा०]। कर्षतेः विलेखनार्थस्य। योगिभक्तजनपापादिदोषकर्षणात् [पै०]।

चञ्चलम् स्वभावेन एव चपलम् [सुबो०]।

प्रमाथि प्रमथनशीलम्, प्रमथ्नाति शरीरम् इन्द्रियाणि च विक्षिपति परवशीकरोति [शा०]।

प्रमथनशीलम् प्रमथ्नाति शरीरम् इन्द्रियाणि च विक्षिपति नरं वशी करोति [पै०]। प्रमथनशीलं देहेन्द्रिय-क्षोभकम् [सुबो०]। बहुदस्युवदेकस्य प्रमथनशीलम् [चतु०]। प्रमथ्नाति दृष्टादृष्टे [गीता०]।

दृढम् दुष्टव्यापारात् वारयितुम् अशक्यम् [गीता०]।

बलवत् विचारेण [सुबो०]। शक्तम् [गीता०]।

1 झलां जश् झशि (८।४।५३)
2 अकः सवर्णे दीर्घः (६।१।१०१)
3 ससजुषो रुः (८।२।६६)

तस्य एवम्भूतस्य मनसः [पै०]। मनसः [सुबो०]।
निग्रहम् निरोधम् [शा०/पै०/सुबो०]।
सुदुष्करम् सर्वथा वशीकर्तुम् अशक्यम् [सुबो०]।

==

❖ *अभ्यासवैराग्याभ्यां मनोनिग्रहे सति ध्यानयोगसिद्धिरित्युक्तिः* ❖

(३१) **श्रीभगवानुवाच**

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥ आत्मसंयमयोगः ०६-३५॥

पदच्छेदः अ-संशयम् महा-बाहो मनः दुर्-निग्रहम् चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥

अन्वयः - महाबाहो असंशयम् मनः दुर्निग्रहं (च) चलम् (अस्ति) तु कौन्तेय (मनः) अभ्यासेन च वैराग्येण गृह्यते।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
महाबाहो	महाबाहु [पुं-सं-एक]	**तु**	तु [अव्य]
असंशयम्	असंशय [पुं-द्वि-एक]	**कौन्तेय**	कौन्तेय [पुं-सं-एक]
मनः	मनस् [नपुं-प्र-एक]	**(मनः)**	(मनस् [नपुं-प्र-एक])
दुर्निग्रहम्	दुर्निग्रह [पुं-प्र-एक]	**अभ्यासेन**	अभ्यास [पुं-तृ-एक]
(च)	(च [अव्य])	**च**	च [अव्य]
चलम्	चल [नपुं-प्र-एक]	**वैराग्येण**	वैराग्य [नपुं-तृ-एक]
(अस्ति)	(अस् [कर्तरि-लट्-प्र-एक-परस्मै])	**गृह्यते**	ग्रह [कर्तरि-लट्-प्र-एक-आत्मने]

पदार्थः

मूलम्	हिन्दी	English
महाबाहो	हे महाबाहो	O mighty-armed one
असंशयम्	निःसन्देह	undoubtedly
मनः	मन	mind
दुर्निग्रहम्	चंचल	difficult to curb

(च)	(और)	and
चलम्	कठिनता से वश में होने वाला	flickering
(अस्ति)	(है)	is
तु	परंतु	but
कौन्तेय	हे कुन्तीपुत्र	O son of Kunti
(मनः)	(मन)	mind
अभ्यासेन	अभ्यास से	by practice
च	और	also
वैराग्येण	वैराग्य से	by detachment
गृह्यते	वश में होता है	can be so controlled

भावार्थः

हिन्दी - हे महाबाहो ! नि:सन्देह मन चंचल और कठिनता से वश में होने वाला है; परन्तु हे कुन्ती पुत्र अर्जुन! यह अभ्यास और वैराग्य से वश में हो जाता है।

English - The mind is restless no doubt; and difficult to curb, O mighty-armed one; but it can be brought under control by repeated practice of meditation and by the exercise of dispassion, O son of Kunti.

सन्धिः - मनः+दुर्निग्रहम् मनो दुर्निग्रहम् रुत्व>उत्व>गुण-सन्धिः[1]

समासः - महाबाहो महान्तौ बाहू यस्य सः महाबाहुः सम्बोधने षष्ठी-बहुव्रीहिः
असंशयं न संशयः असंशयः तं असंशयम् नञ्-तत्पुरुषः

पदार्थकोशः

असंशयम् न अस्ति संशय: [शा०/पै०]। नि:संशयम् [सुबो०]।
दुर्निग्रहम् निरोद्धुम् अशक्यम् [सुबो०]।
अभ्यासेन अभ्यासो नाम चित्तभूमौ कस्याञ्चित् समानप्रत्ययावृत्ति: चित्तस्य [शा०]। अभ्यासो नाम चित्तभूमौ कस्याञ्चित्समानप्रत्यया वृत्ति: [पै०]। परमात्माकारप्रत्ययावृत्त्या,

1 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)

	लयप्रतिबन्धात् विषयाचिन्तनपूर्वकम् [सुबो०]। अभ्यासो नाम कस्याञ्चित् चित्तभूमौ समानप्रत्ययावृत्तिः [चतु०]। अभ्यासेन मोक्षपक्षः क्रमात्क्रमं विषयीक्रियते [गीता०]।
च	समुच्चयार्थः [टि०]।
वैराग्येण	वैराग्यं नाम दृष्टादृष्टेष्टभोगेषु दोषदर्शनाभ्यासात् वैतृष्ण्यम् [शा०/पै०]। विषयवैतृष्ण्येन, विक्षेपप्रतिबन्धात् [सुबो०]। वैराग्यं तु दृष्टादृष्टः इष्टभोगेषु ससाधनेषु दोषदर्शनेन वैतृष्ण्यम् [चतु०]। वैराग्येण विषयोत्सुकता विनाश्यते [गीता०]।
गृह्यते	निगृह्यते निरुध्यते [शा०/पै०/सुबो०]।

==

❖ ***ध्यानयोगिनः सर्वश्रेष्ठत्वकथनपूर्वकं ध्यानयोगेऽर्जुनस्य प्रवर्तनम्*** ❖

(३२) **तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।**
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥ आत्मसंयमयोगः ०६-४६॥

पदच्छेदः तपस्विभ्यः अधिकः योगी ज्ञानिभ्यः अपि मतः अधिकः।
कर्मिभ्यः च अधिकः योगी तस्मात् योगी भव अर्जुन॥

अन्वयः - योगी तपस्विभ्यः अधिकः (च) ज्ञानिभ्यः अपि अधिकः मतः च कर्मिभ्यः योगी अधिकः (मतः) तस्मात् अर्जुन (त्वम्) योगी भव।

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
योगी	योगिन् [पुं-प्र-एक]	**कर्मिभ्यः**	कर्मिन् [पुं-पं-बहु]
तपस्विभ्यः	तपस्विन् [पुं-पं-बहु]	**योगी**	योगिन् [पुं-प्र-एक]
अधिकः	अधिक [पुं-प्र-एक]	**अधिकः**	अधिक [पुं-प्र-एक]
ज्ञानिभ्यः	ज्ञानिन् [पुं-पं-बहु]	**तस्मात्**	तस्मात् [अव्य]
अपि	अपि [अव्य]	**अर्जुन**	अर्जुन [पुं-सं-एक]
अधिकः	अधिक [पुं-प्र-एक]	**(त्वम्)**	(युष्मद् [प्र-एक])
मतः	मत [पुं-प्र-एक]	**योगी**	योगिन् [पुं-प्र-एक]
च	च [अव्य]	**भव**	भू [कर्तरि-लोट्-म-एक-परस्मै]

पदार्थः

मूलम्	हिन्दी	English
योगी	योगी	the Yogī
तपस्विभ्यः	तपस्वियों से	than the ascetic
अधिकः	श्रेष्ठ	greater
(मतः)	(माना गया है)	(considered)
(योगी)	(योगी)	(the Yogī)
ज्ञानिभ्यः	शास्त्रज्ञानियों से	than the wise
अपि	भी	also
अधिकः	श्रेष्ठ	greater than
मतः	माना गया है	considered
च	और	also
कर्मिभ्यः	कर्म करने वालों से भी	than the fruitive worker
योगी	योगी	the Yogī
अधिकः	श्रेष्ठ	greater than
(मतः)	(माना गया है)	considered
तस्मात्	इससे	therefore
अर्जुन	हे अर्जुन	O Arjuna
(त्वम्)	(तुम)	you
योगी	योगी	a Yogī
भव	हो जाओ	just become

भावार्थः

हिन्दी - योगी तपस्वियों से श्रेष्ठ है, शास्त्रज्ञानियों से भी श्रेष्ठ माना गया है और सकामकर्म करने वालों से भी योगी श्रेष्ठ है; इससे हे अर्जुन ! तुम योगी हो जाओ।

English - The Yogī is superior to the ascetics; he is regarded as superior even to those versed in sacred lore. The Yogī is also superior to those who perform action with some interested motive. Therefore, Arjuna, you become a Yogī.

सन्धिः - तपस्विभ्यः+अधिकः	तपस्विभ्योऽधिकः	रुत्व >उत्व>गुण>पूर्वरुप-सन्धिः[1]
अधिकः+योगी	अधिको योगी	रुत्व>उत्व>गुण-सन्धिः[2]
ज्ञानिभ्यः+अपि	ज्ञानिभ्योऽपि	रुत्व >उत्व>गुण>पूर्वरुप-सन्धिः[3]
मतः+अधिकः	मतोऽधिकः	रुत्व >उत्व>गुण>पूर्वरुप-सन्धिः[4]
कर्मिभ्यः+च	कर्मिभ्यश्च	सत्व>श्चुत्व-सन्धिः[5]
च+अधिकः	चाधिकः	सवर्णदीर्घ-सन्धिः[6]
तस्मात्+योगी	तस्माद्योगी	जश्त्व-सन्धिः[7]
भव+अर्जुन	भवार्जुन	सवर्णदीर्घ-सन्धिः[8]

पदार्थकोशः

योगी योगः अस्यास्तीति योगी ध्यानयोगी [टि०]।

तपस्विभ्यः कृच्छ्रचान्द्रायणादितपोनिष्ठेभ्यः [सुबो०]।
तपस्विनः अत्र कृच्छ्रचान्द्रायणमासोपवासादिकर्तारः [चतु०]।

ज्ञानिभ्यः ज्ञानम् अत्र शास्त्रार्थ-पाण्डित्यम्, तद्वद्भ्यः अपि मतः ज्ञातः [शा०]। ज्ञानमत्र शास्त्रपाण्डित्यं तद्वत् [पै०]। शास्त्रज्ञानवद्भ्यः [सुबो०]। ज्ञानिनः शास्त्रीयपाण्डित्यवन्तः [चतु०]।

अधिकः श्रेष्ठः [टि०]।

कर्मिभ्यः अग्निहोत्रादि कर्म, तद्वद्भ्यः [शा०]। अग्निहोत्रादिकर्मिभ्यः तद्वत् [पै०]। इष्टापूर्त्तकारिभ्यः इष्टापूर्त्तादिकर्मकारिभ्यः [सुबो०]। कर्मिणः अग्निहोत्राद्यनुष्ठातारः [चतु०]।

अधिकः श्रेष्ठः [सुबो०]।

अर्जुन शुद्धत्वात् [टि०]।

योगी नित्यनिरुत्तरानन्दमयसमाधिमानित्यर्थः [गीता०]।

==

1 ससजुषो रुः (८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)>आद्गुणः (६।१।८७)>एङः पदान्तादति (६।१।१०९)
2 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
3 ससजुषो रुः (८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)>आद्गुणः (६।१।८७)>एङः पदान्तादति (६।१।१०९)
4 ससजुषो रुः(८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)>आद्गुणः (६।१।८७)>एङः पदान्तादति (६।१।१०९)
5 विसर्जनीयस्य सः (८।३।३४)>स्तोः श्चुना श्चुः (८।४।४०)
6 अकः सवर्णे दीर्घः (६।१।१०१)
7 झलां जशोऽन्ते (८।२।३९)
8 अकः सवर्णे दीर्घः (६।१।१०१)

❖ *सर्वभूतानां परमेश्वरे प्रोतत्वकथनम्। भगवतः अद्वैतस्वरूपम्* ❖

(३३) **मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय।**
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥ ज्ञानविज्ञानयोगः ०७-०७॥

पदच्छेदः मत्तः परतरम् न अन्यत् किञ्चित् अस्ति धनञ्जय।
मयि सर्वम् इदम् प्रोतम् सूत्रे मणि-गणाः इव॥

अन्वयः - धनञ्जय मत्तः अन्यत् किञ्चित् परतरं न अस्ति इदं सर्वं सूत्रे मणिगणाः इव मयि प्रोतम्।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
धनञ्जय	धनञ्जय [पुं-सं-एक]	**इदम्**	इदम् [नपुं-प्र-एक]
मत्तः	मत्त [तसिल्]	**सर्वम्**	सर्व [नपुं-प्र-एक]
अन्यत्	अन्य [नपुं-प्र-एक]	**सूत्रे**	सूत्र [नपुं-स-एक]
किञ्चित्	किञ्चित् [नपुं-प्र-एक]	**मणिगणाः**	मणिगण [पुं-प्र-बहु]
परतरम्	परतर [नपुं-प्र-एक]	**इव**	इव [अव्य]
न	न [अव्य]	**मयि**	अस्मद् [स-एक]
अस्ति	अस् [कर्तरि-लट्-प्र-एक-परस्मै]	**प्रोतम्**	प्र-उ [कृत्-प्रत्ययः-क्त-नपुं-प्र-एक]

पदार्थः

मूलम्	हिन्दी	English
धनञ्जय	हे धनंजय	O Dhanaṃjaya
मत्तः	मुझसे	beyond Myself
अन्यत्	अतिरिक्त	anything
किञ्चित्	कोई भी	else
परतरम्	दूसरा श्रेष्ठ	superior
न	नहीं	not
अस्ति	है	is
इदम्	यह	which
सर्वम्	सम्पूर्ण	all
सूत्रे	सूत्र में	on a thread

मणिगणाः	मणियों के	pearls
इव	सदृश	likened
मयि	मुझमें	in Me
प्रोतम्	गुँथा हुआ है	strung

भावार्थः

हिन्दी - हे धनंजय ! मुझसे भिन्न दूसरा कोई दूसरा श्रेष्ठ भी नहीं है। यह सम्पूर्ण जगत् सूत्र में सूत्र के मणियों के सदृश मुझमें गुँथा हुआ है ।

English - There is nothing else besides Me, Arjuna. Like pearls strung on a thread, all this is threaded on Me.

सन्धिः -	न + अन्यत्	नान्यत्	सवर्णदीर्घ-सन्धिः[1]
	अन्यत् + किञ्चित्	अन्यत्किञ्चित्	चर्त्व-सन्धिः[2]
	किञ्चित् + अस्ति	किञ्चिदस्ति	जश्त्व-सन्धिः[3]
	मणिगणाः + इव	मणिगणा इव	रुत्व-यत्व-लोप-सन्धिः[4]

समासः - मणिगणाः मणेः गणः मणिगणः ते मणिगणाः षष्ठी-तत्पुरुषः

पदार्थकोशः

धनञ्जय	अर्जुन [टि०]।
मत्तः	परमेश्वरात् [शा०/पै०]। इत्यादि अव्ययम् इत्यन्तम् [गीता०]।
अन्यत्	कारणान्तरम् [शा०]।
परतरम्	श्रेष्ठम् [सुबो०]। गवाश्वादि मृदनुपादानकत्वात् [चतु०]।
अस्ति	विद्यते [शा०]।
इदम्	जगत् [शा०/सुबो०]।

---

1 अकः सवर्णे दीर्घः (6।1।101)

2 खरि च (8।4।55)

3 झलां जशोऽन्ते (8।2।39)

4 ससजुषो रुः (8।2।66)-भोभगोअघो अपूर्वस्य योऽशि (8।3।17)-लोपः शाकल्यस्य (8।3।19)

मणिगणाः मणीनां गणाः [टि०]।
मयि परमेश्वरे [शा०]। सर्वाधारे [पै०]। सद्रूपेण स्फुरणरूपेण च सूत्रवत्सर्वत्रानुस्यूते [चतु०]।
प्रोतम् अनुस्यूतम् अनुगतम् अनुविद्धं ग्रथितम् [शा०]। स्यूतम् [पै०]।
ग्रथितम् आश्रितम् [सुबो०]। तेन व्यावृत्तेभ्योऽनुवृत्तम् [चतु०]।

==

❖ *भगवद्भजनप्रवृत्तानां सुकृतिनां भक्तानां चातुर्विध्यनिर्देशः* ❖

(३४) **चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।**
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥ ज्ञानविज्ञानयोगः ०७-१६॥

पदच्छेदः चतुर्-विधाः भजन्ते माम् जनाः सु-कृतिनः अर्जुन।
आर्तः जिज्ञासुः अर्थ-अर्थी ज्ञानी च भरत-ऋषभ॥

अन्वयः - भरतर्षभ अर्जुन सुकृतिनः अर्थार्थी आर्तः जिज्ञासुः च ज्ञानी (इति) चतुर्विधाः जनाः माम् भजन्ते।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
भरतर्षभ	भरतर्षभ [पुं-सं-एक]	**च**	च [अव्य]
अर्जुन	अर्जुन [पुं-सं-एक]	**ज्ञानी**	ज्ञानिन् [पुं-प्र-एक]
सुकृतिनः	सुकृतिन् [पुं-प्र-बहु]	**(इति)**	(इति [अव्य])
अर्थार्थी	अर्थार्थिन् [पुं-प्र-एक]	**चतुर्विधाः**	चतुर्विध [पुं-प्र-बहु]
आर्तः	आर्त [पुं-प्र-एक]	**जनाः**	जन [पुं-प्र-बहु]
जिज्ञासुः	जिज्ञासु [पुं-प्र-एक]	**माम्**	अस्मद् [द्वि-एक]
		भजन्ते	भज् [कर्तरि-लट्-प्र-बहु-आत्मने]

पदार्थः

मूलम्	हिन्दी	English
भरतर्षभ	हे भरतवंशियों में श्रेष्ठ	O great one amongst the descendants of Bharata
अर्जुन	अर्जुन	O Arjuna
सुकृतिनः	उत्तम कर्म करने वाले	noble deeds
अर्थार्थी	अर्थ को प्राप्त करने वाले	one who desires material gain

आर्तः	आर्त	the distressed
जिज्ञासुः	जिज्ञासु	the inquisitive
च	और	also
ज्ञानी	ज्ञानी	the wise
(इति)	(ऐसे)	thus
चतुर्विधाः	चार प्रकार के	four kinds of
जनाः	भक्तजन	persons
माम्	मुझको	unto Me
भजन्ते	भजते हैं	worship

भावार्थः

हिन्दी - हे भरतवंशियों में श्रेष्ठ अर्जुन। उत्तम कर्म करने वाले अर्थार्थी, आर्त्त, जिज्ञासु और ज्ञानी- ऐसे चार प्रकार के भक्तजन मेरा भजन करते हैं।

English - Four types of devotees of noble deeds worship Me, Arjuna, the seeker after worldly possession, the distressed, the seeker for knowledge, and the man of wisdom, O best of Bharatas.

सन्धिः -			
	चतुर्विधाः + भजन्ते	चतुर्विधा भजन्ते	रुत्व-यत्व-लोप-सन्धिः[1]
	सुकृतिनः + अर्जुन	सुकृतिनोऽर्जुन	रुत्व-उत्व-गुण-पूर्वरुप-सन्धिः[2]
	आर्तः + जिज्ञासुः	आर्तो जिज्ञासुः	रुत्व-उत्व-गुण-सन्धिः[3]
	जिज्ञासुः + अर्थार्थी	जिज्ञासुरर्थार्थी	रेफ-सन्धिः[4]

समासः -			
	सुकृतिनः	सुन्दरा कृती यस्य सुकृती ते	षष्ठ्यर्थ-बहुव्रीहिः
	अर्थार्थी	अर्थस्य अर्थी अर्थार्थी	षष्ठी-तत्पुरुषः
	चतुर्विधाः	चत्वारः विधः यस्य सः चतुर्विधः ते	षष्ठ्यर्थ-बहुव्रीहिः

1 ससजुषो रुः (8।2।66)-भोभगोअघो अपूर्वस्य योऽशि (8।3।17)-हलि सर्वेषाम् (8।3।22)
2 ससजुषो रुः (8।2।66)-अतो रोरप्लुतादप्लुते (6।1।113)-आद्गुणः (6।1।87)-एङः पदान्तादति (6।1।109)
3 ससजुषो रुः (8।2।66)-हशि च (6।1।114)-आद्गुणः (6।1।87)
4 ससजुषो रुः (8।2।66)

पदार्थकोश:

भरतर्षभ	भरतानाम् ऋषभ: श्रेष्ठोऽर्जुन भरतराजवंशश्रेष्ठत्वात्पुण्यकर्मकारित्वाच्च कृतपुण्य: [टि०]।
सुकृतिन:	पुण्यकर्माण: [शा०]। कृतपुण्यजना: [सुबो०]।
अर्थार्थी	धनकाम: [शा०]। अत्र वा परत्र वा भोगसाधनभूतार्थलिप्सु: [सुबो०]। धनाद्यर्थी [चतु०]।
आर्त:	आर्तिपरिगृहीत: तस्करव्याघ्ररोगादिना अभिभूत: आपन्न: [शा०]। दु:खी [पै०]। रोगाद्यभिभूत: [सुबो०]। पीडित: पीडापरिहारार्थी [चतु०]।
जिज्ञासु:	भगवत्तत्त्वं ज्ञातुम् इच्छति य: [शा०]। ज्ञातुम् इच्छु: [पै०]। आत्मज्ञानेच्छु: [सुबो०]। स्वाज्ञाननाशार्थी [चतु०]।
ज्ञानी	विष्णो: तत्त्ववित् [शा०]। आत्मवित् [पै०/सुबो०]।
चतुर्विधा:	चतुष्प्रकारा: [शा०/पै०]। दु:खनिराकरणकारणतानिश्चयेन वा, सुखसम्पत्तिहेतुतानिश्चयेन वा, तदुभयविषयार्थसंशयेन वा जिज्ञासाशब्दवाच्येन, तत्त्वज्ञान-नान्तरीयकतया वा परमेश्वर विषय: प्रह्वीभावो जायते [गीता०]।
जना:	सुकृतिनः [पै०]।
माम्	अविच्छेदेन प्रकाशमानं परमात्मानं सोपाधिं पूर्वे, चरमे निरुपाधिम् [गीता०]।
भजन्ते	सेवन्ते [शा०]। भजति [सुबो०]। सेवन्ते उत्कर्षयन्ति [गीता०]।

===

❖ *आर्तादिभक्तेभ्य: ज्ञानिन: श्रैष्ठ्यम्* ❖

(३५) **तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते।**
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय:॥ ज्ञानविज्ञानयोगः **०७-१७॥**

पदच्छेद: तेषाम् ज्ञानी नित्य-युक्तः एक-भक्तिः विशिष्यते।
प्रियः हि ज्ञानिनः अति-अर्थम् अहम् सः च मम प्रियः॥

अन्वय: - तेषां नित्ययुक्तः एकभक्तिः ज्ञानी विशिष्यते हि ज्ञानिनः अहम् अत्यर्थम् प्रियः (अस्मि) च सः मम प्रियः (अस्ति)।

पदपरिचय:

मूलम्	पदपरिचय:	मूलम्	पदपरिचय:
तेषाम्	तद् [पुं-ष-बहु]	**अत्यर्थम्**	अत्यर्थ [पुं-प्र-एक]
नित्ययुक्त:	नित्ययुज् [कृत्-प्रत्यय:-क्त-पुं-प्र-एक]	**प्रिय:**	प्रिय [पुं-प्र-एक]

एकभक्तिः	एकभक्ति [स्त्री-प्र-एक]	**(अस्मि)**	(अस् [कर्तरि-लट्-उ-एक-परस्मै])
ज्ञानी	ज्ञानिन् [पुं-प्र-एक]	**च**	च [अव्य]
विशिष्यते	वि-शास् [कर्तरि-लट्-प्र-एक-आत्मने]	**सः**	तद् [पुं-प्र-एक]
हि	हि [अव्य]	**मम**	अस्मद् [ष-एक]
ज्ञानिनः	ज्ञानिन् [पुं-ष-एक]	**प्रियः**	प्रिय [पुं-प्र-एक]
अहम्	अस्मद् [प्र-एक]	**(अस्ति)**	(अस् [कर्तरि-लट्-प्र-एक-परस्मै])

पदार्थः

मूलम्	**हिन्दी**	**English**
तेषाम्	उनमें	out of them
नित्ययुक्तः	नित्यरूप से स्थित	always engaged
एकभक्तिः	अनन्य भक्तिवाला	in devotional service to only one
ज्ञानी	ज्ञानी	the wise man
विशिष्यते	अति उत्तम है	especially
हि	क्योंकि	certainly
ज्ञानिनः	ज्ञानी को	for the wise man
अहम्	मैं	I
अत्यर्थम्	अत्यन्त	highly
प्रियः	प्रिय	dear
(अस्मि)	(हूँ)	am
च	और	also
सः	वह	he
मम	मुझे	Mine
प्रियः	प्रिय	very dear
(अस्ति)	(है)	is

भावार्थः

हिन्दी - उनमें नित्य मुझ में नित्यरूप से स्थित अनन्य भक्ति वाला भक्त अति उत्तम है, क्योंकि मुझको तत्त्व से जानने वाले ज्ञानी को मैं अत्यन्त प्रिय हूँ और वह ज्ञानी मुझे अत्यन्त प्रिय है।

English - Of these best is the man of wisdom, ever established in identity with Me and possessed of exclusive devotion. For I am extremely dear to the wise man who knows Me in reality, and he is extremely dear to Me.

सन्धिः -	नित्ययुक्तः + एकभक्तिः	नित्ययुक्त एकभक्तिः	रुत्व-यत्व-लोप-सन्धिः[1]
	एकभक्तिः + विशिष्यते	एकभक्तिर्विशिष्यते	रेफ-सन्धिः[2]
	प्रियः + हि	प्रियो हि	रुत्व-उत्व-गुण-सन्धिः[3]
	ज्ञानिनः + अत्यर्थम्	ज्ञानिनोऽत्यर्थम्	रुत्व-उत्व-गुण-पूर्वरुप-सन्धिः[4]
	सः + च	स च	विसर्गलोप-सन्धिः[5]

समासः -	नित्ययुक्तः	नित्यं तत् युक्तः च	कर्मधारयः
	एकभक्तिः	एकस्मिन् भक्तिः यस्य सः एकभक्तिः	षष्ठ्यर्थ-बहुव्रीहिः

पदार्थकोशः

तेषाम् चतुर्णां मध्ये [शा०]। मध्ये [सुबो०]। आर्ता रोगिणः सूर्यं भजन्ते, जिज्ञासवः सरस्वतीं, अर्थार्थिनः कुबेरादीनिति तेषां तत्तत्कामार्थित्वेनानेकभक्तित्वं दृश्यते [चतु०]।

नित्ययुक्तः सदानिष्ठः सदामन्निष्ठः [सुबो०]। नित्यं मय्यावेश्य मनो ये माम् इत्युक्तेन समावेशयोगेन युक्तो नित्यं च भक्त्या युक्तः [गीता०]।

एकभक्तिः एकस्मिन् मय्येव भक्तिः यस्य सः [सुबो०]। एकभावेन भजनं करोति [चतु०]। एकत्र परमेश्वरे एव भक्तिः यस्य [गीता०]।

ज्ञानी तत्त्ववित् [शा०]।

विशिष्यते विशेषम् आधिक्यम् आपद्यते, अतिरिच्यते [शा०]।

हि यस्मात् [शा०]। यतः [चतु०]।

ज्ञानिनः ज्ञानम् अस्यास्तीति ज्ञानी [टि०]।

---

1 ससजुषो रुः (8|2|66)-भोभगोअघो अपूर्वस्य योऽशि (8|3|17)-लोपः शाकल्यस्य (8|3|19)
2 ससजुषो रुः (8|2|66)
3 ससजुषो रुः (8|2|66)-हशि च (6|1|114)-आद्गुणः (6|1|87)
4 ससजुषो रुः (8|2|66)-अतो रोरप्लुतादप्लुते (6|1|113)-आद्गुणः (6|1|87)-एङः पदान्तादति (6|1|109)
5 एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (6|1|132)

अहम्	आत्मा [टि०]।
अत्यर्थम्	अतिशयेन [पै०]। अत्यन्तम् [सुबो०]।
प्रियः	प्रीतेः पात्रभूतः [टि०]।
सः	ज्ञानी [टि०]।
मम	वासुदेवस्य [टि०]।

==

❖ *आर्तादिभक्तेभ्यः ज्ञानिनः श्रैष्ठ्यम्* ❖

(३६) **बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते।**
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥ ज्ञानविज्ञानयोगः **०७-१९॥**

पदच्छेदः बहूनाम् जन्मनाम् अन्ते ज्ञानवान् माम् प्रपद्यते।
वासुदेवः सर्वम् इति सः महत्-आत्मा सु-दुर्लभः॥

अन्वयः - बहूनां जन्मनाम् अन्ते ज्ञानवान् सर्वं वासुदेवः (अस्ति) इति (यः) माम् प्रपद्यते सः महात्मा सुदुर्लभः (अस्ति)।

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
बहूनाम्	बहु [नपुं-ष-बहु]	**इति**	इति [अव्य]
जन्मनाम्	जन्मन् [नपुं-ष-बहु]	**(यः)**	(यद् [पुं-प्र-एक])
अन्ते	अन्त [पुं-स-एक]	**माम्**	अस्मद् [द्वि-एक]
ज्ञानवान्	ज्ञानवत् [पुं-प्र-एक]	**प्रपद्यते**	प्र-पद् [कर्तरि-लट्-प्र-एक-आत्मने]
सर्वम्	सर्व [नपुं-प्र-एक]	**सः**	तद् [पुं-प्र-एक]
वासुदेवः	वासुदेव [पुं-प्र-एक]	**महात्मा**	महात्मन् [पुं-प्र-एक]
(अस्ति)	(अस् [कर्तरि-लट्-प्र-एक-परस्मै])	**सुदुर्लभः**	सुदुर्लभ [पुं-प्र-एक]

पदार्थः

मूलम्	**हिन्दी**	**English**
बहूनाम्	बहुत	many

जन्मनाम्	जन्मों के	births
अन्ते	अन्त में	after
ज्ञानवान्	ज्ञान वाला	the enlightened
सर्वम्	सब कुछ	all
वासुदेवः	वासुदेव	Vāsudeva
(अस्ति)	(है)	is
इति	ऐस	thus
(यः)	(जो)	one who
माम्	मुझको	unto Me
प्रपद्यते	भजता है	surrenders
सः	वह	such
महात्मा	महात्मा	great soul
सुदुर्लभः	अत्यन्त दुर्लभ	very rare
(अस्ति)	(है)	is

भावार्थः

हिन्दी - बहुत जन्मों के अन्त में तत्त्व ज्ञान को प्राप्त पुरुष, सब कुछ वासुदेव ही है, इस प्रकार मुझको जो भजता है, वह महात्मा अत्यन्त दुर्लभ है।

English - In the very last of all births the enlightened soul worships Me, realizing that all this is Vāsudeva. Such a great soul is very rare.

सन्धिः - सः + महात्मा स महात्मा विसर्गलोप-सन्धिः[1]

समासः - महात्मा महान् आत्मा यस्य सः षष्ठ्यर्थ-बहुव्रीहिः

पदार्थकोशः

जन्मनाम् ज्ञानार्थसंस्कारार्जनाश्रयाणाम् [शा०]। मध्ये [सुबो०]।

अन्ते समाप्तौ [शा०]। अवसाने [पै०]। चरमे जन्मनि [सुबो०/चतु०]।

1 एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (6|1|132)

ज्ञानवान्	प्राप्तपरिपाकज्ञानः [शा०]।
सर्वम्	चराचरम् [सुबो०]।
वासुदेवः	इति ज्ञानम् भगवदभिन्नम् भगवच्छेषतैकरसम् भगवदधीनस्वरूपसत्ताकम् [टि०]।
इति	प्रतिपद्यमानः [पै०]। सर्वात्मदृष्ट्या [सुबो०]।
माम्	वासुदेवं प्रत्यगात्मानम् [शा०]।
प्रपद्यते	भजति [सुबो०]। सम्यक् दर्शनेन अपरोक्षीकरोति [चतु०]।
महात्मा	न तत्समः अन्यः अस्ति, अधिको वा [शा०]।
	अपरिच्छिन्नदृष्टिः [सुबो०]। ब्रह्मभूतः [चतु०]।
सुदुर्लभः	सु नितरां दुर्लभः सुदुर्लभः [टि०]।

==

❖ *सर्वदा भगवद्ध्यानपुरःसरमर्जुनस्य युद्धादिकरणे प्रवर्तनम्* ❖

(३७) **तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च।**
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयम्॥ अक्षरब्रह्मयोगः **०८.०७॥**

पदच्छेदः तस्मात् सर्वेषु कालेषु माम् अनुस्मर युध्य च।
मयि अर्पित-मनः-बुद्धिः माम् एव इष्यसि अ-संशयम्॥

अन्वयः - तस्मात् सर्वेषु कालेषु माम् अनुस्मर च युध्य मयि (त्वम्) अर्पितमनोबुद्धिः असंशयम् माम् एव एष्यसि।

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
तस्मात्	तद् [पुं-पं-एक]	**मयि**	अस्मद् [स-एक]
सर्वेषु	सर्व [पुं-स-बहु]	**(त्वम्)**	(युष्मद् [प्र-एक])
कालेषु	काल [पुं-स-बहु]	**अर्पितमनोबुद्धिः**	अर्पितमनोबुद्धि [स्त्री-प्र-एक]
माम्	अस्मद् [द्वि-एक]	**असंशयम्**	असंशय [पुं-द्वि-एक]
अनुस्मर	अनु-स्मृ [कर्तरि-लोट्-म-एक-परस्मै]	**माम्**	अस्मद् [द्वि-एक]
च	च [अव्य]	**एव**	एव [अव्य]
युध्य	युध् [कर्तरि-लोट्-म-एक-परस्मै]	**एष्यसि**	इ [कर्तरि-लृट्-म-एक-परस्मै]

पदार्थः

मूलम्	**हिन्दी**	**English**
तस्मात्	अतः	therefore
सर्वेषु	सब	all
कालेषु	समय में	time
माम्	मेरा	unto Me
अनुस्मर	स्मरण करो	think of Me
च	और	also
युध्य	युद्ध करो	fight
मयि	मुझमें	unto Me
(त्वम्)	(तुम)	you
अर्पितमनोबुद्धिः	मन बुद्धि से अर्पित होकर	surrendered mind and intellect
असंशयम्	निःसन्देह	beyond a doubt
माम्	मुझको	unto Me
एव	ही	surely
एष्यसि	प्राप्त करोगे	will attain

भावार्थः

हिन्दी - इसलिये हे अर्जुन ! तुम सदा निरन्तर रूप से मेरा स्मरण करो और युद्ध भी करो। इस प्रकार मुझमें अर्पण किये हुए मन - बुद्धि से युक्त होकर तुम नि:सन्देह मुझको ही प्राप्त करोगे।

English - Therefore, Arjuna, think of Me all times and fight. With mind and intellect thus set on Me, you will doubtless attain Me.

सन्धिः -			
	तस्मात्+सर्वेषु	तस्मात्सर्वेषु	चर्त्व-सन्धिः[1]
	मयि+अर्पितमनोबुद्धिः	मय्यर्पितमनोबुद्धिः	यण्-सन्धिः[2]
	अर्पितमनोबुद्धिः+माम्	अर्पितमनोबुद्धिर्माम्	रेफ-सन्धिः[3]

1 खरि च (८।४।५५)

2 इको यणचि (६।१।७७)

3 ससजुषो रुः (८।२।६६)

	एव+एष्यसि	एवैष्यसि	वृद्धि-सन्धिः[1]
	एष्यसि+असंशयम्	एष्यस्यसंशयम्	यण्-सन्धिः[2]

समासः -	अर्पितमनोबुद्धिः	मनः च बुद्धिः च मनोबुद्धी	इतरेतरयोग-द्वन्द्व
		अर्पिते मनोबुद्धी येन सः	तृतीयार्थ-बहुव्रीहिः
	असंशयम्	न संशयः असंशयः तम्	नञ्-तत्पुरुषः

पदार्थकोशः

कालेषु	सर्वदा [सुबो०]।
माम्	मत्स्मृत्या मद्भावम् [चतु०]।
अनुस्मर	चिन्तय अनुचिन्तय [सुबो०]। प्राप्य [चतु०]।
च	चकारात् कर्मोपास्त्योः समुच्चयः अवगम्यते [चतु०]।
युध्य	चलचित्तशुद्ध्यर्थं युद्धादिकं स्वधर्मञ्च अनुतिष्ठ [सुबो०]।
मयि	वासुदेवे [टि०]।
अर्पितमनोबुद्धिः	अर्पिते मनोबुद्धी यस्य तव स त्वं अर्पितमनोबुद्धिः [शा०]।
	अर्पितं मनः सङ्कल्पात्मकं बुद्धिश्च व्यवसायात्मिका [सुबो०]।
	अर्पिते मदेकनिष्ठतां नीते मनोबुद्धी येन सः [चतु०]।
असंशयम्	न संशयः [शा०]।
माम्	यथास्मृतम् [टि०]।
एष्यसि	आगमिष्यसि [शा०]। प्राप्स्यसि [सुबो०/चतु०]।

❖ *निष्कामानाम् अनन्यभक्तानां भगवद्भजनम् एव सर्वसिद्धिकरम्* ❖

(३८) **अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।**
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥ राजविद्याराजगुह्ययोगः **०९-२२॥**

पदच्छेदः अनन्याः चिन्तयन्तः माम् ये जनाः पर्युपासते।
तेषाम् नित्य-अभियुक्तानाम् योग-क्षेमम् वहामि अहम्॥

---

1 वृद्धिरेचि (६।१।८८)
2 इको यणचि (६।१।७७)

अन्वयः - ये अनन्याः जनाः मां चिन्तयन्तः पर्युपासते तेषां नित्याभियुक्तानां योगक्षेमम् अहं वहामि।

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
ये	यद् [पुं-प्र-बहु]	**तेषाम्**	तद् [पुं-ष-बहु]
अनन्याः	अनन्य [पुं-प्र-बहु]	**नित्याभि-युक्तानाम्**	नित्य-अभि-युज् [कृत्-प्रत्ययः-क्त-पुं-ष-बहु]
जनाः	जन [पुं-प्र-बहु]	**योगक्षेमम्**	योगक्षेम [पुं-द्वि-एक]
माम्	अस्मद् [द्वि-एक]	**अहम्**	अस्मद् [प्र-एक]
चिन्तयन्तः	चिन्त् [कृत्-प्रत्ययः-शतृ-पुं-प्र-बहु]	**वहामि**	वह् [कर्तरि-लट्-उ-एक-परस्मै]
पर्युपासते	परि-उप-आस् [कर्तरि-लट्-प्र-बहु-आत्मने]		

पदार्थः

मूलम्	**हिन्दी**	**English**
ये	जो	who
अनन्याः	अनन्य प्रेमी	devotedly loving
जनाः	भक्तजन	persons
माम्	मुझको	unto Me
चिन्तयन्तः	चिन्तन करते हुए	concentrating
पर्युपासते	निष्कामभाव से भजते हैं	properly worship
तेषाम्	उन	their
नित्याभियुक्तानाम्	नित्य रूप से चिन्तन करने वालों का	always fixed in devotion
योगक्षेमम्	योगक्षेम	requirements and security
अहम्	मैं	I
वहामि	करता हूँ	carry

भावार्थः

हिन्दी - जो अनन्य प्रेमी भक्त जन मुझ परमेश्वर को निरन्तर चिन्तन करते हुए निष्काम भाव से भजन करते हैं, नित्य-निरन्तर मेरा चिन्तन करने वाले उन पुरुषों का योगक्षेम मैं स्वयं प्रदान करता हूँ।

English - The devotees, who devotedly loving, constantly think of Me, and worship Me without any desires in return, to those ever united in thought with Me I bring full security and personally attend to their needs.

सन्धिः -	अनन्याः+चिन्तयन्तः	अनन्याश्चिन्तयन्तः	सत्व>श्चुत्व-सन्धिः[1]
	चिन्तयन्तः+माम्	चिन्तयन्तो माम्	रुत्व>उत्व>गुण-सन्धिः[2]
	वहामि+अहम्	वहाम्यहम्	यण्-सन्धिः[3]

समासः -	अनन्याः	न अन्यः येषां ते	नञर्थ-बहुव्रीहिः
	नित्याभियुक्तानाम्	नित्यं अभियुक्ताः नित्याभियुक्ताः तेषां	कर्मधारयः
	योगक्षेमम्	योगः च क्षेमं च योगक्षेमम्	समाहार-द्वन्द्वः

पदार्थकोशः

अनन्याः अपृथग्भूताः परं देवं नारायणमात्मत्वेन [शा०]। नास्ति अन्य उपास्यो येषाम् [चतु०]। न विद्यते मत्त ईश्वरात् अन्य उपास्यो येषां ते [पै०]। नास्ति मद्व्यतिरेकेणाऽन्यत् काम्यं भजनीयं देवतान्तरं येषां ते [सुबो०]।

जनाः सन्न्यासिनः [शा०]। नराः [पै०]।

माम् अहमेव भगवान् वासुदेव इति अभेदेन [चतु०]।

पर्युपासते सेवन्ते [सुबो०]। परितः साकल्येन कात्स्र्न्येन अद्वैतदृष्ट्या इत्यर्थः उपासते [चतु०]।

तेषाम् परमार्थदर्शिनाम् [शा०]।

नित्याभियुक्तानाम् सतताभियोगिनाम् [शा०/चतु०]। सर्वदा मदेकनिष्ठानाम् [सुबो०]।

योगक्षेमम् योगः अप्राप्तस्य प्रापणं क्षेमः तद्रक्षणं तद् उभयम् [शा०]। योगश्च क्षेमश्च [पै०]। योगं धनादिलाभम्; क्षेमञ्च तत्पालनं मोक्षाख्यम् [सुबो०]। योगः अप्राप्तस्य अन्नादेः योगभूमिकाया वा प्रापणम्; क्षेमः तस्यैव प्राप्तस्य संरक्षणम् [चतु०]। योगः अप्रतिलब्धमत्स्वरूप लाभः; क्षेमं प्राप्तभगवत्स्वरूपप्रतिष्ठालाभपरिरक्षणम्[गीता०]।

वहामि प्रापयामि [शा०/सुबो०]। विभर्ति [पै०]। निर्वहामि [चतु०]।

---

1 विसर्जनीयस्य सः (८।३।३४)>स्तोः श्चुना श्चुः (८।४।४०)

2 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)

3 इको यणचि (६।१।७७)

❖ अर्जुनस्य भगवदाराधने प्रवर्तनम् ❖

(३९) **यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।**
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥ राजविद्याराजगुह्ययोगः **०९-२७॥**

पदच्छेदः यत् करोषि यत् अश्नासि यत् जुहोषि ददासि यत्।
यत् तपस्यसि कौन्तेय तत् कुरुष्व अस्मत्-अर्पणम्॥

अन्वयः - कौन्तेय (त्वम्) यत् करोषि यत् अश्नासि यत् जुहोषि यत् ददासि यत् तपस्यसि (च) तत् मदर्पणं कुरुष्व।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
कौन्तेय	कौन्तेय [पुं-सं-एक]	यत्	यद् [नपुं-द्वि-एक]
(त्वम्)	(युष्मद् [प्र-एक])	ददासि	दा [कर्तरि-लट्-म-एक-परस्मै]
यत्	यद् [नपुं-द्वि-एक]	यत्	यद् [नपुं-द्वि-एक]
करोषि	कृ [कर्तरि-लट्-म-एक-परस्मै]	तपस्यसि	तप् [कर्तरि-लृट्-म-एक-परस्मै]
यत्	यद् [नपुं-द्वि-एक]	(च)	(च [अव्य])
अश्नासि	अश् [कर्तरि-लट्-म-एक-परस्मै]	तत्	तद् [नपुं-द्वि-एक]
यत्	यद् [नपुं-द्वि-एक]	मदर्पणम्	मदर्पण [नपुं-प्र-एक]
जुहोषि	हु [कर्तरि-लट्-म-एक-परस्मै]	कुरुष्व	कृ [कर्तरि-लोट्-म-एक-आत्मने]

पदार्थः

मूलम्	हिन्दी	English
कौन्तेय	हे अर्जुन	O son of Kunti
(त्वम्)	(तुम)	you
यत्	जो	whatever
करोषि	करते हो	do
यत्	जो	whatever
अश्नासि	खाते हो	eat
यत्	जो	whatever
जुहोषि	हवन करते हो	offer

यत्	जो	whatever
ददासि	दान देते हो	give away
यत्	जो	whatever
तपस्यसि	तप करते हो	perform austerities
(च)	(और)	also
तत्	वह (सब)	that
मदर्पणम्	मुझको अर्पण	offering unto Me
कुरुष्व	करो	make

भावार्थः

हिन्दी - हे अर्जुन ! तुम जो करते हो, जो खाते हो, जो हवन करते हो, जो दान देते हो, जो तप करते हो और वह सब कुछ मुझको अर्पण करो।

English - Arjuna, whatever you do, whatever you eat, whatever you offer as oblation to the sacred fire, whatever you bestow as a gift, whatever you do by way of penance, offer it all to Me.

सन्धिः -	यत्+करोषि	यत्करोषि	चर्त्व-सन्धिः[1]
	यत्+अश्नासि	यदश्नासि	जश्त्व-सन्धिः[2]
	यत्+जुहोषि	यज्जुहोषि	जश्त्व >श्चुत्व-सन्धिः[3]
	यत्+तपस्यसि	यत्तपस्यसि	चर्त्व-सन्धिः[4]
	तत्+कुरुष्व	तत्कुरुष्व	चर्त्व-सन्धिः[5]

समासः -	मदर्पणम्	मयि अर्पणम्	सप्तमी-तत्पुरुषः

1 खरि च (८।४।५५)
2 झलां जशोऽन्ते (८।२।३९)
3 झलां जशोऽन्ते (८।२।३९)>स्तोः श्चुना श्चुः (८।४।४०)
4 खरि च (८।४।५५)
5 खरि च (८।४।५५)

पदार्थकोश:

यत्	लौकिकं वैदिकं वा कर्म [पै०]। स्वभावतो वा शास्त्रतो वा यत् किञ्चित् कर्म [सुबो०]।
करोषि	गमनादिकं तत् भगवत एव प्रदक्षिणादिकं करोमीति मत्प्रीत्यर्थम् [चतु०]।
यत्	ओदनादि [पै०]।
अश्नासि	भुङ्क्षे [पै०]।
यत्	आज्यादि [पै०]।
जुहोषि	देवतार्थम् [पै०]।
यत्	हिरण्यादिकम् [पै०]।
ददासि	प्रयच्छसि ब्राह्मणादिभ्य: हिरण्यान्नाज्यादि [शा०]।
यत्	कृच्छ्रचान्द्रायणादिकम् [पै०]।
तपस्यसि	तप: चरसि [शा०]। तप: करोषि [सुबो०]।
तत्	सर्वम् [सुबो०]।
मदर्पणम्	मत्समर्पणम् [शा०]। मदाराधनम् [पै०]। मयि अर्पितम् [सुबो०]। मन्मयत्वेन भावनम् [गीता०]।

==

❖ *ईश्वरभजनस्येतिकर्तव्यताप्रदर्शनम्। भक्ते: स्वरूपम्, तस्या: सुलभप्रकार:, फलं च* ❖

(४०) **मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।**
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायण:॥ राजविद्याराजगुह्ययोग: **०९-३४॥**

पदच्छेद: मत्-मना: भव मत्-भक्त: मत्-याजी माम् नमस्कुरु।
माम् एव एष्यसि युक्त्वा एवम् आत्मानम् मत्-परायण:॥

अन्वय: - मन्मना: मद्भक्त: (च) मद्याजी भव मां नमस्कुरु एवम् आत्मानं युक्त्वा मत्परायण: (त्वम्) माम् एव एष्यसि।

पदपरिचय:

मूलम्	पदपरिचय:	मूलम्	पदपरिचय:
मन्मना:	मन्मनस् [पुं-प्र-एक]	**आत्मानम्**	आत्मन् [पुं-द्वि-एक]

मद्भक्तः	मद्भक्त [पुं-प्र-एक]	**युक्त्वा**	युज् [कृत्-प्रत्ययः-क्त्वा]
(च)	(च [अव्य])	**मत्परायणः**	मत्परायण [पुं-प्र-एक]
मद्याजी	मद्याजिन् [पुं-प्र-एक]	**(त्वम्)**	(युष्मद् [प्र-एक])
भव	भू [कर्तरि-लोट्-म-एक-परस्मै]	**माम्**	अस्मद् [द्वि-एक]
माम्	अस्मद् [द्वि-एक]	**एव**	एव [अव्य]
नमस्कुरु	नमस्-कृ [कर्तरि-लोट्-म-एक-उभयपदी]	**एष्यसि**	इ [कर्तरि-लृट्-म-एक-परस्मै]
एवम्	एवम् [अव्य]		

पदार्थः

मूलम्	**हिन्दी**	**English**
मन्मनाः	मेरे मनवाले	always thinking of Me
मद्भक्तः	मेरे भक्त	my devotee
(च)	(और)	and
मद्याजी	मेरा पूजन करने वाले	my worshipper
भव	बनो	become
माम्	मुझको	unto Me
नमस्कुरु	प्रणाम करो	offer obeisances
एवम्	इस प्रकार	thus
आत्मानम्	आत्मा को	your soul
युक्त्वा	नियुक्त करके	being absorbed
मत्परायणः	मेरे परायण होकर	devoted to Me
(त्वम्)	(तुम)	you
माम्	मुझको	unto Me
एव	ही	completely
एष्यसि	प्राप्त करोगे	come

भावार्थः

हिन्दी - मुझमें मनवाला हो जाओ, मेरे भक्त बन जाओ, मेरा पूजन करने वाले बनो, मुझको प्रणाम करो। इस प्रकार आत्मा को मुझमें नियुक्त करके मेरे परायण होकर तुम मुझको ही प्राप्त करोगे।

English - Fix your mind on Me, be devoted to Me, worship Me and make obeisance to Me, thus linking your self with Me and entirely depending on Me, you shall come to Me.

सन्धिः -	मन्मनाः+भव	मन्मना भव	रुत्व>यत्व>लोप-सन्धिः[1]
	मद्भक्तः+मद्याजी	मद्भक्तो मद्याजी	रुत्व>उत्व>गुण-सन्धिः[2]
	एव+एष्यसि	एवैष्यसि	वृद्धि-सन्धिः[3]
	युक्त्वा+एवम्	युक्त्वैव	वृद्धि-सन्धिः[4]

समासः -	मन्मनाः	मयि मनः यस्य सः	षष्ठ्यर्थ-बहुव्रीहिः
	मद्भक्तः	मम भक्तः	षष्ठी-तत्पुरुषः
	मद्याजी	माम् यजति	उपपदम्
	मत्परायणः	अहं परायणम् यस्य सः	षष्ठ्यर्थ-बहुव्रीहिः

पदार्थकोशः

मन्मनाः मयि मनो यस्य स त्वं मन्मनाः [शा०/पै०/सुबो०]।
मय्येव मनो यस्य न पुत्रादौ सः [चतु०]।

मद्भक्तः मयि भक्तिः यस्य सः [पै०]। मत्सेवकः [सुबो०]।
ममैव भक्तो न राजादेर्धनाद्यर्थं सः [चतु०]।

मद्याजी मद्यजनशीलः [शा०]। मां यष्टुं शीलं यस्य इति सः [पै०]।
मद्यजनशीलः [सुबो०]। मदर्थमेव यजते न स्वर्गाद्यर्थं सः [चतु०]।

भव जायस्व [पै०]।

माम् ईश्वरम् [पै०]।

नमस्कुरु वन्दस्व [पै०]। शरणं व्रज [चतु०]।

एवम् उक्तेन प्रकारेण [पै०]। एभिः प्रकारैः [सुबो०]। अनेन प्रकारेण [चतु०]।

आत्मानम् मनः [सुबो०]। सर्वान्तरम् [चतु०]।

---

1 ससजुषो रुः (८।२।६६)>भोभगोअघो अपूर्वस्य योऽशि (८।३।१७)>हलि सर्वेषाम् (८।३।२२)
2 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
3 वृद्धिरेचि (६।१।८८)
4 वृद्धिरेचि (६।१।८८)

युक्त्वा	समाधाय चित्तम् [शा०]। समाधाय [पै०/सुबो०]। योगं कृत्वा [चतु०]।
मत्परायणः	अहमेव वासुदेवः परमयनम् आश्रयो यस्य सः [पै०]।
	अहमेव सर्वोपाधिशून्यः चिदात्मा परं सर्वोत्कृष्टमयनं प्राप्य यस्य सः [चतु०]।
माम्	ईश्वरम् [शा०]। परमानन्दस्वरूपम् [सुबो०]।
एष्यसि	आगमिष्यसि [शा०]। प्राप्स्यसि [पै०/सुबो०/चतु०]।

==

❖ *प्राणिकर्मानुरूपोत्पत्स्यमानानि भगवत्कार्याणि तज्ज्ञानफलं च* ❖

(४१) **बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः**
सुखं दुःखं भवोऽभावो भयं चाभयमेव च॥ विभूतियोगः १०-०४॥

(४२) **अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः**
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः॥ विभूतियोगः १०-०५॥

पदच्छेदः बुद्धिः ज्ञानम् सम्-मोहः क्षमा सत्यं दमः शमः।
सुखं दुःखं भवः अ-भावः भयं च अ-भयम् एव च॥
अ-हिंसा समता तुष्टिः तपः दानं यशः अ-यशः।
भवन्ति भावा भूतानां मत् तः एव पृथक् विधाः॥

अन्वयः - बुद्धिः ज्ञानम् असम्मोहः क्षमा सत्यं दमः शमः एव सुखं दुःखम् भवः अभावः च भयम् अभयं च अहिंसा समता तुष्टिः तपः दानं यशः अयशः (इति) भूतानां पृथग्विधाः भावाः मत्तः एव भवन्ति।

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
बुद्धिः	बुद्धि [स्त्री-प्र-एक]	**च**	च [अव्य]
ज्ञानम्	ज्ञान [नपुं-प्र-एक]	**अहिंसा**	अहिंसा [स्त्री-प्र-एक]
असम्मोहः	असम्मोह [पुं-प्र-एक]	**समता**	समता [स्त्री-प्र-एक]
क्षमा	क्षमा [स्त्री-प्र-एक]	**तुष्टिः**	तुष्टि [स्त्री-प्र-एक]
सत्यम्	सत्य [नपुं-प्र-एक]	**तपः**	तपस् [नपुं-प्र-एक]
दमः	दम [पुं-प्र-एक]	**दानम्**	दान [नपुं-प्र-एक]

शमः	शम [पुं-प्र-एक]	**यशः**	यशस् [नपुं-प्र-एक]
एव	एव [अव्य]	**अयशः**	अयशस् [नपुं-प्र-एक]
सुखम्	सुख [नपुं-प्र-एक]	**(इति)**	(इति [अव्य])
दुःखम्	दुःख [नपुं-प्र-एक]	**भूतानाम्**	भूत [पुं-ष-बहु]
भवः	भव [पुं-प्र-एक]	**पृथग्विधाः**	पृथग्विध [पुं-प्र-बहु]
अभावः	अभाव [पुं-प्र-एक]	**भावाः**	भाव [पुं-प्र-बहु]
च	च [अव्य]	**मत्तः**	मत्त [तसिल्]
भयम्	भय [नपुं-प्र-एक]	**एव**	एव [अव्य]
अभयम्	अभय [नपुं-प्र-एक]	**भवन्ति**	भू [कर्तरि-लट्-प्र-बहु-परस्मै]

पदार्थः

मूलम्	**हिन्दी**	**English**
बुद्धिः	बुद्धि	intelligence
ज्ञानम्	ज्ञान	knowledge
असम्मोहः	असंमूढता	freedom from doubt
क्षमा	क्षमा	forgiveness
सत्यम्	सत्य	truthfulness
दमः	इन्द्रियों को वश में करना	control of the senses
शमः	मन का निग्रह	control of the mind
एव	तथा	also
सुखम्	सुख	happiness
दुःखम्	दुःख	distress
भवः	उत्पत्ति	birth
अभावः	प्रलय	death
च	और	and
भयम्	भय	fear
अभयम्	अभय	without fear
च	तथा	and
अहिंसा	अहिंसा	nonviolence
समता	समता	equilibrium
तुष्टिः	संतोष	satisfaction

तपः	तप	penance
दानम्	दान	charity
यशः	कीर्ति	fame
अयशः	अपकीर्ति	infamy
(इति)	(ऐसे)	thus
भूतानाम्	प्राणियों के	of living entities
पृथग्विधाः	अलग प्रकार के	differently arranged
भावाः	भाव	natures
मत्तः	मुझसे	from Me
एव	ही	certainly
भवन्ति	होते हैं	become

भावार्थः

हिन्दी - निश्चय करने की शक्ति, यथार्थ ज्ञान, असम्मूढता, क्षमा, सत्य, इन्द्रियों का वश में करना, मन का निग्रह तथा सुख-दु:ख, उत्पत्ति-प्रलय और भय-अभय तथा नाना प्रकार के भाव निश्चित रूप से मुझसे ही होते हैं।

English - Intellect, right knowledge, unclouded understanding, forgiveness, truthfulness, control over the senses and mind, joy and sorrow, evolution and dissolution, fear and fearlessness, non-violence, equanimity, contentment, austerity, charity, fame and infamy, these diverse traits of entities emanate from Me alone.

सन्धिः -	बुद्धिः+ज्ञानम्	बुद्धिर्ज्ञानम्	रेफ-सन्धिः[1]
	भवः+अभावः	भवोऽभावः	रुत्व >उत्व>गुण>पूर्वरुप-सन्धिः[2]
	अभावः+भयं	अभावो भयं	रुत्व>उत्व>गुण-सन्धिः[3]
	च+अभयं	चाभयं	सवर्णदीर्घ-सन्धिः[4]

1 ससजुषो रुः (८।२।६६)

2 ससजुषो रुः (८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)>आद्गुणः (६।१।८७)>एङः पदान्तादति (६।१।१०९)

3 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)

4 अकः सवर्णे दीर्घः (६।१।१०१)

तुष्टिः+तपः	तुष्टिस्तपः	सत्व-सन्धिः[1]
तपः+दानं	तपो दानं	रुत्व>उत्व>गुण-सन्धिः[2]
यशः+अयशः	यशोऽयशः	रुत्व >उत्व>गुण>पूर्वरुप-सन्धिः[3]
भावाः+भूतानां	भावा भूतानां	रुत्व>यत्व>लोप-सन्धिः[4]
मत्तः+एव	मत्त एव	रुत्व >यत्व>लोप-सन्धिः[5]

समासः -	असम्मोहः	न सम्मोहः	नञ्-तत्पुरुषः
	अभावः	न भावः	नञ्-तत्पुरुषः
	अभयम्	न भयम्	नञ्-तत्पुरुषः
	अहिंसा	न हिंसा	नञ्-तत्पुरुषः
	अयशः	न यशः यस्य	नञर्थ-बहुव्रीहिः
	पृथग्विधाः	पृथक् विधम् यस्य सः पृथग्विधः ते	षष्ठ्यर्थ-बहुव्रीहिः

पदार्थकोशः

बुद्धिः बुद्धिः अन्तःकरणस्य सूक्ष्माद्यर्थावबोधनसामर्थ्यम् [शा०]। सूक्ष्मावबोधसामर्थ्यम् [पै०]। सारासारविवेके नैपुण्यम् [सुबो०]। अन्तःकरणस्य सूक्ष्मार्थावबोधने सामर्थ्यम् [चतु०]।

ज्ञानम् आत्मादिपदार्थानाम् अवबोधः [शा०/चतु०]। पदार्थावबोधः [पै०]। आत्मविषयम् [सुबो०]।

असम्मोहः प्रत्युपपन्नेषु बोद्धव्येषु विवेकपूर्विका प्रवृत्तिः [शा०]। उपस्थितप्रतिपत्तिसामर्थ्यम् [पै०]। व्याकुलत्वाभावः [सुबो०]। प्रत्युत्पन्नेषु बोद्धव्येषु अव्याकुलतया विवेकपूर्विका प्रतिपत्तिः [चतु०]। उत्साहः [गीता०]।

क्षमा आक्रुष्टस्य ताडितस्य वा अविकृतचित्तता [शा०/पै०]। सहिष्णुत्वम् [सुबो०]। आकृष्टस्य ताडितस्य वाऽविकृतचित्तता [चतु०]।

सत्यम् यथादृष्टस्य यथाश्रुतस्य च आत्मानुभवस्य परबुद्धिसङ्क्रान्तये तथा एव उच्चार्यमाणा वाक् सत्यम् उच्यते [शा०]। यथादृष्टश्रुतार्थप्रतिपादनम् [पै०]। यथार्थभाषणम् [सुबो०]।

---

1 विसर्जनीयस्य सः (८।३।३४)
2 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद्गुणः (६।१।८७)
3 ससजुषो रुः (८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)>आद्गुणः (६।१।८७)>एङः पदान्तादति (६।१।१०९)
4 ससजुषो रुः (८।२।६६)>भोभगोअघो अपूर्वस्य योऽशि (८।३।१७)>हलि सर्वेषाम् (८।३।२२)
5 ससजुषो रुः (८।२।६६)>भोभगो अघो अपूर्वस्य योऽशि (८।३।१७)>लोपः शाकल्यस्य (८।३।१९)

	प्रमाणेनावगतस्यार्थस्य यथार्थत्वेन भाषणम् [चतु०]।
दमः	बाह्येन्द्रियोपशमः [शा०]। कर्मेन्द्रियोपरतिः [पै०]।
	बाह्येन्द्रियसंयमः [सुबो०]। बाह्येन्द्रियनियमः [चतु०]।
शमः	अन्तःकरणस्य उपशमः [शा०]। अन्तःकरणोपरतिः [पै०]।
	अन्तःकरणसंयमः [सुबो०]। मनोनिग्रहः [चतु०]।
सुखम्	आह्लादः [शा०/पै०/चतु०]। अनुकूलसंवेदनीयम् [सुबो०]।
दुःखम्	सन्तापः [शा०]। तापः [पै०/चतु०]। तद्विपरीतम् [सुबो०]।
भवः	उद्भवः [शा०/पै०/सुबो०]। उत्पत्तिः [चतु०]।
अभावः	तद्विपर्ययः [शा०/पै०]। तद्विपरीतः [सुबो०]। भावः सत्ता तद्विपर्ययः [चतु०]।
भयम्	त्रासः [शा०/पै०/सुबो०/चतु०]।
अभयम्	तद्विपरीतम् [शा०/सुबो०/चतु०]। तद्विपर्ययः [पै०]।
अहिंसा	अपीडा प्राणिनाम् [शा०/पै०/चतु०]। परपीडानिवृत्तिः [सुबो०]।
समता	समचित्तता [शा०/पै०]। रागद्वेषराहित्यम् मित्रामित्रतुल्यता च [सुबो०]।
	मित्रामित्रादौ समचित्तता [चतु०]।
तुष्टिः	सन्तोषः पर्याप्तबुद्धिः लाभेषु [शा०]। सन्तोषः [पै०]। दैवलब्धेन सन्तोषः [सुबो०]।
	सन्तोषो लब्धे पर्याप्तबुद्धिः [चतु०]।
तपः	इन्द्रियसंयमपूर्वकं शरीरपीडनम् [शा०/चतु०]। इन्द्रियनिग्रहपूर्वकः कायक्लेशः [पै०]।
	शारीरादिवक्ष्यमाणम् [सुबो०]।
दानम्	यथाशक्ति संविभागः [शा०/पै०/चतु०]।
	न्यायार्जितस्य धनादेः सत्पात्रे समर्पणम् न्यायार्जितस्य धनादेः सत्पात्रे अर्पणम् [सुबो०]।
यशः	धर्मनिमित्ता कीर्तिः [शा०/पै०/चतु०]। सत्कीर्तिः [सुबो०]।
अयशः	अधर्मनिमित्ता अकीर्तिः [शा०/पै०/चतु०]। अपकीर्तिः [सुबो०]।
भूतानाम्	प्राणिनाम् [शा०/पै०/सुबो०/चतु०]।
पृथग्विधाः	नानाविधाः स्वकर्मानुरूपेण [शा०]। पृथक्प्रकाराः [पै०]।
	नानाविधाः [सुबो०]। प्रत्येकं नानाप्रकाराः [चतु०]।
भावाः	पदार्थाः [पै०]। बुद्ध्यादयो विंशतिः भावाः [चतु०]।
मत्तः	ईश्वरात् [शा०]। परमेश्वरात् [पै०]।
एव	अवधारणे [पै०]।
भवन्ति	जायन्ते [पै०]।

❖ *भगवद्भक्तानां प्रेमोपासनारूपं तत्फलं च* ❖

(४३) **मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्**
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥ विभूतियोगः १०-०९॥

पदच्छेदः मत् चित्ता मद्गत-प्राणा बोधयन्तः परस्परम्।
कथयन्तः च मां नित्यं- तुष्यन्ति च रमन्ति च॥

अन्वयः - मच्चित्ताः (च) मद्गतप्राणाः परस्परम् बोधयन्तः च मां कथयन्तः च नित्यं तुष्यन्ति च रमन्ति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
मच्चित्ताः	मच्चित्त [पुं-प्र-बहु]	**कथयन्तः**	कथ [कृत्-प्रत्ययः-शतृ-पुं-प्र-बहु]
मद्गतप्राणाः	मद्गतप्राण [पुं-प्र-बहु]	**च**	च [अव्य]
परस्परम्	परस्परम् [अव्य]	**नित्यम्**	नित्य [नपुं-द्वि-एक]
बोधयन्तः	बुध्-णिच् [कृत्-प्रत्ययः-क्त-पुं-प्र-बहु]	**तुष्यन्ति**	तुष् [कर्तरि-लट्-प्र-बहु-परस्मै]
च	च [अव्य]	**च**	च [अव्य]
माम्	अस्मद् [द्वि-एक]	**रमन्ति**	रम् [कर्तरि-लट्-प्र-बहु-परस्मै]

पदार्थः

मूलम्	हिन्दी	English
मच्चित्ताः	मेरे चित्त वाले	minds fully engaged in Me
मद्गतप्राणाः	मेरे लिए प्राण देने वाले	lives devoted to Me
परस्परम्	आपस में	among themselves
बोधयन्तः	जानते हुए	enlightening
च	तथा	also
माम्	मेरा	about Me
कथयन्तः	कथन करते हुए	talking
च	ही	also
नित्यम्	निरन्तर	perpetually
तुष्यन्ति	संतुष्ट होते हैं	remain contented
च	और	also
रमन्ति	रमण करते हैं	enjoy transcendental bliss

भावार्थः

हिन्दी - निरन्तर मुझमें मन लगाने वाले और मुझमें ही प्राण को अर्पण करने वाले भक्तजन मेरी भक्ति की चर्चा के द्वारा, आपस में मेरा कथन करते हुए ही निरन्तर सन्तुष्ट होते हैं और मुझमें ही निरन्तर रमण करते हैं।

English - With their mind fixed on Me, and their lives surrendered to Me, enlightening one another about Me and talking about Me, My devotees ever remain contented and take delight in Me.

सन्धिः -	मच्चित्ताः+मद्गतप्राणाः	मच्चित्ता मद्गतप्राणाः	रुत्व>यत्व>लोप-सन्धिः[1]
	मद्गतप्राणाः+बोधयन्तः	मद्गतप्राणा बोधयन्तः	रुत्व>यत्व>लोप-सन्धिः[2]
	कथयन्तः+च	कथयन्तश्च	सत्व>श्चुत्व-सन्धिः[3]

समासः -	मच्चित्ताः	मयि चित्तम् यस्य सः मच्चित्तः ते	षष्ठ्यर्थ-बहुव्रीहिः
	मद्गतप्राणाः	मां गतः मद्गतः,	द्वितीया-तत्पुरुषः
		मद्गतः प्राणः यस्य सः मद्गतप्राणः ते	षष्ठ्यर्थ-बहुव्रीहिः

पदार्थकोशः

मच्चित्ताः मयि चित्तं येषां ते मच्चित्ताः [शा०/सुबो०]।
मद्गतचित्ता [पै०]। अहमेव चित्ते येषां ते [चतु०]।

मद्गतप्राणाः मां गताः प्राप्ताः चक्षुरादयः प्राणाः येषां ते मद्गतप्राणाः, मयि उपसंहृतकरणाः इत्यर्थः। अथवा, मद्गतप्राणाः मद्गतजीवनाः [शा०]। मयि व्यवस्थितप्राणाः मद्गतजीवना [पै०]। मामेव गताः प्राप्ताः प्राणाः इन्द्रियाणि येषां ते, मदर्पितजीवनाः इति वा [सुबो०]। अहमेव गतो विद्यमानो येषु ते मद्गताः तथाविधाः प्राणाः इन्द्रियाणि येषां ते [चतु०]।

परस्परम् अन्योन्यम् [शा०/पै०/सुबो०]। अन्योन्यबोधस्फारसङ्क्रमणात् [गीता०]।

बोधयन्तः अवगमयन्तः [शा०]। श्रुतियुक्तिप्रदर्शनेन समानानां समुदायं ज्ञापयन्तः [चतु०]। स्वानुभवसंवादेन ज्ञापयन्तः [गीता०]।

---

1 ससजुषो रुः (८।२।६६)>भोभगोअघो अपूर्वस्य योऽशि (८।३।१७)>हलि सर्वेषाम् (८।३।२२)
2 ससजुषो रुः (८।२।६६)>भोभगोअघो अपूर्वस्य योऽशि (८।३।१७)>हलि सर्वेषाम् (८।३।२२)
3 विसर्जनीयस्य सः (८।३।३४)>स्तोः श्चुना श्चुः (८।४।४०)

माम्	ज्ञानबलवीर्यादिधर्मैः विशिष्टम् [शा०]। ईश्वरं निरतिशयज्ञानबलवीर्यसम्पन्नम् [पै०]।
कथयन्तः	सङ्कीर्तयन्तः [सुबो०]।
तुष्यन्ति	परितोषम् उपयान्ति [शा०]। अनुमोदनेन तुष्टिं यान्ति [सुबो०]।
रमन्ति	रतिं च प्राप्नुवन्ति प्रियसङ्गत्या इव [शा०]। निर्वृत्तिं यान्ति [सुबो०]।

===

❖ *ईश्वरार्थकर्मादियुक्तस्य तत्प्राप्तिप्रतिपादनम्* ❖

(४४) **मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः**
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव॥ विश्वरूपदर्शनयोगः **११-५५॥**

पदच्छेदः मत् कर्म-कृत् मत् परमः मत् भक्तः सङ्ग-वर्जितः।
निः- वैरः सर्व-भूतेषु यः स माम् इति पाण्डव॥

अन्वयः - पाण्डव यः मत्कर्मकृत् मत्परमः मद्भक्तः सङ्गवर्जितः (च) सर्वभूतेषु निर्वैरः (अस्ति) सः माम् एति।

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
पाण्डव	पाण्डव [पुं-सं-एक]	**सर्वभूतेषु**	सर्वभूत [पुं-स-बहु]
यः	यद् [पुं-प्र-एक]	**निर्वैरः**	निर्वैर [पुं-प्र-एक]
मत्कर्मकृत्	मत्कर्मकृत् [पुं-प्र-एक]	**(अस्ति)**	(अस् [कर्तरि-लट्-प्र-एक-परस्मै])
मत्परमः	मत्परम [पुं-प्र-एक]	**सः**	तद् [पुं-प्र-एक]
मद्भक्तः	मद्भक्त [पुं-प्र-एक]	**माम्**	अस्मद् [द्वि-एक]
सङ्गवर्जितः	सङ्गवर्जित [पुं-प्र-एक]	**एति**	इ[कर्तरि-लट्-प्र-एक-परस्मै]

पदार्थः

मूलम्	**हिन्दी**	**English**
पाण्डव	हे अर्जुन!	O Arjuna
यः	जो पुरुष केवल	one who
मत्कर्मकृत्	मेरे लिये कर्मों को करने वाला	engaged in doing My work

मत्परमः	मेरे परायण	depends on Me
मद्भक्तः	मेरा भक्त	engaged in My devotional service
सङ्गवर्जितः	आसक्तिरहित	has no attachment
(च)	(और)	also
सर्वभूतेषु	सब प्राणियों में	to every living entity
निर्वैरः	वैरभाव से रहित	without an enemy
(अस्ति)	है	is
सः	वह	he
माम्	मुझको	unto Me
एति	प्राप्त करता है।	attains

भावार्थः

हिन्दी : हे अर्जुन ! जो पुरुष केवल मेरे ही लिये सम्पूर्ण कर्तव्य कर्मों को करने वाला है, मेरे परायण है, मेरा भक्त है, आसक्तिरहित है और सम्पूर्ण भूत प्राणियों में वैरभाव से रहित है, वह अनन्य भक्ति युक्त पुरुष मुझको ही प्राप्त होता है।

English: O Arjuna, he who performs all his duties for My sake, depends on Me, is devoted to Me; has no attachment, and is free from malice towards all beings, attains Me.

सन्धिः -	मत्कर्मकृत्+मत्परमः	मत्कर्मकृन्मत्परमः	अनुनासिक-सन्धिः[1]
	मत्परमः+मद्भक्तः	मत्परमो मद्भक्तः	रुत्व>उत्व>गुण-सन्धिः[2]
	सः+माम्	स माम्	विसर्गलोप-सन्धिः[3]

समासः -	मत्कर्मकृत्	मम कर्म मत्कर्म	षष्ठी-तत्पुरुषः
		मत्कर्म करोति	उपपदम्

1 यरोऽनुनासिकेऽनुनासिको वा (८।४।४५)
2 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
3 एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६।१।१३२)

मत्परमः	मम परमः यस्य सः	षष्ठ्यर्थ-बहुव्रीहिः
मद्भक्तः	मम भक्तः	षष्ठी-तत्पुरुषः
सङ्गवर्जितः	सङ्गेन वर्जितः	तृतीया-तत्पुरुषः
सर्वभूतेषु	सर्वाणि च तानि भूतानि सर्वभूतानि तेषु	कर्मधारयः
निर्वैरः	निर्गतः वैरः यस्मात् सः	प्रादिबहुव्रीहिः

पदार्थकोशः

पाण्डव विशुद्धवंशज [चतु०]।

मत्कर्मकृत् मदर्थं कर्म मत्कर्म, तत् करोति इति मत्कर्मकृत् [शा०]। मदर्थं कर्म करोतीति [सुबो०]। मदर्थमेव कर्माणि करोतीति [चतु०]।

मत्परमः करोति भृत्यः स्वामिकर्म, न तु आत्मनः परमा प्रेत्य गन्तव्या गतिः इति स्वामिनं प्रतिपद्यते, अयं तु मत्कर्मकृत् माम् एव परमां गतिं प्रतिपद्यते इति मत्परमः, अहं परमः परा गतिः यस्य सः अयं मत्परमः [शा०]। अहं वासुदेवः परमं प्रधानं यस्य सः [पै०]। अहमेव परमः पुरुषार्थो यस्य सः [सुबो०]। अहमेव परमो निष्कलः प्राप्यो यस्य इति सः [चतु०]।

मद्भक्तः माम् एव सर्वप्रकारैः सर्वात्मना सर्वोत्साहेन भजते इति मद्भक्तः [शा०]। ममैव भक्तिम् आश्रितः [सुबो०]। मम भक्तः आराधनकृदित्युपासनाकाण्डार्थसङ्ग्रहः [चतु०]।

सङ्गवर्जितः धनपुत्रमित्रकलत्रबन्धुवर्गेषु सङ्गवर्जितः सङ्गः प्रीतिः स्नेहः तद्वर्जितः [शा०]। एकान्तभगवद्ध्याननिष्ठः [चतु०]।

सर्वभूतेषु शत्रुभावरहितः आत्मनः अत्यन्तापकारप्रवृत्तेषु [शा०]।

निर्वैरः निर्गतवैरः [शा०]। विश्वं भगवदात्मना पश्येत् [चतु०]।

माम् तत्पदलक्ष्यार्थभूतमखण्डानन्दैकघनम् [चतु०]।

एति प्राप्नोति [सुबो०]। प्राप्नोति प्रत्यगभेदेन [चतु०]।

==

❖ *सगुणनिर्गुणब्रह्मनिष्ठयोः मध्ये का श्रेष्ठा का च कर्तव्या इति अर्जुनस्य प्रश्नः* ❖

(४५) **अर्जुन उवाच**

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ भक्तियोगः **१२-०१॥**

पदच्छेदः एवम् सतत-युक्ताः ये भक्ताः त्वाम् पर्युपासते।
ये च अपि अक्षरम् अव्यक्तम् तेषाम् के योग-वित्तमाः॥

अन्वयः - ये भक्ताः एवं सततयुक्ताः त्वाम् पर्युपासते च ये अक्षरम् अव्यक्तम् अपि (पर्युपासते) तेषां योगवित्तमाः के (सन्ति)।

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
ये	यद्/यत् [पुं-प्र-बहु]	**ये**	यद् [पुं-प्र-बहु]
भक्ताः	भक्त [पुं-प्र-बहु]	**अक्षरम्**	अक्षर [नपुं-द्वि-एक]
एवम्	एवम् [अव्य]	**अव्यक्तम्**	अव्यक्त [नपुं-द्वि-एक]
सततयुक्ताः	सततयुक्त [पुं-प्र-बहु]	**अपि**	अपि [अव्य]
त्वाम्	युष्मद् [द्वि-एक]	**तेषाम्**	तद् [पुं-ष-बहु]
पर्युपासते	परि-उप-आस् [कर्तरि-लट्-प्र-बहु-आत्मने]	**योगवित्तमाः**	योगवित्तम [पुं-प्र-बहु]
च	च [अव्य]	**के**	किम् [पुं-प्र-बहु]

पदार्थः

मूलम्	**हिन्दी**	**English**
ये	जो	those
भक्ताः	भक्त	devotees
एवम्	ऐसे	thus
सततयुक्ताः	निरन्तर लगे	ever-steadfast
त्वाम्	तुमको	You
पर्युपासते	उपासना करते हैं	properly worship
च	और	and
ये	जो	those
अक्षरम्	अविनाशी	the Imperishable
अव्यक्तम्	निराकार को	the Unmanifested
अपि	ही	also
(पर्युपासते)	उपासना करते हैं	properly worship

तेषाम्	उनमें	of them
योगवित्तमाः	योग को जानने वाले	most learned in Yoga
के	कौन हैं	which

भावार्थः

हिन्दी : जो ईश्वरभक्त निरन्तर ध्यान में लगे हुए तुम्हारी श्रेष्ठ भाव से उपासना करते हैं और जो अविनाशी निराकार ब्रह्म की ही श्रेष्ठ भाव से उपासना करते हैं उनमें से उत्तम योग को जानने वाले कौन हैं ?

English : Those devotees who, thus ever-steadfast, properly worship You and those also who properly worship the Imperishable and the Unmanifested (Brahma), which of them are most learned in Yoga ?

सन्धिः -	सततयुक्ताः+ये	सततयुक्ता ये	रुत्व>यत्व>लोप-सन्धिः[1]
	भक्ताः+त्वाम्	भक्तास्त्वाम्	सत्व-सन्धिः[2]
	च+अपि	चापि	सवर्णदीर्घ-सन्धिः[3]
	अपि + अक्षरम्	अप्यक्षरम्	यण्-सन्धिः[4]

समासः -	सततयुक्ताः	सततं युक्ताः सततयुक्ताः	सुप्सुपा-समासः
	अक्षरम्	न क्षरति इति अक्षरम्	उपपद-समासः
		न क्षरम् अक्षरम्	नञ्-तत्पुरुषः
	अव्यक्तम्	न व्यक्तम्	नञ्-तत्पुरुषः
	योगवित्तमाः	योगे वित्तमः योगवित्तमः ते	सप्तमी-तत्पुरुषः

भावार्थः

ये	सेश्वरब्रह्मोपासकाः [गीता०]।
भक्ताः	अनन्यशरणाः [शा०]।

1 ससजुषो रुः (८।२।६६)>भोभगोअघो अपूर्वस्य योऽशि (८।३।१७)>हलि सर्वेषाम् (८।३।२२)
2 विसर्जनीयस्य सः (८।३।३४)
3 अकः सवर्णे दीर्घः (६।१।१०१)
4 इको यणचि (६।१।७७)

एवम्	सर्वकर्मार्पणादिना [सुबो०]। अव्यवहितं मत्कर्मकृदित्यादिनोक्तं प्रकारम् [चतु०]। उक्तेन नयेन [गीता०]।
सततयुक्ताः	नैरन्तर्येण भगवत्कर्मादौ यथोक्ते अर्थे समाहिताः सन्तः प्रवृत्ताः [शा०] साकारध्याननिष्ठाः [पै०]। सततं युक्ताः त्वन्निष्ठाः [सुबो०]। नित्यं समाहितचित्ताः भक्ताः सगुणवेदिनः [चतु०]।
त्वाम्	यथादर्शितं विश्वरूपम् [शा०]। विश्वरूपं सर्वज्ञं सर्वशक्तिम् [सुबो०]।
पर्युपासते	ध्यायन्ति [शा०/सुबो०]।
ये	अन्येऽपि त्यक्तसर्वैषणाः सन्न्यस्तसर्वकर्माणो यथाविशेषितम् [टि०]।
अक्षरम्	ब्रह्म [सुबो०]। स्थूलादिलक्षणम् [चतु०]।
अव्यक्तम्	निरस्तसर्वोपाधित्वात् अव्यक्तम् अकरणगोचरम् [शा०]। निर्विशेषम् [सुबो०]। बुद्ध्यादि अगोचरम् [चतु०]।
तेषाम्	उभयेषां मध्ये [शा०/सुबो०]।
योगवित्तमाः	अतिशयेन योगविदः [शा०]। परमात्मवित्तमाः [पै०]। अतिशयेन योगविदः, श्रेष्ठाः [सुबो०]।
के	कतरे [चतु०]।

==

❖ *सगुणब्रह्मनिष्ठायाः सुकरत्वात्सौलभ्यं प्राशस्त्यं च* ❖

श्रीभगवानुवाच

(४६) **मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।**
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ भक्तियोगः १२-०२॥

पदच्छेदः मयि आवेश्य मनः ये माम् नित्य-युक्ताः उपासते।
श्रद्धया परया उपेताः ते मे युक्ततमाः मताः॥

अन्वयः - मयि मनः आवेश्य नित्ययुक्ताः ये परया श्रद्धया उपेताः माम् उपासते ते मे युक्ततमाः मताः (सन्ति)।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
मयि	अस्मद् [स-एक]	उपेताः	उप-इ [कृत्-प्रत्ययः-क्त-पुं-प्र-बहु]
मनः	मनस् [नपुं-द्वि-एक]	माम्	अस्मद् [द्वि-एक]

आवेश्य	आङ्-विश् [कृत्-प्रत्ययः-ल्यप्]	**उपासते**	उप-आस् [कर्तरि-लट्-प्र-बहु-आत्मने]
नित्ययुक्ताः	नित्ययुक्त [पुं-प्र-बहु]	**ते**	तद् [पुं-प्र-बहु]
ये	यद् [पुं-प्र-बहु]	**मे**	अस्मद् [ष-एक]
परया	परा [स्त्री] [तृ-एक]	**युक्ततमाः**	युक्ततम [पुं-प्र-बहु]
श्रद्धया	श्रद्धा [स्त्री-तृ-एक]	**मताः**	मत [पुं-प्र-बहु]

पदार्थः

मूलम्	हिन्दी	English
मयि	मुझमें	on Me
मनः	मन को	mind
आवेश्य	एकाग्र करके	fixing
नित्ययुक्ताः	नित्य लगे हुए	ever-steadfast
ये	जो	those who
परया	श्रेष्ठ	supreme
श्रद्धया	श्रद्धा से	with faith
उपेताः	युक्त होकर	endowed
माम्	मुझको	Me
उपासते	उपासना करते हैं,	worship
ते	वे	they
मे	मुझे	by Me
युक्ततमाः	उत्तम योगी	most perfect Yogī
मताः	मान्य	consider

भावार्थः

हिन्दी : मुझ विश्वरूप परमेश्वर में मन को एकाग्र करके नित्य लगे हुए जो श्रेष्ठ सात्त्विक श्रद्धा से युक्त होकर मेरी परमेश्वर की उपासना करते हैं, वे मुझे उत्तम योगी के रूप मान्य हैं।

English - Those who fix their mind on Me in Universal Form, ever-steadfast and endowed with supreme faith worship Me, them I consider the most perfect Yogī.

सन्धिः -	मयि+आवेश्य	मय्यावेश्य	यण्-सन्धिः[1]
	मनः+ये	मनो ये	रुत्व>उत्व>गुण-सन्धिः[2]
	नित्ययुक्ताः+उपासते	नित्ययुक्ता उपासते	रुत्व >यत्व>लोप-सन्धिः[3]
	परया+उपेताः	परयोपेताः	गुण-सन्धिः[4]
	उपेताः+ते	उपेतास्ते	सत्व-सन्धिः[5]
	युक्ततमाः+मताः	युक्ततमा मताः	रुत्व>यत्व>लोप-सन्धिः[6]

समासः - नित्ययुक्ताः नित्यः सः युक्तः च नित्ययुक्तः ते कर्मधारयः

पदार्थकोशः

मयि विश्वरूपे परमेश्वरे [शा०]। भगवति साकारे विश्वरूपे [पै०]।
परमेश्वरे सर्वज्ञत्वादिगुणविशिष्टे [सुबो०]। सगुणे ब्रह्मणि [चतु०]।

आवेश्य समाधाय [शा०]। एकाग्रं कृत्वा [सुबो०]। प्रवेश्य [चतु०]।

नित्ययुक्ताः सततयुक्ताः [शा०]। मदर्थकर्मानुष्ठानादिना मन्निष्ठाः [सुबो०]। सदोद्युक्ताः [चतु०]।

परया प्रकृष्टया [शा०]। श्रेष्ठया [सुबो०]। सात्त्विक्या [चतु०]।

श्रद्धया आस्तिक्यबुद्ध्या, निश्चयरूपया [चतु०]।

उपेताः युक्ताः [सुबो०]।

माम् सर्वयोगेश्वराणाम् अधीश्वरं सर्वज्ञं विमुक्तरागादिक्लेशतिमिरदृष्टिम् [शा०]।
परमेश्वरम् [चतु०]।

उपासते आराधयन्ति [सुबो०]। चिन्तयन्ति [चतु०]।

मे मम [शा०/सुबो०/चतु०/गीता०]।

युक्ततमाः नैरन्तर्येण हि ते मच्चित्ततया अहोरात्रम् अतिवाहयन्ति।
अतः युक्तं तान् प्रति युक्ततमाः इति वक्तुम् [शा०]।

मताः अभिप्रेताः [शा०/सुबो०]।

---

1 इको यणचि (६।१।७७)
2 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
3 ससजुषो रुः (८।२।६६)>भोभगो अघो अपूर्वस्य योऽशि (८।३।१७)>लोपः शाकल्यस्य (८।३।१९)
4 आद् गुणः (६।१।८७)
5 विसर्जनीयस्य सः (८।३।३४)
6 ससजुषो रुः (८।२।६६)>भोभगोअघो अपूर्वस्य योऽशि (८।३।१७)>हलि सर्वेषाम् (८।३।२२)

❖ *निर्गुणब्रह्मनिष्ठायाः दुष्करत्वाद् दौर्लभ्यं श्रेष्ठत्वं च* ❖

(४७) **ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।**
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्॥ भक्तियोगः १२-०३॥

(४८) **सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।**
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः॥ भक्तियोगः १२-०४॥

पदच्छेदः ये तु अक्षरम् अनिर्देश्यम् अव्यक्तम् पर्युपासते।
सर्वत्रगम् अचिन्त्यम् च कूटस्थम् अचलम् ध्रुवम्॥
सन्नियम्य इन्द्रिय-ग्रामम् सर्वत्र सम-बुद्धयः।
ते प्राप्नुवन्ति माम् एव सर्व-भूत-हिते रताः॥

अन्वयः - तु ये इन्द्रियग्रामं सन्नियम्य अचिन्त्यं सर्वत्रगम् अनिर्देश्यं च कूटस्थं ध्रुवम् अचलम् अव्यक्तम् अक्षरम् पर्युपासते ते सर्वभूतहिते रताः सर्वत्र समबुद्धयः माम् एव प्राप्नुवन्ति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
तु	तु [अव्य]	अव्यक्तम्	अव्यक्त [नपुं-द्वि-एक]
ये	यद् [पुं-प्र-बहु]	अक्षरम्	अक्षर [नपुं-द्वि-एक]
इन्द्रियग्रामम्	इन्द्रियग्राम [पुं-द्वि-एक]	पर्युपासते	परि-उप-आस् [कर्तरि-लट्-प्र-बहु-आत्मने]
सन्नियम्य	सम्-नि-यम् [कृत्-प्रत्ययः-ल्यप्]	ते	तद् [पुं-प्र-बहु]
अचिन्त्यम्	अचिन्त्य [नपुं-द्वि-एक]	सर्वभूतहिते	सर्वभूतहित [पुं-स-एक]
सर्वत्रगम्	सर्वत्रग [नपुं-द्वि-एक]	रताः	रत [पुं-प्र-बहु]
अनिर्देश्यम्	अनिर्देश्य [नपुं-द्वि-एक]	सर्वत्र	सर्वत्र [अव्य]
च	च [अव्य]	समबुद्धयः	समबुद्धि [स्त्री-प्र-बहु]
कूटस्थम्	कूटस्थ [नपुं-द्वि-एक]	माम्	अस्मद् [द्वि-एक]
ध्रुवम्	ध्रुव [नपुं-द्वि-एक]	एव	एव [अव्य]
अचलम्	अचल [नपुं-द्वि-एक]	प्राप्नुवन्ति	प्र-आप् [कर्तरि-लट्-प्र-बहु-परस्मै]

पदार्थः

मूलम्	हिन्दी	English
तु	परन्तु	but
ये	जो	those
इन्द्रियग्रामम्	इन्द्रियों के समुदाय को	all the senses
सन्नियम्य	अच्छी प्रकार से वश में करके	restraining
अचिन्त्यम्	अचिन्त्य	unthinkable
सर्वत्रगम्	सर्वव्यापी	all-pervading
अनिर्देश्यम्	अकथनीय	undefinable
च	और	and
कूटस्थम्	एक से रहने वाले	firm
ध्रुवम्	नित्य	eternal
अचलम्	अचल	immovable
अव्यक्तम्	निराकार	unmanifested
अक्षरम्	अविनाशी को	imperishable
पर्युपासते	निरन्तर उपासना करते हैं,	continued worship
ते	वे	they
सर्वभूतहिते	सभी भूतों के हित में	welfare of all beings
रताः	लगे हुए	rejoicing
सर्वत्र	सबमें	everywhere
समबुद्धयः	समानभाव वाले	even-minded
माम्	मुझको	to Me
एव	ही	indeed
प्राप्नुवन्ति	प्राप्त होते हैं।	come

भावार्थः

हिन्दी : परन्तु जो इन्द्रियों के समुदाय को अच्छी प्रकार से वश में करके अचिन्त्य सर्वव्यापी अकथनीय और एक जैसे रहने वाले नित्य, अचल, निराकार, अविनाशी ब्रह्म की निरन्तर उपासना करते हैं, वे सभी भूतों के हित में लगे हुए सबमें समानभाव वाले मुझ ब्रह्म को ही प्राप्त होते हैं।

English : But those who, having restrained all the senses, continuously worship the unthinkable, all-pervading, undefinable, unchangeable, eternal, immovable, unmanifested and imperishable Brahma, rejoicing in the welfare of all beings, even-minded everywhere, they indeed come to Me.

सन्धिः -	तु+अक्षरम्	त्वक्षरम्	यण्-सन्धिः[1]
	सन्नियम्य+इन्द्रियग्रामं	सन्नियम्येन्द्रियग्रामं	गुण-सन्धिः[2]

समासः -	इन्द्रियग्रामम्	इन्द्रियाणां ग्रामः इन्द्रियग्रामः तम्	षष्ठी-तत्पुरुषः
	अचिन्त्यम्	न चिन्त्यम् अचिन्त्यः तम्	नञ्-तत्पुरुषः
	सर्वत्रगम्	सर्वत्र गच्छति सर्वत्रगः तम्	उपपद-तत्पुरुषः
	अनिर्देश्यम्	न निर्देश्यम् अनिर्देश्यः तम्	नञ्-तत्पुरुषः
	कूटस्थम्	कूटे तिष्ठति कूटस्थः तम्	उपपद-तत्पुरुषः
	अचलम्	न चलम् अचलः तम्	नञ्-तत्पुरुषः
	अव्यक्तम्	न व्यक्तः यस्य सः अव्यक्तः तम्	बहुव्रीहिः
	अक्षरम्	न क्षरम् अक्षरः तम्	नञ्-तत्पुरुषः
	सर्वभूतहिते	सर्वं च तत् भूतम्, सर्वभूतम्,	कर्मधारयः
		सर्वभूतेभ्यः हितम् सर्वभूतहितम् तस्मिन्	चतुर्थी-तत्पुरुषः
	समबुद्धयः	समा बुद्धिः यस्य सः समबुद्धिः ते	बहुव्रीहिः

पदार्थकोशः

तु तुशब्दः सगुणात् वैलक्षण्यार्थः [चतु०]।

ये मनोयोगिनः [सुबो०]।

इन्द्रियग्रामम् इन्द्रियसमुदायम् [शा०]। बाह्यानामाभ्यन्तराणाञ्चाक्षराणां समूहम् [सुबो०]। समनस्कानि इन्द्रियाणि [चतु०]।

सन्नियम्य सम्यक् नियम्य संहृत्य [शा०]। सम्यक् अप्रमत्ततया नियम्य [सुबो०]। एकीभावेनात्मनि वशे कृत्वा [चतु०]।

1 इको यणचि (६।१।७७)

2 आद् गुणः (६।१।८७)

अचिन्त्यम्	अव्यक्तत्वाद् [शा०]।
सर्वत्रगम्	व्योमवत् व्यापि [शा०]। सर्वव्यापी [सुबो०]। सत्तारूपेण स्फुरणरूपेण च सर्वत्र गतम् [चतु०]।
अनिर्देश्यम्	अव्यक्तत्वात् अशब्दगोचरम् इति न निर्देष्टुं शक्यते, अतः अनिर्देश्यम् [शा०]। निर्देष्टुम् अयोग्यम्[पै०]। शब्देन निर्देष्टुम् अशक्यम्[सुबो०]। निर्देष्टुम् अशक्यं वाचा[चतु०]।
कूटस्थम्	दृश्यमानगुणम् अन्तर्दोषं वस्तु कुटम्। कूटरूपम् कूटसाक्ष्यम् इत्यादौ कूटशब्दः प्रसिद्धः लोके। तस्मिन् कूटे स्थितं कूटस्थं तदध्यक्षतया। अथवा, राशिरिव स्थितं कूटस्थम् [शा०]। कूटः पर्वतः तद्वत् तिष्ठति इति [पै०]। कूटे मायाप्रपञ्चे अधिष्ठानत्वेन स्थितम् [सुबो०]। चैतन्यम् [चतु०]।
ध्रुवम्	नित्यम् [शा०]। नित्यं वृद्ध्यादिरहितम् [सुबो०]।
अचलम्	स्पन्दनरहितम् [सुबो०]।
अव्यक्तम्	न केन अपि प्रमाणेन व्यज्यते इति अव्यक्तम् [शा०]। प्रत्यक्षादिप्रमाणैः अप्रतीयमानम् [पै०]। रूपादिहीनम् [सुबो०]। वाचाम् अगोचरत्वात् बुद्धेः अपि अविषयः [चतु०]।
अक्षरम्	ब्रह्म [गीता०]।
पर्युपासते	परि समन्तात् उपासते, उपासनं नाम यथाशास्त्रम् उपास्यस्य अर्थस्य विषयीकरणेन सामीप्यम् उपगम्य तैलधारावत् समानप्रत्ययप्रवाहेण दीर्घकालं यत् आसनम्, तत् उपासनम् आचक्षते [शा०]। ध्यायन्ति [सुबो०]। सर्वप्रकारेण उपासते, उपासनम् इह अनात्मनामदर्शनम् [चतु०]।
सर्वभूतहिते	सर्वभूतानां हिते रताः [सुबो०]। सर्वभूताभयदानेन [चतु०]।
सर्वत्र	सर्वस्मिन् काले [शा०]। सर्वस्मिन् वस्तुनि [सुबो०]। काले सर्वदा [चतु०]।
समबुद्धयः	समा तुल्या बुद्धिः येषाम् इष्टानिष्टप्राप्तौ ते समबुद्धयः [शा०]। मत्स्वरूपैकदर्शित्वात् समा निर्विशेषा बुद्धिः येषां ते [सुबो०]। समा चाञ्चल्यहीना बुद्धिः येषां ते [चतु०]।
माम्	निर्विकल्पं परं ब्रह्म परां काष्ठाम् [चतु०]।

==

❖ *निर्गुणब्रह्मनिष्ठायाः दुष्करत्वाद् दौर्लभ्यं श्रेष्ठत्वं च* ❖

(४९) **क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।**
अव्यक्ता हि गतिर्दुःखम् देहवद्भिरवाप्यते ॥ भक्तियोगः **१२-०५॥**

पदच्छेदः क्लेशः अधिकतरः तेषाम् अव्यक्त-असक्त-चेतसाम्।
अव्यक्ता हि गतिः दुःखम् देहवद्भिः अवाप्यते॥

अन्वयः - तेषाम् अव्यक्तासक्तचेतसां क्लेशः अधिकतरः (अस्ति) हि देहवद्भिः अव्यक्ता गतिः दुःखम् अवाप्यते।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
तेषाम्	तद् [पुं-ष-बहु]	देहवद्भिः	देहवद् [पुं-तृ-बहु]
अव्यक्तासक्तचेतसाम्	अव्यक्तासक्तचेतस् [पुं-ष-बहु]	अव्यक्ता	अव्यक्ता [स्त्री-प्र-एक]
		गतिः	गति [स्त्री-प्र-एक]
क्लेशः	क्लेश [पुं-प्र-एक]	दुःखम्	दुःख [नपुं-प्र-एक]
अधिकतरः	अधिकतर [पुं-प्र-एक]	अवाप्यते	अव-आप् [कर्मणि-लट्-प्र-एक-आत्मने]
हि	हि [अव्य]		

पदार्थः

मूलम्	हिन्दी	English
तेषाम्	उन	of those
अव्यक्तासक्तचेतसाम्	निराकार में आसक्तचित्त वाले की	whose minds are set on the Unmanifested
क्लेशः	कठिनाई	trouble
अधिकतरः	विशेष	greater
(अस्ति)	है;	is
हि	क्योंकि	indeed
देहवद्भिः	देहधारियों के द्वारा	by the embodied
अव्यक्ता	अव्यक्त	the Unmanifested
गतिः	गति	goal
दुःखम्	दुःखपूर्वक	hard
अवाप्यते	प्राप्त की जाती है	reached

भावार्थः

हिन्दी : उन निराकार में आसक्तचित्त वाले लोगों को कठिनाई विशेष होती है; क्योंकि देहधारियों के द्वारा अव्यक्त एवं आलम्बन से रहित गति दुःखपूर्वक प्राप्त की जाती है।

English : Greater is their trouble whose obsessed minds are set on the Unmanifested, for the goal to reach the Unmanifested and free of suspension by the embodied is hard.

सन्धिः -

क्लेशः+अधिकतरः	क्लेशोऽधिकतरः	रुत्व>उत्व>गुण>पूर्वरुप-सन्धिः[1]
अधिकतरः+तेषाम्	अधिकतरस्तेषाम्	सत्व-सन्धिः[2]
गतिः+दुःखम्	गतिर्दुःखम्	रेफ-सन्धिः[3]
देहवद्भिः+अवाप्यते	देहवद्भिरवाप्यते	रेफ-सन्धिः[4]

समासः -

अव्यक्तासक्तचेतसाम्	न व्यक्तः अव्यक्तः	नञ्-तत्पुरुषः
	अव्यक्ते आसक्तः अव्यक्तासक्तः,	सप्तमी-तत्पुरुषः
	अव्यक्तासक्तम् चेतः यस्य सः	बहुव्रीहिः
	अव्यक्तासक्तचेताः तेषाम्	
अव्यक्ता	न व्यक्ता	नञ्-तत्पुरुषः

पदार्थकोशः

अव्यक्तासक्तचेतसाम् अव्यक्ते आसक्तं चेत: येषां ते अव्यक्तासक्तचेतस: तेषाम् अव्यक्तासक्तचेतसाम् [शा०]। अव्यक्ते निर्विशेषणे अक्षरे आसक्तं चेतो येषां तेषाम् [सुबो०]। निर्विषये चेत:स्थिरीकरणे [चतु०]।

अधिकतर: अधिक एवेतरेभ्यो द्वैतदर्शिभ्य: कामिभ्यः इति [टि०]।

हि यस्मात् [शा०/सुबो०/चतु०]।

---

1 ससजुषो रुः (८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)>आद्गुणः (६।१।८७)>एङः पदान्तादति (६।१।१०९)
2 विसर्जनीयस्य सः (८।३।३४)
3 ससजुषो रुः (८।२।६६)
4 ससजुषो रुः (८।२।६६)

देहवद्भिः	देहाभिमानवद्भिः [शा०]। देहाभिमानिभिः [चतु०]।
अव्यक्ता	ज्ञानम् [पै०]। अव्यक्तविषया [सुबो०]। निरालम्बना [चतु०]।
गतिः	अक्षरात्मिका [शा०]। निष्ठा [सुबो०]। पदप्राप्तिः [चतु०]।

===

❖ *सगुणब्रह्मोपासकानाम् अविलम्बेन मोक्षसिद्धिः* ❖

(५०) **ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः ।**
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ भक्तियोगः **१२-०६॥**

पदच्छेदः ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः।
अनन्येन एव योगेन माम् ध्यायन्तः उपासते ॥

अन्वयः - तु ये मत्पराः सर्वाणि कर्माणि मयि सन्न्यस्य माम् एव अनन्येन योगेन ध्यायन्तः उपासते॥

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
तु	तु [अव्य]	माम्	अस्मद् [द्वि-एक]
ये	यद् [पुं-प्र-बहु]	एव	एव [अव्य]
मत्पराः	मत्पर [पुं-प्र-बहु]	अनन्येन	अनन्य [पुं-तृ-एक]
सर्वाणि	सर्व [नपुं-द्वि-बहु]	योगेन	योग [पुं-तृ-एक]
कर्माणि	कर्मन् [नपुं-द्वि-बहु]	ध्यायन्तः	ध्यै [कृत्-प्रत्ययः-शतृ-पुं-प्र-बहु]
मयि	अस्मद् [स-एक]	उपासते	उप-आस् [कर्तरि-लट्-प्र-बहु-आत्मने]
सन्न्यस्य	सम्-नि-अस् [कृत्-प्रत्ययः-ल्यप्]		

पदार्थः

मूलम्	हिन्दी	English
तु	परन्तु	but
ये	जो	those who
मत्पराः	मेरे परायण	intent on Me
सर्वाणि	सम्पूर्ण	all
कर्माणि	कर्मों को	actions

मयि	मुझमें	in Me
सन्न्यस्य	अर्पित कर	renouncing
माम्	मुझको	unto Me
एव	ही	certainly
अनन्येन	अनन्य	single-minded
योगेन	योग से	with devotion
ध्यायन्तः	ध्यान करते हुए	meditating
उपासते	उपासना करते हैं	worship

भावार्थः

हिन्दी : परन्तु जो मेरे परायण होकर सम्पूर्ण नित्य नैमित्तिक एवं स्वाभाविक कर्मों को मुझ ईश्वर में अर्पित कर मुझको ही अनन्य योग से ध्यान करते हुए उपासना करते हैं।

English : But those devotees who are intent on Me and renounce all kinds of actions in Me, worship meditating on Me with single-minded devotion.

सन्धिः -	अनन्येन+एव	अनन्येनैव	वृद्धि-सन्धिः[1]
	ध्यायन्तः+उपासते	ध्यायन्त उपासते	रुत्व >यत्व>लोप-सन्धिः[2]

समासः -	मत्पराः	मम परः मत्परः ते	षष्ठी-तत्पुरुषः
	अनन्येन	न अन्यः अनन्यः तेन	नञ्-तत्पुरुषः

पदार्थकोशः

तु शङ्कानिवृत्त्यर्थः [टि०]।

मत्पराः अहं परः येषां ते मत्पराः [शा०]।
अहमेव परः सर्वकर्मभिः प्राप्यो येषां ते; मद्ध्यानपराः वा [चतु०]।

1 वृद्धिरेचि (६।१।८८)

2 ससजुषो रुः (८।२।६६)>भोभगो अघो अपूर्वस्य योऽशि (८।३।१७)>लोपः शाकल्यस्य (८।३।१९)

सर्वाणि	नित्यनैमित्तिकस्वाभाविकादीनि [चतु०]।
मयि	ईश्वरे [शा०]। परमेश्वरे [सुबो०]।
सन्न्यस्य	समर्प्य [सुबो०/चतु०]।
अनन्येन	अविद्यमानम् अन्यत् आलम्बनं विश्वरूपं देवम् आत्मानं मुक्त्वा यस्य सः अनन्यः तेन अनन्येन [शा०]। न विद्यते अन्यत् अस्मिन् योगे सः अनन्यः [पै०]। न विद्यते अन्यो भजनीयो यस्मिन् तेन [सुबो०]। भेदशून्येन अहमेव भगवान् वासुदेव इति परमेश्वरेऽहङ्ग्रहलक्षणेन [चतु०]।
योगेन	समाधिना [शा०]। एकान्त भक्तियोगेन [सुबो०]। चेतःसमाधानेन [चतु०]।
ध्यायन्तः	चिन्तयन्तः [शा०]।

==

❖ ***सगुणनिर्गुणोपासनायाः सुकरं शीघ्रफलप्रदं च उपायचतुष्टयं भगवतः भक्तप्रेमातिरेकः च*** ❖

(५१) **तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।**
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥ भक्तियोगः **१२-०७॥**

पदच्छेदः तेषाम् अहम् समुद्धर्ता मृत्यु-संसार-सागरात्।
भवामि न चिरात् पार्थ मयि आवेशित-चेतसाम् ॥

अन्वयः - पार्थ तेषाम् मयि आवेशितचेतसाम् अहं नचिरात् मृत्युसंसारसागरात् समुद्धर्ता भवामि।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
पार्थ	पार्थ [पुं-सं-एक]	**न**	न [अव्य]
तेषाम्	तद् [पुं-ष-बहु]	**चिरात्**	नचिरात् [अव्य]
मयि	अस्मद् [स-एक]	**मृत्युसंसारसागरात्**	मृत्युसंसारसागर [पुं-पं-एक]
आवेशितचेतसाम्	आवेशितचेतस् [नपुं-ष-बहु]	**समुद्धर्ता**	समुद्धर्तृ [पुं-प्र-एक]
अहम्	अस्मद् [प्र-एक]	**भवामि**	भू [कर्तरि-लट्-उ-एक- परस्मै]

पदार्थः

मूलम्	हिन्दी	English
पार्थ	हे अर्जुन !	O Arjuna
तेषाम्	उन	of those
मयि	मुझमें	on Me
आवेशितचेतसाम्	चित्त लगाने वालों का	whose minds are fixed
अहम्	मैं	I
न	न	not
चिरात्	विलम्ब कर	long time
मृत्युसंसारसागरात्	मृत्युरूपी संसार समुद्र से	from the ocean of death-bound existence
समुद्धर्ता	उद्धार करने वाला	saviour
भवामि	होता हूँ।	become

भावार्थः

हिन्दी : हे अर्जुन ! उन मुझमें एकाग्रता से चित्त लगाने वालों का मैं विलम्ब न करते हुए मृत्युरूपी संसार सागर अर्थात् समस्त विघ्न आदि क्लेशों से शीघ्र ही उद्धार करने वाला हूँ।

English : O Arjuna, of those whose minds are fixed on Me, I verily become the saviour from the ocean of death-bound worldly existence, in other words, I free them from all troubles.

सन्धिः -			
	चिरात्+पार्थ	चिरात्पार्थ	जश्त्व >चर्त्व-सन्धिः[1]
	मयि+आवेशितचेतसाम्	मय्यावेशितचेतसाम्	यण्-सन्धिः[2]

समासः		
आवेशितचेतसाम्	आवेशितं चेतः यैः ते आवेशितचेतसः तेषाम्	बहुव्रीहिः
मृत्युसंसारसागरात्	मृत्योः संसारः मृत्युसंसारः	षष्ठी-तत्पुरुषः
	मृत्युसंसारः सागरः इव मृत्युसंसारसागरः तस्मात्	कर्मधारयः

1 झलां जशोऽन्ते (८।२।३९)>खरि च (८।४।५५)
2 इको यणचि (६।१।७७)

पदार्थकोशः

तेषाम् मदुपासनैकपराणाम् [शा०]। ध्यायिनाम् [चतु०]।

मयि सगुणे विश्वरूपे [चतु०]।

आवेशितचेतसाम् मयि विश्वरूपे आवेशितं समाहितं प्रवेशितं चेतः येषां ते मय्यावेशितचेतसः [शा०]। आवेशितं चेतो यैः तेषाम् [सुबो०]। चेतसः आवेशनम् [गीता०]।

अहम् ईश्वरः [शा०]।

नचिरात् अचिरेण [सुबो०]। शीघ्रम् [चतु०]।

मृत्युसंसारसागरात् मृत्युयुक्तः संसारः मृत्युसंसारः, सः एव सागर इव सागरः, दुस्तरत्वात्, तस्मात् मृत्युसंसारसागरात् [शा०]। मृत्युयुक्तात् संसारसागरात् [सुबो०]।

समुद्धर्ता सम्यक् उद्धर्ता [सुबो०]। समुद्धरणकर्ता [चतु०]। सकलविघ्नादिक्लेशेभ्यः [गीता०]।

==

❖ *विश्वरूपध्यानलक्षणे भक्तियोगेऽर्जुनं प्रति भगवत्प्रवर्तनम्* ❖

(५२) **मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।**
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥ भक्तियोगः **१२-०८॥**

पदच्छेदः मयि एव मनः आधत्स्व मयि बुद्धिम् निवेशय।
निवसिष्यसि मयि एव अत ऊर्ध्वम् न संशयः ॥

अन्वयः - (त्वम्) मयि मनः आधत्स्व (च) (त्वम्) मयि एव बुद्धिं निवेशय अतः ऊर्ध्वं मयि एव (त्वम्) निवसिष्यसि न संशयः (अस्ति)।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
मयि	अस्मद् [स-एक]	**अतः**	अतः [अव्य]
मनः	मनस् [नपुं-द्वि-एक]	**ऊर्ध्वम्**	ऊर्ध्वम् [अव्य]
आधत्स्व	आङ्-धा [कर्तरि-लोट्-म-एक-आत्मने]	**मयि**	अस्मद् [स-एक]
मयि	अस्मद् [स-एक]	**एव**	एव [अव्य]

एव	एव [अव्य]	**निवसिष्यसि**	नि-वस् [कर्तरि-लृट्-म-एक-परस्मै]
बुद्धिम्	बुद्धि [स्त्री-द्वि-एक]	**संशयः**	संशय [पुं-प्र-एक]
निवेशय	नि-विश् [कर्तरि-लोट्-म-एक-परस्मै-णिच्]	**न**	न [अव्य]

पदार्थः

मयि	**हिन्दी**	**English**
(त्वम्)	तुम	you
मयि	मुझमें	on Me
मनः	मन को	mind
आधत्स्व	लगाओ	fix
(च)	और	and
(त्वम्)	तुम	you
मयि	मुझमें	in Me
एव	ही	only
बुद्धिम्	बुद्धि को	intellect
निवेशय	लगाओ	place
अतः	इसके	thereafter
ऊर्ध्वम्	उपरान्त	
मयि	मुझमें	in Me
एव	ही	alone
(त्वम्)	तुम	you
निवसिष्यसि	निवास करोगे	live
संशयः	संशय	doubt
न	नहीं	no
(अस्ति)	है।	is

भावार्थः

हिन्दी : हे अर्जुन ! तुम मुझमें ही संकल्प एवं विकल्परूपी मन स्थिर करो, तुम मुझमें अध्यवसाय करती हुई बुद्धि को लगाओ, इसके उपरान्त मुझ ईश्वर में ही तुम निवास करोगे इसमें कोई संशय नहीं है।

English : O Arjuna! Fix your mind (of will and choice) on Me and place your persevering intellect in Me only, thereafter, you shall no doubt live in Me alone.

सन्धिः -	मयि+एव	मय्येव	यण्-सन्धिः[1]
	मनः+आधत्स्व	मन आधत्स्व	रुत्व >यत्व>लोप-सन्धिः[2]
	अतः+ऊर्ध्वम्	अत ऊर्ध्वम्	रुत्व >यत्व>लोप-सन्धिः[3]

पदार्थकोशः

मयि विश्वरूपे ईश्वरे [शा०/चतु०]।
मनः सङ्कल्पविकल्पात्मकम् [शा०/सुबो०/चतु०]।
आधत्स्व स्थापय [शा०/चतु०]। स्थिरीकुरु [सुबो०]।
बुद्धिम् अध्यवसायं कुर्वतीम् [शा०]। अध्यवसायात्मिकाम् व्यवसायात्मिकाम् [सुबो०]।
निवेशय आधत्स्व [शा०]।
अतः शरीरपातात् [चतु०]। ऊर्ध्वम्। देहान्ते मरणानन्तरम् [सुबो०]।
मयि एव [त्वम्]।
निवसिष्यसि निवत्स्यसि [शा०]। निवत्स्यसि, मदात्मना वासं करिष्यसि [सुबो०]। निवत्स्यसि निश्चयेन मदात्मना मयि वासं करिष्यसि [चतु०]।

===

❖ *भक्तियोगे परिनिष्ठितस्य अभ्यासयोगादिसाधनकथनम्* ❖

(५३) **अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।**
अभ्यासयोगेन ततो मामिच्छाप्तुम् धनञ्जय ॥ भक्तियोगः **१२-०९॥**

पदच्छेदः अथ चित्तम् समाधातुम् न शक्नोषि मयि स्थिरम्।
अभ्यास-योगेन ततः माम् इच्छ आप्तुम् धनञ्जय ॥

---

1 इको यणचि (६।१।७७)
2 ससजुषो रुः (८।२।६६)>भोभगो अघो अपूर्वस्य योऽशि (८।३।१७)>लोपः शाकल्यस्य (८।३।१९)
3 ससजुषो रुः (८।२।६६)>भोभगो अघो अपूर्वस्य योऽशि (८।३।१७)>लोपः शाकल्यस्य (८।३।१९)

अन्वयः - अथ चित्तम् मयि स्थिरं समाधातुं (त्वम्) न शक्नोषि ततः धनञ्जय अभ्यासयोगेन (त्वम्) माम् आप्तुम् इच्छ।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
अथ	अथ [अव्य]	**ततः**	ततः [अव्य]
चित्तम्	चित्त [नपुं-द्वि-एक]	**धनञ्जय**	धनञ्जय [पुं-सं-एक]
मयि	अस्मद् [स-एक]	**अभ्यासयोगेन**	अभ्यासयोग [पुं-तृ-एक]
स्थिरम्	स्थिर [पुं-द्वि-एक]	**माम्**	अस्मद् [द्वि-एक]
समाधातुम्	सम्-आङ्-धा [कृत्-प्रत्ययः-तुमुन्]	**आप्तुम्**	आप् [कृत्-प्रत्ययः-तुमुन्]
न	न [अव्य]	**इच्छ**	इष् [कर्तरि-लोट्-म-एक-परस्मै]
शक्नोषि	शक् [कर्तरि-लट्-म-एक-परस्मै]		

पदार्थः

मूलम्	हिन्दी	English
अथ	यदि	if, however
चित्तम्	मन को	mind
मयि	मुझमें	on Me
स्थिरम्	स्थिर रूप से	steadily
समाधातुम्	स्थापित करने के लिये	fixing
(त्वम्)	तुम	you
न	नहीं	not
शक्नोषि	समर्थ हो,	able
ततः	तो	then
धनञ्जय	हे अर्जुन!	O Arjuna
अभ्यासयोगेन	अभ्यासरूप योग से	by practice of Yoga
(त्वम्)	तुम	you
माम्	मुझको	Me
आप्तुम्	प्राप्त करने का	reach
इच्छ	प्रयत्न करो	seek

भावार्थः

हिन्दी : यदि मन को मुझ ईश्वर में स्थिर रूप से स्थापित करने के लिये तुम समर्थ नहीं हो, तो हे अर्जुन! अभ्यासरूप योग के द्वारा तुम मुझको प्राप्त करने का प्रयत्न करो।

English : If, however, you are not able to fix your mind steadily on Me, then O Arjuna, by practice of Yoga (devotion), seek to reach Me.

सन्धिः -	ततः+माम्	ततो माम्	रुत्व>उत्व>गुण-सन्धिः[1]
	इच्छा+आप्तुम्	इच्छाप्तुम्	सवर्णदीर्घ-सन्धिः[2]

समासः -	अभ्यासयोगेन	अभ्यासस्य योगः अभ्यासयोगः	षष्ठी-तत्पुरुषः

पदार्थकोशः

अथ	यदि [सुबो०/चतु०]। एवं यथाऽवोचाम तथा [टि०]।
मयि	विश्वेश्वरे विश्वरूपे [चतु०]।
स्थिरम्	अचलम् [शा०]।
समाधातुम्	स्थापयितुम् [शा०]। धारयितुम् [सुबो०]। निवेशितुम् अचलं धारयितुम् [चतु०]।
शक्नोषि	शक्तो भवसि [सुबो०]।
ततः	तर्हि [सुबो०/चतु०]।
धनञ्जय	मध्ये धनस्य तिष्ठामि तेनाहुर्माम्, त्वं मनः शत्रुं जित्वा तत्त्वज्ञानधनमाहर [टि०]।
अभ्यासयोगेन	चित्तस्य एकस्मिन् आलम्बने सर्वतः समाहृत्य पुनः पुनः स्थापनम् अभ्यासः, तत्पूर्वको योगः समाधानलक्षणः तेन अभ्यासयोगेन [शा०]। चित्तस्यैकस्मिन्नाभ्यन्तरे बाह्ये वा प्रतिमादावालम्बने सर्वतः समाहृत्य पुनः पुनः स्थापनम् अभ्यासः तत्पूर्वको योगः समाधानलक्षणः तेन [चतु०]।
माम्	विश्वरूपम् [शा०/चतु०]।
आप्तुम्	प्राप्तुम् [शा०/सुबो०/चतु०]।
इच्छ	प्रार्थयस्व [शा०/चतु०]। प्रयत्नं कुरु [सुबो०]।

1 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)

2 अकः सवर्णे दीर्घः (६।१।१०१)

❖ *सगुणनिर्गुणोपासनायाः सुकरं शीघ्रफलप्रदं च* ❖

(५४) **अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।**
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥ भक्तियोगः **१२-१०॥**

पदच्छेदः अभ्यासे अपि असमर्थः असि मत्-कर्म-परमः भव।
मत्-अर्थम् अपि कर्माणि कुर्वन् सिद्धिम् अवाप्स्यसि ॥

अन्वयः - अभ्यासे अपि (त्वम्) असमर्थः असि (त्वम्) मत्कर्मपरमः भव मदर्थं कर्माणि कुर्वन् अपि (त्वम्) सिद्धिम् अवाप्स्यसि।

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
अभ्यासे	अभ्यास [पुं-स-एक]	**मदर्थम्**	मदर्थ [नपुं-प्र-एक]
अपि	अपि [अव्य]	**कर्माणि**	कर्मन् [नपुं-द्वि-बहु]
असमर्थः	असमर्थ [पुं-प्र-एक]	**कुर्वन्**	कृ [कृत्-प्रत्ययः-शतृ-पुं-प्र-एक]
असि	अस् [कर्तरि-लट्-म-एक-परस्मै]	**अपि**	अपि [अव्य]
मत्कर्मपरमः	मत्कर्मपरम [पुं-प्र-एक]	**सिद्धिम्**	सिद्धि [स्त्री-द्वि-एक]
भव	भू [कर्तरि-लोट्-म-एक-परस्मै]	**अवाप्स्यसि**	अव-आप् [कर्तरि-लृट्-म-एक-परस्मै]

पदार्थः

मूलम्	**हिन्दी**	**English**
अभ्यासे	अभ्यास में	to practice
अपि	भी	even
(त्वम्)	तुम	you
असमर्थः	असमर्थ	unable
असि	हो	are
(त्वम्)	तुम	you
मत्कर्मपरमः	मेरे कर्म में परायण	performing My supreme service

भव	हो जाओ	become
मदर्थम्	मेरे निमित्त	for My sake
कर्माणि	कर्मों को	actions
कुर्वन्	करते हुए	performing
अपि	भी	even
(त्वम्)	तुम	you
सिद्धिम्	सिद्धि को	perfection
अवाप्स्यसि	प्राप्त करोगे।	attain

भावार्थः

हिन्दी : हे अर्जुन ! यदि तुम उक्तरीति से अभ्यास में भी असमर्थ हो, तुम मेरे कर्म में परायण हो जाओ, मेरे निमित्त कर्म पूजा, जप, स्वाध्याय एवं हवन आदि को करते हुए भी तुम सत्त्व, शुद्धि, योग और ज्ञान के माध्यम से सिद्धि को प्राप्त करोगे।

English : O Arjuna! If you are unable to practice Yoga as mentioned before, be intent on performing My supreme service and actions such as worshipping, chanting, studying, offering oblations etc. for My sake, you shall attain perfection through the means of purity of mind, steadfastness and knowledge.

सन्धिः -	अभ्यासे+अपि	अभ्यासेऽपि	पूर्वरूप-सन्धिः[1]
	अपि+असमर्थः	अप्यसमर्थः	यण्-सन्धिः[2]
	असमर्थः+असि	असमर्थोऽसि	रुत्व >उत्व>गुण>पूर्वरुप-सन्धिः[3]
	मत्कर्मपरमः+भव	मत्कर्मपरमो भव	रुत्व>उत्व>गुण-सन्धिः[4]

---

1 एङः पदान्तादति (६।१।१०९)
2 इको यणचि (६।१।७७)
3 ससजुषो रुः (८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)>आद् गुणः (६।१।८७)>
एङः पदान्तादति (६।१।१०९)
4 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)

समासः -	असमर्थः	न समर्थः	नञ्-समासः
	मत्कर्मपरमः	मदर्थं कर्म मत्कर्म	मध्यमपदलोपी-समासः
		मत्कर्म परमः यस्य सः	बहुव्रीहिः
	मदर्थम्	मह्यम् इदम्	चतुर्थी-तत्पुरुषः

पदार्थकोशः

अभ्यासे पूर्वश्लोकोक्ते [चतु०]।

असमर्थः अशक्तः [शा०/सुबो०]।

मत्कर्मपरमः मदर्थं कर्म मत्कर्म तत्परमः मत्कर्मपरमः, मत्कर्मप्रधानः [शा०]। एकादश्युपवासादिव्रतपूजा-परिचर्यानामसङ्कीर्तनादीनि तदनुष्ठानमेव परमं यस्य तादृशः [सुबो०]। नवविधभजनात्मकं भगवत् प्रीत्यर्थं कर्म [चतु०]।

मदर्थम् मत्प्रीत्यर्थम् [सुबो०]।

कर्माणि श्रवणादीनि [चतु०]। पूजाजपस्वाध्यायहोमादीन् [गीता०]।

अपि उक्तव्यवधिसूचनार्थः [टि०]।

सिद्धिम् सत्त्वशुद्धियोगज्ञानप्राप्तिद्वारेण [शा०]। मोक्षम् [सुबो०]। सत्त्वशुद्धिम् [चतु०]।

अवाप्स्यसि प्राप्स्यसि [सुबो०]।

==

❖ सगुणनिर्गुणोपासनायाः सुकरं शीघ्रफलप्रदं च ❖

(५५) **अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।**
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ भक्तियोगः **१२-११॥**

पदच्छेदः अथ एतत् अपि अशक्तः असि कर्तुम् मत्-योगम् आश्रितः।
सर्व-कर्म-फल-त्यागम् ततः कुरु यत-आत्मवान् ॥

अन्वयः - अथ मद्योगम् आश्रितः एतत् कर्तुम् अपि (त्वम्) अशक्तः असि ततः यतात्मवान् (त्वम्) सर्वकर्म-फलत्यागं कुरु।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
अथ	अथ [अव्य]	**अशक्तः**	अशक्त [पुं-प्र-एक]
मद्योगम्	मद्योग [पुं-द्वि-एक]	**असि**	अस् [कर्तरि-लट्-म-एक-परस्मै]
आश्रितः	आङ्-श्रि [कृत्-प्रत्ययः:क्त-पुं-प्र-एक]	**ततः**	ततः [अव्य]
एतत्	एतद् [नपुं-द्वि-एक]	**यतात्मवान्**	यतात्मवत् [पुं-प्र-एक]
कर्तुम्	कृ [कृत्-प्रत्ययः-तुमुन्]	**सर्वकर्मफलत्यागम्**	सर्वकर्मफलत्याग [पुं-द्वि.एक]
अपि	अपि [अव्य]	**कुरु**	कृ [कर्तरि-लोट्-म-एक-परस्मै]

पदार्थः

मूलम्	हिन्दी	English
अथ	यदि	even if
मद्योगम्	मेरे योग के	in My yoga
आश्रितः	आश्रित होकर	refuge
एतत्	इसको	this
कर्तुम्	करने में	to do
अपि	भी	also
(त्वम्)	(तुम)	you
अशक्तः	असमर्थ	unable
असि	हो	are
ततः	तो	then
यतात्मवान्	आत्मनियन्त्रित	self-controlled
(त्वम्)	तुम	you
सर्वकर्मफलत्यागम्	सब कर्मों के फल का त्याग	renounce the fruits of all actions
कुरु	करो	do

भावार्थः

हिन्दी : यदि तुम मेरे योग के आश्रित होकर भी किए जाने वाले कर्म को करने में एवं मेरी शरण में आने में भी असमर्थ हो तो आत्मनियन्त्रित तुम सब प्रत्यक्ष एवं अप्रत्यक्ष आवश्यक कर्मों के फल का त्याग करो।

English : If depending on Me, you are unable to even perform these actions and taking refuge in My yoga, you be self-controlled and renounce the fruits of all direct and indirect necessary actions.

सन्धिः -	अथ+एतत्	अथैतत्	वृद्धि-सन्धिः[1]
	एतत्+अपि	एतदपि	जश्त्व-सन्धिः[2]
	अपि+अशक्तः	अप्यशक्तः	यण्-सन्धिः[3]
	अशक्तः+असि	अशक्तोऽसि	रुत्व >उत्व>गुण>पूर्वरुप-सन्धिः[4]

समासः -	मद्योगम्	मयि योगः यस्य सः मद्योगः तम्	बहुव्रीहिः
	अशक्तः	न शक्तः	नञ्-तत्पुरुषः
	यतात्मवान्	यतः आत्मा यस्य सः यतात्मा तद्वान्	बहुव्रीहिः
	सर्वकर्मफलत्यागम्	सर्वम् च तत् कर्म सर्वकर्म तानि	कर्मधारयः
		सर्वकर्मणां फलम् सर्वकर्मफलम्,	षष्ठी-तत्पुरुषः
		सर्वकर्मफलानां त्यागः	
		सर्वकर्मफलत्यागः तम्	षष्ठी-तत्पुरुषः

पदार्थकोशः

अथ	पुन: [शा०]।
मद्योगम्	आश्रित: मयि क्रियमाणानि कर्माणि सन्यस्य यत्करणं तेषाम् अनुष्ठानं स: मद्योग:, तम् [शा०]। मदेकशरणम् [सुबो०]। श्रवणादौ निष्ठाम् [चतु०]।
यतात्मवान्	संयतचित्त: [शा०]। नियतचित्तः [सुबो०]। यतश्च नियमादिमांश्च आत्मवान् जितश्चित्त: [चतु०]।
सर्वकर्मफलत्यागम्	सर्वेषां कर्मणां फलसन्न्यासं सर्वकर्मफलत्यागम् [शा०]। सर्वेषां दृष्टादृष्टानाम् आवश्यकानां च अग्निहोत्रादिकर्मणां फलानि [सुबो०]।

1 वृद्धिरेचि (६।१।८८)
2 झलां जशोऽन्ते (८।२।३९)
3 इको यणचि (६।१।७७)
4 ससजुषो रुः (८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)>आद्गुणः (६।१।८७)>एङः पदान्तादति (६।१।१०९)

❖ सर्वकर्मफलत्यागस्य स्तुतिः ❖

(५६) **श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते।**
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्॥ भक्तियोगः **१२-१२॥**

पदच्छेदः श्रेयः हि ज्ञानम् अभ्यासात् ज्ञानात् ध्यानम् विशिष्यते।
ध्यानात् कर्म-फल-त्यागः त्यागात् शान्तिः अनन्तरम्॥

अन्वयः - अभ्यासात् ज्ञानं श्रेयः (अस्ति) ज्ञानात् ध्यानं विशिष्यते ध्यानात् कर्मफलत्यागः (विशिष्यते) हि त्यागात् अनन्तरम् शान्तिः (भवति)।

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
अभ्यासात्	अभ्यास [पुं-पं-एक]	**ध्यानात्**	ध्यान [नपुं-पं-एक]
ज्ञानम्	ज्ञान [नपुं-प्र-एक]	**कर्मफलत्यागः**	कर्मफलत्याग [पुं-प्र-एक]
श्रेयः	श्रेयस् [पुं-प्र-एक]	**हि**	हि [अव्य]
ज्ञानात्	ज्ञान [नपुं-पं-एक]	**त्यागात्**	त्याग [पुं-पं-एक]
ध्यानम्	ध्यान [नपुं-प्र-एक]	**अनन्तरम्**	अनन्तर [अव्य]
विशिष्यते	वि-शास् [कर्तरि-लट्-प्र-एक-आत्मने]	**शान्तिः**	शान्ति [स्त्री-प्र-एक]

पदार्थः

मूलम्	**हिन्दी**	**English**
अभ्यासात्	अभ्यास से	than practice
ज्ञानम्	ज्ञान	knowledge
श्रेयः	श्रेष्ठ	better
(अस्ति)	है,	is
ज्ञानात्	ज्ञान से	than knowledge
ध्यानम्	ध्यान	meditation
विशिष्यते	श्रेष्ठ है	excels

ध्यानात्	ध्यान से	than meditation
कर्मफलत्यागः	कर्मों के फल का त्याग	renunciation of the fruits of action
(विशिष्यते)	(श्रेष्ठ है)	excels
हि	क्योंकि	indeed
त्यागात्	त्याग के	on renunciation
अनन्तरम्	अनन्तर	immediately
शान्तिः	परम शान्ति	peace
(भवति)	प्राप्त होती है।	is

भावार्थः

हिन्दी : अभ्यास से युक्ति सहित उपदेशात्मक ज्ञान श्रेष्ठ है, ज्ञान से भगवान् का चिन्तन करने वाला ध्यान श्रेष्ठ है, ध्यान से समस्त कर्मों के फल का त्याग (श्रेष्ठ है); क्योंकि त्याग के तत्काल बाद ही परम शान्ति प्राप्त होती है।

English : Instructional knowledge based on reason is better than practice; meditation on Me excels knowledge; renunciation of the fruit of all actions excels meditation; indeed on renunciation follows peace immediately.

सन्धिः -	श्रेयः+हि	श्रेयो हि	रुत्व>उत्व>गुण-सन्धिः[1]
	अभ्यासात्+ज्ञानात्	अभ्यासाज्ज्ञानात्	जश्त्व >श्चुत्व-सन्धिः[2]
	ज्ञानात्+ध्यानं	ज्ञानाद्ध्यानं	जश्त्व-सन्धिः[3]
	ध्यानात्+कर्मफलत्यागः	ध्यानात्कर्मफलत्यागः	चर्त्व-सन्धिः[4]
	कर्मफलत्यागः+त्यागात्	कर्मफलत्यागस्त्यागात्	सत्व-सन्धिः[5]

1 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
2 झलां जशोऽन्ते (८।२।३९)>स्तोः श्चुना श्चुः (८।४।४०)
3 झलां जश् झशि (८।४।५३)
4 खरि च (८।४।५५)
5 विसर्जनीयस्य सः (८।३।३४)

	त्यागात्+शान्तिः	त्यागाच्छान्तिः	जश्त्व>श्चुत्व>चर्त्व>छत्व[1]
	शान्तिः+अनन्तरम्	शान्तिरनन्तरम्	रेफ-सन्धिः[2]

समासः -	कर्मफलत्यागः	कर्मणः फलम् कर्मफलम्,	षष्ठी-तत्पुरुषः
		कर्मफलानां त्यागः	षष्ठी-तत्पुरुषः

पदार्थकोशः

अभ्यासात् सम्यग्ज्ञानरहितात् [सुबो०]। निदिध्यासनात् [चतु०]।

ज्ञानम् युक्तिसहितोपदेशपूर्वकम् [सुबो०]। श्रवणमननजं परोक्षम्, तत्त्वनिश्चयात्मकम् [चतु०]।

श्रेयः श्रेष्ठम् [सुबो०]।

ध्यानम् विष्णोः श्रवणकीर्तनादि [चतु०]। भगवन्मयत्वम् [गीता०]।

विशिष्यते विशेषत्वं याति [गीता०]।

कर्मफलत्यागः सर्वकर्मणां फलत्यागः श्रेयःसाधनम् उपदिष्टम्, न प्रथमम् एव। अतः च श्रेयो हि ज्ञानम् अभ्यासात् इति उत्तरोत्तरविशिष्टत्वोपदेशेन सर्वकर्मफलत्यागः स्तूयते, सम्पन्नसाधनानुष्ठानाशक्तौ अनुष्ठेयत्वेन श्रुतत्वात् [शा०]।

हि प्रसिद्धम् [टि०]।

अनन्तरम् अव्यवधानेन [चतु०]।

शान्तिः उपशमः सहेतुकस्य संसारस्य [शा०]। संसारशान्तिः [सुबो०]। मोक्षः [चतु०]। आत्यन्तिकी शान्तिः [गीता०]।

===

❖ *धर्म्यामृतम् - अर्थात्तद्विष्णोः परमं पदम् अभीप्सूनां कृते भगवता उक्ताः जीवन्मुक्तधर्माः* ❖

(५७) **अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।**
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥ भक्तियोगः **१२-१३॥**

---

1 झलां जशोऽन्ते (८।२।३९)>स्तोः श्चुना श्चुः (८।४।४०)>खरि च (८।४।५५)>शश्छोऽटि (८।४।६३)

2 ससजुषो रुः (८।२।६६)

(५८) **सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।**
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥ भक्तियोगः **१२-१४॥**

पदच्छेदः अद्वेष्टा सर्व-भूतानाम् मैत्रः करुण एव च।
निर्ममः निरहङ्कारः सम-दुःख-सुखः क्षमी ॥
सन्तुष्टः सततम् योगी यतात्मा दृढ-निश्चयः।
मयि अर्पित-मनः-बुद्धिः यः मत्-भक्तः सः मे प्रियः ॥

अन्वयः - यः सर्वभूतानाम् अद्वेष्टा मैत्रः च करुणः एव निर्ममः निरहङ्कारः समदुःखसुखः क्षमी योगी सततं सन्तुष्टः यतात्मा दृढनिश्चयः (अस्ति) सः मयि अर्पितमनोबुद्धिः मद्भक्तः मे प्रियः (अस्ति)।

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
यः	यद् [पुं-प्र-एक]	**योगी**	योगिन् [पुं-प्र-एक]
सर्वभूतानाम्	सर्वभूत [पुं-ष-बहु]	**सततम्**	सततम् [अव्य]
अद्वेष्टा	अद्वेष्ट [पुं-प्र-एक]	**सन्तुष्टः**	सन्तुष्ट [पुं-प्र-एक]
मैत्रः	मैत्र [पुं-प्र-एक]	**यतात्मा**	यतात्मन् [पुं-प्र-एक]
च	च [अव्य]	**दृढनिश्चयः**	दृढनिश्चय [पुं-प्र-एक]
करुणः	करुण [पुं-प्र-एक]	**सः**	तद् [पुं-प्र-एक]
एव	एव [अव्य]	**मयि**	अस्मद् [स-एक]
निर्ममः	निर्मम [पुं-प्र-एक]	**अर्पितमनोबुद्धिः**	अर्पितमनोबुद्धि [स्त्री-प्र-एक]
निरहङ्कारः	निरहङ्कार [पुं-प्र-एक]	**मद्भक्तः**	मद्भक्त [पुं-प्र-एक]
समदुःखसुखः	समदुःखसुख [पुं-प्र-एक]	**मे**	अस्मद् [ष-एक]
क्षमी	क्षमिन् [पुं-प्र-एक]	**प्रियः**	प्रिय [पुं-प्र-एक]

पदार्थः

मूलम्	**हिन्दी**	**English**
यः	जो	He who
सर्वभूतानाम्	सभी भूतों में	of all living entities
अद्वेष्टा	द्वेषभाव से रहित,	non-hater
मैत्रः	मैत्री	friendly
च	और	and

करुणः	करुणायुक्त	compassionate
एव	तथा	certainly
निर्ममः	ममता से रहित,	free from attachment
निरहङ्कारः	अहंकार से रहित,	without egoism
समदुःखसुखः	सुख-दुःखों में समान	even-minded in pain and pleasure
क्षमी	क्षमावान् है	forgiving
योगी	योगी	the Yogī
सततम्	निरन्तर	ever
सन्तुष्टः	संतुष्ट है,	satisfied
यतात्मा	आत्मनियन्त्रित	self-controlled
दृढनिश्चयः	दृढ़ निश्चय वाला	with firm determination
(अस्ति)	है	is
सः	वह	he
मयि	मुझमें	in Me
अर्पितमनोबुद्धिः	मन बुद्धि अर्पित करने वाला	engaged mind and intellect
मद्भक्तः	मेरा भक्त	My devotee
मे	मुझको	to Me
प्रियः	प्रिय	dear
(अस्ति)	है।	is

भावार्थः

हिन्दी : हे अर्जुन ! अपने दुःख के कारण किसी से द्वेष नहीं करता है, सभी से मित्रवत् व्यवहार करता है, करुणा से युक्त, ममता से रहित, अहंकार रहित, सुख एवं दुःख में समान, क्षमावान्, योगी, सदा लाभ एवं हानि में प्रसन्न, आत्मनियन्त्रित एवं दृढ़ श्रद्धा वाला है, वह मुझ निर्गुण ब्रह्म में मन बुद्धि समर्पित करने वाला मेरा भक्त मुझको प्रिय है।

English : O Arjuna! He who due to his own pain is a non-hater of all living entities, friendly and compassionate, free from attachment and

egoism, even-minded in pain and pleasure, forgiving, the Yogī, who is ever contented in profit and loss, self-controlled, with firm determination, a staunch believer and engaged mind and intellect in Me, he, My devotee is dear to Me.

सन्धिः -	करुणः+एव	करुण एव	रुत्व >यत्व>लोप-सन्धिः[1]
	निर्ममः+निरहङ्कारः	निर्ममो निरहङ्कारः	रुत्व>उत्व>गुण-सन्धिः[2]
	मयि+अर्पितमनोबुद्धिः	मय्यर्पितमनोबुद्धिः	यण्-सन्धिः[3]
	अर्पितमनोबुद्धिः+यः	अर्पितमनोबुद्धिर्यः	रेफ-सन्धिः[4]
	यः+मद्भक्तः	यो मद्भक्तः	रुत्व>उत्व>गुण- सन्धिः[5]
	सः+मे	स मे	विसर्गलोप-सन्धिः[6]

समासः -	सर्वभूतानाम्	सर्वाणि च तानि भूतानि सर्वभूतानि तेषाम्	कर्मधारयः
	अद्वेष्टा	न द्वेष्टा	नञ्-तत्पुरुषः
	निर्ममः	निर्गतः मम यस्मात् सः	पञ्चम्यर्थ-बहुव्रीहिः
	निरहङ्कारः	निर्गतः अहङ्कारः यस्मात् सः	पञ्चम्यर्थ-बहुव्रीहिः
	समदुःखसुखः	दुःखम् च सुखम् च दुःखसुखे,	इतरेतरयोगद्वन्द्वः
		समे दुःखसुखे यस्य सः	षष्ठ्यर्थ-बहुव्रीहिः
	यतात्मा	यतः आत्मा यस्य सः	षष्ठ्यर्थ-बहुव्रीहिः
	दृढनिश्चयः	दृढः निश्चयः यस्य सः	षष्ठ्यर्थ-बहुव्रीहिः
	अर्पितमनोबुद्धिः	मनः च बुद्धिः च मनोबुद्धी,	इतरेतरयोग-द्वन्द्वः
		अर्पिते मनोबुद्धी येन सः	तृतीयार्थ-बहुव्रीहिः
	मद्भक्तः	मम भक्तः	षष्ठी-तत्पुरुषः

1 ससजुषो रुः (८।२।६६)>भोभगो अघो अपूर्वस्य योऽशि (८।३।१७)>लोपः शाकल्यस्य (८।३।१९)
2 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
3 इको यणचि (६।१।७७)
4 ससजुषो रुः (८।२।६६)
5 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
6 एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६।१।१३२)

पदार्थकोशः

सर्वभूतानाम् सर्वाणि भूतानि [टि०]।

अद्वेष्टा न द्वेष्टा, आत्मनः दुःखहेतुमपि न किञ्चित् द्वेष्टि [शा०]। उत्तमेषु द्वेषशून्यः [सुबो०]।

मैत्रः मित्रभावः मैत्री मित्रतया वर्तते इति मैत्रः [शा०]। समेषु मित्रतया वर्तते इति [सुबो०]। अमत्सरता [गीता०]।

करुणः करुणा कृपा दुःखितेषु दया, तद्वान् करुणः, सर्वभूताभयप्रदः, सन्न्यासी [शा०]। करुणा यस्य अस्ति सः; अर्शआदिभ्योऽच् [पै०]। हीनेषु कृपालुः [सुबो०]।

एव अद्वेष्टा इत्यन्वयः एव शब्दः सर्वत्र सम्बध्यते। एकैकमप्यावश्यकमिति भावः [टि०]।

निर्ममः ममप्रत्ययवर्जितः [शा०]।

निरहङ्कारः निर्गताहम्प्रत्ययः [शा०]। मुख्यम् अक्षरविदो लक्षणम् [चतु०]।

समदुःखसुखः समे दुःखसुखे द्वेषरागयोः अप्रवर्तके यस्य सः समदुःखसुखः [शा०]। समे दुःखसुखे यस्य सः [सुबो०/चतु०]।

क्षमी क्षमावान्, आक्रुष्टः अभिहतो वा अविक्रियः एव आस्ते [शा०]। क्षमावान् [सुबो०]। क्षमावान् परिभवप्राप्तावपि स्वस्थचित्तः [चतु०]। क्षमा अपकारिणं शत्रुं प्रति अद्वेषबुद्धिः [गीता०]।

योगी समाहितचित्तः [शा०]। अप्रमत्तः [सुबो०]। श्रवणादौ समाहितचित्तः [चतु०]। प्रशान्तःकरणत्वात् [गीता०]।

सततम् नित्यम् [शा०]। सर्वदा [चतु०]। व्यवहारावस्थायामपि [गीता०]।

सन्तुष्टः देहस्थितिकारणस्य लाभे अलाभे च उत्पन्नालम्प्रत्ययः। तथा गुणवल्लाभे विपर्यये च सन्तुष्टः [शा०]। लाभेऽलाभे प्रसन्नचित्तः [सुबो०]। यदृच्छालाभेन एव सञ्जातालम्प्रत्ययः [चतु०]।

यतात्मा संयतस्वभावः [शा०/सुबो०]। संयतशरीरेन्द्रियादिसङ्घातः [चतु०]।

दृढनिश्चयः दृढः स्थिरः निश्चयः अध्यवसायः यस्य आत्मतत्त्वविषये स दृढनिश्चयः [शा०]। दृढो मद्विषयो निश्चयो यस्य सः [सुबो०]। दृढः स्थिरः आत्मतत्त्वविषये निश्चयो यस्य सः; असम्भावनाशून्यो दृढश्रद्धावान् [चतु०]।

मयि निर्गुणे ब्रह्मणि [चतु०]।

अर्पितमनोबुद्धिः सङ्कल्पात्मकं मनः, अध्यवसायलक्षणा बुद्धिः, ते मयि एव अर्पिते स्थापिते यस्य सन्न्यासिनः सः मय्यर्पितमनोबुद्धिः [शा०]। अर्पिते मनोबुद्धी येन [सुबो०]। अर्पिते निहिते प्रविलापिते वा मनः सङ्कल्पादिरूपं बुद्धिः अध्यवसायते उभे येन सः [चतु०]।

मद्भक्तः मम भक्तः [चतु०]। मद्भजनपरो ज्ञानवान् [टि०]।
प्रियः आत्मत्वात् एव सः परमप्रेमास्पदम् [चतु०]।

==

❖ *विष्णोः परमम् पदम् अभीप्सूनां कृते भगवतोक्ताः जीवन्मुक्तधर्माः* ❖

(५९) **यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।**
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ भक्तियोगः **१२-१५॥**

पदच्छेदः यस्मात् न उद्विजते लोकः लोकात् न उद्विजते च यः।
हर्ष-अमर्ष-भय-उद्वेगैः मुक्तः यः सः च मे प्रियः॥

अन्वयः - यस्मात् लोकः न उद्विजते च यः लोकात् न उद्विजते च यः हर्षामर्षभयोद्वेगैः मुक्तः (अस्ति) सः मे प्रियः (अस्ति)।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
यस्मात्	यद् [पुं-पं-एक]	**उद्विजते**	उद्-विज् [कर्तरि-लट्-प्र-एक-आत्मने]
लोकः	लोक [पुं-प्र-एक]	**हर्षामर्षभयोउद्वेगैः**	हर्षामर्षभयोद्वेग [पुं-तृ-बहु]
न	न [अव्य]	**मुक्तः**	मुच् [कृत्-प्रत्ययः-क्त-पुं-प्र-एक]
च	च [अव्य]	**सः**	तद् [पुं-प्र-एक]
यः	यद् [पुं-प्र-एक]	**मे**	अस्मद् [ष-एक]
लोकात्	लोक [पुं-पं-एक]	**प्रियः**	प्रिय [पुं-प्र-एक]

पदार्थः

मूलम्	हिन्दी	English
यस्मात्	जिससे	from whom
लोकः	लोक	the world
न	नहीं	not
उद्विजते	उद्वेग को प्राप्त होता	agitates
च	और	also
यः	जो	anyone

लोकात्	लोक से	from persons
न	नहीं	never
उद्विजते	उद्वेग को प्राप्त होता	agitated
च	तथा	also
यः	जो	He who
हर्षामर्षभयोद्वेगैः	हर्ष, अमर्ष भय और उद्वेग से	from happiness, envy, fear and anxiety
मुक्तः	मुक्त	freed
(अस्ति)	है	is
सः	वह	he
मे	मुझको	to Me
प्रियः	प्रिय	dear
(अस्ति)	है।	is

भावार्थः

हिन्दी : जिससे लोक भय एवं शंका के कारण उद्वेग को नहीं प्राप्त होते हैं और जो लोक से उद्वेग को नहीं प्राप्त होता तथा जो हर्ष, असहिष्णुता, भय और उद्वेग से मुक्त है, वह मुझको प्रिय है।

English : He from whom the entities are not agitated due to fear and doubt and who cannot be agitated by the entities, also he who is freed from joy, envy, fear and anxiety, he is dear to Me.

सन्धिः -	यस्मात्+न	यस्मान्न	अनुनासिक-सन्धिः[1]
	न+उद्विजते	नोद्विजते	गुण-सन्धिः[2]
	लोकः+लोकात्	लोको लोकात्	रुत्व>उत्व>गुण-सन्धिः[3]
	लोकात्+न	लोकान्न	अनुनासिक-सन्धिः[4]
	हर्षामर्षभयोद्वेगैः+मुक्तः	हर्षामर्षभयोद्वेगैर्मुक्तः	रेफ-सन्धिः[5]

1 यरोऽनुनासिकेऽनुनासिको वा (८।४।४५)
2 आद्गुणः (६।१।८७)
3 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद्गुणः (६।१।८७)
4 यरोऽनुनासिकेऽनुनासिको वा (८।४।४५)
5 ससजुषो रुः (८।२।६६)

मुक्तः+यः	मुक्तो यः	रुत्व>उत्व>गुण-सन्धिः[1]
सः+च	स च	विसर्गलोप-सन्धिः[2]

समासः -	हर्षामर्षभयोद्वेगैः	न मर्षः अमर्षः,	नञ्-तत्पुरुषः
		हर्षः च अमर्षः च भयं च उद्वेगः च हर्षामर्षभयोद्वेगाः तैः|	इतरेतरयोग-द्वन्द्वः

पदार्थकोशः

यस्मात् समाधिस्थत्वेन काष्ठसमात् [चतु०]।

लोकः जनः [सुबो०]।

उद्विजते उद्वेगं गच्छति; सन्तप्यते; संक्षुभ्यति [शा०]।
भयशङ्कया सङ्क्षोभं प्राप्नोति [सुबो०]। त्रस्यति [चतु०]।

यः निर्मनस्कत्वात् [चतु०]।

हर्षामर्षभयोद्वेगैः हर्षः च अमर्षः च भयं च उद्वेगः च तैः हर्षामर्षभयोद्वेगैः; हर्षः प्रियलाभे अन्तःकरणस्य उत्कर्षः रोमाञ्चनाश्रुपातादिलिङ्गः, अमर्षः असहिष्णुता, भयं त्रासः उद्वेगः उद्विग्नता, तैः [शा०]। हर्षः स्वस्य इष्टार्थलाभे उत्साहः; अमर्षः परस्य लाभे असहनं; भयं त्रासः; उद्वेगो भयादिनिमित्तश्चित्तक्षोभः एतैः [सुबो०]। हर्ष इष्टलाभे सति मनसः उत्फुल्लता; अमर्षः असहिष्णुता; भयम् आत्मोच्छेदशङ्का; उद्वेगः तत्कृतैव व्याकुलता [चतु०]।

मुक्तः त्यक्तः [चतु०]।

❖ ***विष्णोः परमम् पदम् अभीप्सूनां कृते भगवतोक्ताः जीवन्मुक्तधर्माः*** ❖

(६०) **अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।**
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ भक्तियोगः **१२-१६॥**

पदच्छेदः अनपेक्षः शुचिः दक्षः उदासीनः गत-व्यथः।
सर्वारम्भ-परित्यागी यः मत्-भक्तः सः मे प्रियः ॥

1 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद्गुणः (६।१।८७)

2 एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६।१।१३२)

अन्वयः - यः अनपेक्षः शुचिः दक्षः उदासीनः गतव्यथः (अस्ति) सः सर्वारम्भपरित्यागी मद्भक्तः मे प्रियः (अस्ति)।

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
यः	यद् [पुं-प्र-एक]	**सः**	तद् [पुं-प्र-एक]
अनपेक्षः	अनपेक्षः [पुं-प्र-एक]	**सर्वारम्भपरित्यागी**	सर्वारम्भपरित्यागिन् [पुं-प्र-एक]
शुचिः	शुचि [पुं-प्र-एक]	**मद्भक्तः**	मद्भक्त [पुं-प्र-एक]
दक्षः	दक्ष [पुं-प्र-एक]	**मे**	अस्मद् [ष-एक]
उदासीनः	उदासीन [पुं-प्र-एक]	**प्रियः**	प्रिय [पुं-प्र-एक]
गतव्यथः	गतव्यथ [पुं-प्र-एक]		

पदार्थः

मूलम्	**हिन्दी**	**English**
यः	जो पुरुष	He who
अनपेक्षः	अपेक्षा से रहित	no expectation
शुचिः	शुद्ध	pure
दक्षः	कुशल	skillful
उदासीनः	पक्षपात से रहित	unconcerned
गतव्यथः	दुःखों से परे	untroubled
(अस्ति)	है	is
सः	वह	he
सर्वारम्भपरित्यागी	समस्त आरम्भों को त्यागने वाला	renouncer of all endeavours
मद्भक्तः	मेरा भक्त	My devotee
मे	मुझको	to Me
प्रियः	प्रिय	dear
(अस्ति)	है।	is

भावार्थः

हिन्दी : जो पुरुष अपेक्षा से रहित, बाह्य एवं आन्तरिक रूप से शुद्ध, कुशल पक्षपात से रहित एवं भयरहित है, वह समस्त सभी कर्मों के आरम्भों को त्यागने वाला मेरा भक्त, मुझको प्रिय है।

English : He who has no expectation, is pure (externally as well as internally), skillful, unconcerned, untroubled, renouncing all endeavours, he, My devotee is dear to Me.

सन्धिः -	शुचिः+दक्षः	शुचिर्दक्षः	रेफ-सन्धिः[1]
	दक्षः+उदासीनः	दक्ष उदासीनः	रुत्व >यत्व>लोप-सन्धिः[2]
	उदासीनः+गतव्यथः	उदासीनो गतव्यथः	रुत्व>उत्व>गुण-सन्धिः[3]
	यः+मद्भक्तः	यो मद्भक्तः	रुत्व>उत्व>गुण-सन्धिः[4]
	सः+मे	स मे	विसर्गलोप-सन्धिः[5]

समासः -	अनपेक्षः	अविद्यमाना अपेक्षा यस्य सः	षष्ठ्यर्थ-बहुव्रीहिः
	गतव्यथः	गता व्यथा यस्य सः	षष्ठ्यर्थ-बहुव्रीहिः
	सर्वारम्भपरित्यागी	सर्वे ते आरम्भाः सर्वारम्भाः	कर्मधारयः
		सर्वारम्भानां परित्यागी	षष्ठी-तत्पुरुषः
	मद्भक्तः	मम भक्तः	षष्ठी-तत्पुरुषः

पदार्थकोशः

अनपेक्षः देहेन्द्रियविषयसम्बन्धादिषु अपेक्षाविषयेषु अनपेक्षः निःस्पृहः [शा०]। यदृच्छोपस्थिते अपि अर्थे निःस्पृहः [सुबो०]। सुखप्राप्तौ दुःखहाने वा तत्साधने वा लिप्साशून्यः [चतु०]।

शुचिः बाह्येन आभ्यन्तरेण च शौचेन सम्पन्नः [शा०]। बाह्याभ्यन्तरशौचसम्पन्नः [सुबो०]। बाह्याभ्यन्तरशौचवान् पुण्यापुण्याभ्यामलिप्तो वा [चतु०]।

दक्षः प्रत्युत्पन्नेषु कार्येषु सद्यः यथावत् प्रतिपत्तुं समर्थः [शा०]। अनलसः [सुबो०]। भगवत् भजनादावनलसः [चतु०]।

उदासीनः न कस्यचित् मित्रादेः पक्षं भजते यः, सः उदासीनः यतिः [शा०]।

1 ससजुषो रुः (८।२।६६)
2 ससजुषो रुः (८।२।६६)>भोभगो अघो अपूर्वस्य योऽशि (८।३।१७)>लोपः शाकल्यस्य (८।३।१९)
3 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
4 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
5 एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६।१।१३२)

	पक्षपातरहित: [सुबो०]। मानापमानादौ समवृत्ति: [चतु०]।
गतव्यथ:	गतभय: [शा०]। आधिशून्य: [सुबो०]। गता: व्यथा: चेत:पीडा यस्य स:[चतु०]।
सर्वारम्भपरित्यागी	आरभ्यन्ते इति आरम्भा: इहामुत्रफलभोगार्थानि कामहेतूनि कर्माणि सर्वारम्भा:, तान् परित्यक्तं शीलम् अस्य इति सर्वारम्भपरित्यागी [शा०]। सर्वान् दृष्टादृष्टार्थान् आरम्भानुद्यमान् परित्यक्तुं शीलं यस्य स: [सुबो०]। सन्न्यासी [चतु०]।

==

❖ विष्णो: परमम् पदम् अभीप्सूनां कृते भगवतोक्ता: जीवन्मुक्तधर्मा: ❖

(६१) **यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।**
शुभाशुभपरित्यागी भक्तिमान्य: स मे प्रिय: ॥ भक्तियोग: **१२-१७॥**

पदच्छेद: य: न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभ-अशुभ-परित्यागी भक्तिमान् य: स: मे प्रिय: ॥

अन्वय: - य: न हृष्यति (य:) न द्वेष्टि (य:) न शोचति (य:) न काङ्क्षति य: शुभाशुभपरित्यागी (अस्ति) स: भक्तिमान् मे प्रिय: (अस्ति)।

पदपरिचय:

मूलम्	**पदपरिचय:**	**मूलम्**	**पदपरिचय:**
य:	यद् [पुं-प्र-एक]	**शुभाशुभपरित्यागी**	शुभाशुभपरित्यागिन् [पुं-प्र-एक]
न	न [अव्य]	**स:**	तद् [पुं-प्र-एक]
हृष्यति	हृष् [कर्तरि-लट्-प्र-एक-परस्मै]	**भक्तिमान्**	भक्तिमत् [पुं-प्र-एक]
द्वेष्टि	द्विष् [कर्तरि-लट्-प्र-एक-परस्मै]	**मे**	अस्मद् [ष-एक]
शोचति	शुच् [कर्तरि-लट्-प्र-एक-परस्मै]	**प्रिय:**	प्रिय [पुं-प्र-एक]
काङ्क्षति	काङ्क्ष् [कर्तरि-लट्-प्र-एक-परस्मै]		

पदार्थः

मूलम्	हिन्दी	English
यः	जो	who
न	न	not
हृष्यति	हर्षित होता है	rejoices
(यः)	जो	who
न	न	not
द्वेष्टि	द्वेष करता है,	hates
(यः)	जो	who
न	न	not
शोचति	शोक करता है	grieves
(यः)	जो	who
न	न	not
काङ्क्षति	कामना करता है	desires
यः	जो	who
शुभाशुभपरित्यागी	शुभ और अशुभ का त्यागी	renouncer of good and evil
(अस्ति)	है	is
सः	वह	he
भक्तिमान्	भक्तिमान्	devotee
मे	मुझको	to Me
प्रियः	प्रिय	dear
(अस्ति)	है।	is

भावार्थः

हिन्दी : जो प्रिय को प्राप्त कर एवं अपने लाभ के प्राप्त होने पर हर्षित नहीं होता है, जो अप्रिय की प्राप्ति अथवा अनिष्ट होने पर द्वेष नहीं करता है, जो इच्छित अर्थ के नाश पर या इच्छित के वियोग पर शोक नहीं करता है, जो इष्ट की कामना नहीं करता है जो शुभ और अशुभ एवं राग और द्वेष का त्याग करने वाला है, वह भक्तिमान् पुरुष, मुझको प्रिय है।

English : He who neither rejoices on attaining favourite object and profit, nor hates on attaining unpleasant object or in case of failure, nor grieves on destruction of or separation from intended significance, nor desires for favour, renouncing good and evil as well as anger and hatred, he, the devotee is dear to Me.

सन्धिः -	यः+न	यो न	रुत्व>उत्व>गुण-सन्धिः[1]
	सः+मे	स मे	विसर्गलोप-सन्धिः[2]

समासः -	शुभाशुभपरित्यागी	न शुभम् अशुभम्,	नञ्-तत्पुरुषः
		शुभं च अशुभं च शुभाशुभे	इतरेतरयोगद्वन्द्वः
		शुभाशुभयोः परित्यागी	षष्ठी-तत्पुरुषः

पदार्थकोशः

यः	प्रियं प्राप्य [सुबो०]। इष्टलाभे सति [चतु०]।
हृष्यति	इष्टप्राप्तौ [शा०]।
द्वेष्टि	अनिष्टप्राप्तौ [शा०]।
शोचति	प्रियवियोगे [शा०]। प्रियवियोगे शोकनिमित्तं प्राप्य; अत: तत् न द्वेष्टि [टि०]।
काङ्क्षति	अप्राप्तम् [शा०]।
शुभाशुभपरित्यागी	शुभाशुभे कर्मणी परित्यक्तुं शीलम् अस्य इति शुभाशुभपरित्यागी [शा०]। शुभाशुभे पुण्यपापे परित्यक्तुं शीलं यस्य स: [सुबो०]। शुभं कल्याणं पुण्यं अशुभम् अमङ्गलं पापं च ते उभे परित्यक्तुं शीलमस्य स: [चतु०]।
भक्तिमान्	भक्तौ सततोद्युक्तः [चतु०]।

===

❖ विष्णोः परमम् पदम् अभीप्सूनां कृते भगवतोक्ताः जीवन्मुक्तधर्माः ❖

(६२) **समः शत्रौ च मित्रे च तथा मानापमानयोः ।**
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥ भक्तियोगः **१२-१८॥**

1 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
2 एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६।१।१३२)

(६३) **तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।**
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ भक्तियोगः **१२-१९॥**

पदच्छेदः- समः शत्रौ च मित्रे च तथा मान-अपमानयोः।
शीत-उष्ण-सुख-दुःखेषु समः सङ्ग-विवर्जितः ॥
तुल्य-निन्दा स्तुतिः मौनी सन्तुष्टः येन केनचित्।
अनिकेतः स्थिर-मतिः भक्तिमान् मे प्रियः नरः ॥

अन्वयः - शत्रौ च मित्रे मानापमानयोः समः तथा शीतोष्णसुखदुःखेषु समः च सङ्गविवर्जितः तुल्यनिन्दास्तुतिः मौनी येन केनचित् सन्तुष्टः अनिकेतः स्थिरमतिः भक्तिमान् नरः मे प्रियः (अस्ति)।

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
शत्रौ	शत्रु [पुं-स-एक]	**येन**	यद् [पुं-तृ-एक]
च	च [अव्य]	**केनचित्**	किञ्चित् [पुं-तृ-एक]
मित्रे	मित्र [नपुं-स-एक]	**सन्तुष्टः**	सन्तुष्ट [पुं-प्र-एक]
मानापमानयोः	मानापमान [पुं-ष-द्वि]	**अनिकेतः**	अनिकेत [पुं-प्र-एक]
समः	सम [पुं-प्र-एक]	**स्थिरमतिः**	स्थिरमति [स्त्री-प्र-एक]
तथा	तथा [अव्य]	**भक्तिमान्**	भक्तिमत् [पुं-प्र-एक]
शीतोष्णसुखदुःखेषु	शीतोष्णसुखदुःख [नपुं-स-बहु]	**नरः**	नर [पुं-प्र-एक]
सङ्गविवर्जितः	सङ्गविवर्जित [पुं-प्र-एक]	**मे**	अस्मद् [ष-एक]
तुल्यनिन्दास्तुतिः	तुल्यनिन्दास्तुति [स्त्री-प्र-एक]	**प्रियः**	प्रिय [पुं-प्र-एक]
मौनी	मौनिन् [पुं-प्र-एक]		

पदार्थः

मूलम्	**हिन्दी**	**English**
शत्रौ	शत्रु	to the enemy
च	और	and
मित्रे	मित्र में	to friend
मानापमानयोः	मान एवं अपमान में	in honour and dishonour
समः	समान है	alike

तथा	तथा	also
शीतोष्णसुखदुःखेषु	शीत, गर्म और सुख दुःख आदि में	in cold-heat and pleasure-pain
समः	समान है	alike
च	और	and
सङ्गविवर्जितः	आसक्ति से रहित	free from attachment
तुल्यनिन्दास्तुतिः	निन्दा एवं स्तुति में समान	equal in censure and praise
मौनी	मौनी	silent
येन	जिस	with
केनचित्	किसी भी प्रकार से	anything
सन्तुष्टः	सन्तुष्ट	satisfied
अनिकेतः	निवास रहित	homeless
स्थिरमतिः	स्थिरबुद्धि	firm determination
भक्तिमान्	भक्तिमान्	devoted
नरः	पुरुष	man
मे	मुझको	to Me
प्रियः	प्रिय	dear
(अस्ति)	है।	is

भावार्थः

हिन्दी : जो शत्रु और मित्र एवं मान एवं अपमान में समान है तथा शीत - उष्ण और सुख - दुःख आदि में समान होत है और आसक्ति से रहित है। निन्दा एवं स्तुति में समान, मौनी, किसी भी प्रकार से शरीर निर्वहण करने में सन्तुष्ट, आवास आदि में आसक्ति न रखने वाला है और जो मुझमें चित्त को स्थापित करने वाला, स्थिरबुद्धि से युक्त है, वह भक्तिमान् पुरुष मुझको प्रिय है।

English : He who is alike to the enemy and friend and also in honour and dishonour, alike in cold-heat and pleasure-pain and is free from attachment. He who is equal in censure and praise, silent, content with anything to sustain himself, no attachment for home, fixing the mind on Me, with firm determination, that man, a devotee, is dear to Me.

सन्धिः -तुल्यनिन्दास्तुतिः+मौनी	तुल्यनिन्दास्तुतिर्मौनी	रेफ-सन्धिः[1]
सन्तुष्टः+येन	सन्तुष्टो येन	रुत्व>उत्व>गुण-सन्धिः[2]
स्थिरमतिः+भक्तिमान्	स्थिरमतिर्भक्तिमान्	रेफ-सन्धिः[3]
प्रियः+नरः	प्रियो नरः	रुत्व>उत्व>गुण-सन्धिः[4]

समासः - मानापमानयोः	मानः च अपमानः च मानापमानौ तयोः	इतरेतरयोग-द्वन्द्वः
शीतोष्णसुखदुःखेषु	शीतं च उष्णं च शीतोष्णे	इतरेतरयोग-द्वन्द्वः
	सुखं च दुःखम् च सुखदुःखे	इतरेतरयोग-द्वन्द्वः
	शीतोष्णे च सुखदुःखे च	इतरेतरयोग-द्वन्द्वः
	शीतोष्णसुखदुःखानि तेषु	
सङ्गविवर्जितः	सङ्गैः विवर्जितः	तृतीया-तत्पुरुषः
तुल्यनिन्दास्तुतिः	निन्दा च स्तुतिः च निन्दास्तुती	इतरेतरयोगद्वन्द्वः
	तुल्ये निन्दास्तुती यस्य सः	षष्ठ्यर्थ-बहुव्रीहिः
अनिकेतः	अविद्यमानः निकेतः यस्य सः	षष्ठ्यर्थ-बहुव्रीहिः
स्थिरमतिः	स्थिरा मतिः यस्य सः	षष्ठ्यर्थ-बहुव्रीहिः

पदार्थकोशः

मानापमानयोः पूजापरिभवयोः [टि०]।

समः एकरूपः, हर्षविषादशून्यः [सुबो०]।

शीतोष्णसुखदुःखेषु पूजापरिभवयोः [शा०]।

समः शत्रुमित्रादाविव शीतोष्णादावपि समत्वमावश्यकमिति सूचनाय सम इत्यस्य पुनः प्रयोगः [टि०]।

सङ्गविवर्जितः क्वचिदप्यनासक्तः [सुबो०]। [अस्ति]।

तुल्यनिन्दास्तुतिः निन्दा च स्तुतिः च निन्दास्तुती ते तुल्ये यस्य सः तुल्यनिन्दास्तुतिः [शा०]। तुल्ये निन्दास्तुती यस्य [सुबो०]।

---

1 ससजुषो रुः (८।२।६६)
2 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
3 ससजुषो रुः (८।२।६६)
4 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)

मौनी	मौनवान् संयतवाक् [शा०]। संयतवाक् [सुबो०]। सन्यासी [चतु०]।
केनचित्	शरीरस्थितिहेतुमात्रेण [शा०]। यथालब्धेन [सुबो०]।
अनिकेत:	निकेत: आश्रय: निवास: नियत: न विद्यते यस्य स: अनिकेत: [शा०]। अगृह: [पै०]। नियतवासशून्य: [सुबो०]। गृहशून्य: कुटीमपि वासार्थं नारभते [चतु०]।
स्थिरमति:	स्थिरा परमार्थवस्तुविषया मति: यस्य स: स्थिरमति: [शा०]। व्यवस्थितचित्त: [सुबो०]। स्थितप्रज्ञः [चतु०]।
भक्तिमान्	योगी [चतु०]।
नर:	पुरुष: [चतु०]।

==

❖ *धर्म्यामृतानुष्ठानस्य फलश्रुति:। यथोक्तधर्मपराणां स्वप्रीतिविषयत्वकथनम्* ❖

(६४) **ये तु धर्म्यामृतमिदं यथोक्तम् पर्युपासते।**
श्रद्धाना मत्परमा भक्तास्तेतीव मे प्रिया: ॥ भक्तियोगः १२-२०॥

पदच्छेद: ये तु धर्म्य-अमृतम् इदम् यथा-उक्तम् पर्युपासते।
श्रद्धाना मत्-परमाः भक्ताः ते अतीव मे प्रियाः ॥

अन्वय: - तु ये श्रद्धानाः मत्परमाः इदं यथा उक्तं धर्म्यामृतम् पर्युपासते ते भक्ताः मे अतीव प्रियाः (सन्ति)।

पदपरिचय:

मूलम्	पदपरिचय:	मूलम्	पदपरिचय:
तु	तु [अव्य]	**धर्म्यामृतम्**	धर्म्यामृत [नपुं-द्वि-एक]
ये	यद् [पुं-प्र-बहु]	**पर्युपासते**	परि-उप-आस् [कर्तरि-लट्-प्र-बहु-आत्मने]
श्रद्धानाः	श्रद्धान [पुं-प्र-बहु]	**ते**	तद् [पुं-प्र-बहु]
मत्परमाः	मत्परम [पुं-प्र-बहु]	**भक्ताः**	भक्त [पुं-प्र-बहु]
इदम्	इदम् [नपुं-द्वि-एक]	**मे**	अस्मद् [ष-एक]
यथा	यथा [अव्य]	**अतीव**	अतीव [अव्य]
उक्तम्	वच् [कृत्-प्रत्ययः:क्त-नपुं-द्वि-एक]	**प्रियाः**	प्रिय [पुं-प्र-बहु]

पदार्थः

मूलम्	संस्कृतम्	हिन्दी	English
तु	परन्तु	परन्तु	but
ये	ये	जो	they who
श्रद्दधानाः	श्रद्धायुक्ताः पुरुषाः	श्रद्धायुक्त पुरुष	endowed with faith
मत्परमाः	मम परायणाः	मेरे परायण होकर	regarding Me as Supreme goal
इदम्	इदम्	इस	such
यथा	यथा	प्रकार	as
उक्तम्	उक्तम्	कहे हुए	said
धर्म्यामृतम्	धर्मयुक्तम् अमृतम्	धर्मरूपी अमृत को	righteous nectar
पर्युपासते	उपासनां कुर्वन्ति	उपासना करते हैं,	worship
ते	ते	वे	those
भक्ताः	भक्ताः	भक्त	devotees
मे	मम	मुझको	to Me
अतीव	अधिकम्	अत्यन्त	exceedingly
प्रियाः	प्रियाः	प्रिय	dear
(सन्ति)	सन्ति	हैं।	are

भावार्थः

हिन्दी - परन्तु जो श्रद्धायुक्त पुरुष, मेरे परायण होकर, इस प्रकार कहे हुए धर्म-रूपी अमृत की उपासना करते हैं, वे श्रद्धा करते हुए शान्ति आदि से युक्त मेरा भजन करने वाले भक्त मुझको अत्यन्त प्रिय हैं।

English - But they who are endowed with faith, regarding Me as Supreme goal, such as is said, worship the righteous nectar such as is instructed, those peace-loving devotees endowed with faith are exceedingly dear to Me.

सन्धिः -

यथा+उक्तम्	यथोक्तम्	गुण-सन्धिः[1]
श्रद्दधानाः+मत्परमाः	श्रद्दधाना मत्परमाः	रुत्व>यत्व>लोप-सन्धिः[2]
मत्परमाः+भक्ताः	मत्परमा भक्ताः	रुत्व>यत्व>लोप-सन्धिः[3]
भक्ताः+ते	भक्तास्ते	सत्व-सन्धिः[4]
ते+अतीव	तेऽतीव	पूर्वरूप-सन्धिः[5]

समासः -

मत्परमाः	मम परमः यस्य सः मत्परमः ते	बहुव्रीहिः
धर्म्यामृतम्	धर्म्यं च तत् अमृतं च	कर्मधारयः
अमृतम्	न मृतम् अमृतम्	नञ्-तत्पुरुषः
यथोक्तम्	उक्तम् अनतिक्रम्य	अव्ययीभावः

पदार्थकोशः

तु पूर्वोक्तमुक्तापेक्षया विलक्षणाः [चतु०]।

ये सन्न्यासिनः [शा०]। मुमुक्षवः [चतु०]।

श्रद्दधानाः श्रद्धायुक्ताः [चतु०]। परमेश्वरविषयसमावेशितहृदयः [गीता०]।

मत्परमाः यथोक्तः अहम् अक्षरात्मा परमः निरतिशया गतिः येषां ते मत्परमाः [शा०]।
अहमेव भगवान् वासुदेवोऽक्षराख्यः सर्वविशेषरहितः परमानन्दरूपः परमः पार्यन्तिकः प्राप्यो येषां ते [चतु०]।

यथा यथोक्तम् उक्तप्रकारम् [सुबो०]।
अद्वेष्टा सर्वभूतानाम् इत्यादिना ग्रन्थेन प्रतिपादितम् [चतु०]।

धर्म्यामृतम् धर्माद् अनपेतं धर्म्यं च तत् अमृतं च तत्, अमृतत्वहेतुत्वात् [शा०]।
धर्मात् अनपेतम् [पै०]। धर्म एवामृतम् अमृतत्वसाधनत्वात् [सुबो०]।
धर्मजातं तदेवामृतस्य मोक्षस्य साधनत्वात् अमृतम् [चतु०]।

पर्युपासते अनुतिष्ठन्ति [शा०/सुबो०]

---

1 आद् गुणः (६।१।८७)
2 ससजुषो रुः (८।२।६६)>भोभगोअघो अपूर्वस्य योऽशि (८।३।१७)>हलि सर्वेषाम् (८।३।२२)
3 ससजुषो रुः (८।२।६६)>भोभगोअघो अपूर्वस्य योऽशि (८।३।१७)>हलि सर्वेषाम् (८।३।२२)
4 विसर्जनीयस्य सः (८।३।३४)
5 एङः पदान्तादति (६।१।१०९)

भक्ताः श्रद्धां कुर्वन्तः मत्परमाः [सुबो०]। शान्तिदान्त्यादिमन्तो मद्भजनशीलाः [चतु०]।

अतीव अत्यन्तम् [टि०]।

==

❖ *क्षेत्रज्ञस्य स्वरूपम्* ❖

(६५) **ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते**

ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ क्षेत्रक्षेत्रज्ञविभागयोगः **१३-१७॥**

पदच्छेदः ज्योतिषाम् अपि तत् ज्योतिः तमसः-परम उच्यते।

ज्ञानं ज्ञेयं ज्ञान-गम्यं हृदि सर्वस्य विष्ठितम्॥

अन्वयः - तत् ज्योतिषाम् अपि ज्योतिः तमसः परम् उच्यते (तत्) ज्ञानं ज्ञेयं ज्ञानगम्यं (च) सर्वस्य हृदि विष्ठितम् (अस्ति)

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
तत्	तद् [नपुं-प्र-एक]	**ज्ञानम्**	ज्ञान [नपुं-प्र-एक]
ज्योतिषाम्	ज्योतिस् [पुं-ष-बहु]	**ज्ञेयम्**	ज्ञेय [नपुं-प्र-एक]
अपि	अपि [अव्य]	**ज्ञानगम्यम्**	ज्ञान-गम्य [नपुं-प्र-एक]
ज्योतिः	ज्योतिस् [नपुं-प्र-एक]	**(च)**	(च [अव्य])
तमसः	तमस् [नपुं-ष-एक]	**सर्वस्य**	सर्व [पुं-ष-एक]
परम्	पर [नपुं-प्र-एक]	**हृदि**	हृद् [नपुं-स-एक]
उच्यते	वच्[कर्मणि-लट्-प्र-एक-आत्मने]	**विष्ठितम्**	वि स्था [कृत् प्रत्ययः:क्त- नपुं-प्र-एक]
(तत्)	(तद् [नपुं-प्र-एक])	**(अस्ति)**	(अस् [कर्तरि-लट्-प्र-एक-परस्मै]

पदार्थः

मूलम्	**हिन्दी**	**English**
तत्	वह परब्रह्म	that
ज्योतिषाम्	ज्योतियों का	in all luminous objects
अपि	भी	also

ज्योतिः	ज्योति	source of light
तमसः	तम से	tamas
परम्	अत्यन्त परे	beyond
उच्यते	कहा जाता है।	is said
(तत्)	वह	that
ज्ञानम्	ज्ञान को	knowledge
ज्ञेयम्	जानने योग्य	to be known
ज्ञानगम्यम्	तत्त्वज्ञान से प्राप्त	to be approached by knowledge
(च)	और	also
सर्वस्य	सबके	of everyone
हृदि	हृदय में	in the heart
विष्ठितम्	विशेषरूप से स्थित	situated
(अस्ति)	है	is

भावार्थः

हिन्दी : वह परब्रह्म ज्योतियों का भी ज्योति एवं तम से अत्यन्त परे कहा जाता है। वह परमात्मा बोधस्वरूप, जानने के योग्य एवं तत्त्व ज्ञान से प्राप्त करने योग्य है और सबके हृदय विशेष रूप स्थित है।

English : It is the source of light in all luminous objects and is beyond tamas. That godhead is knowledge itself, worth knowing, and worth attaining through real wisdom, and is particularly seated in the heart of all.

सन्धिः -	तत्+ज्योतिः	तज्ज्योतिः	जश्त्व >श्चुत्व-सन्धिः[1]
	ज्योतिः+तमसः	ज्योतिस्तमसः	सत्व-सन्धिः[2]

समासः -	ज्ञानगम्यम्	ज्ञानेन गम्यम्	तृतीयातत्पुरुषः

पदार्थकोशः

---

1 झलां जशोऽन्ते (८।२।३९)>स्तोः श्चुना श्चुः (८।४।४०)

2 विसर्जनीयस्य सः (८।३।३४)

ज्योतिषाम्	आदित्यानाम् [शा०]। चन्द्रादित्यादीनाम् [सुबो०]।
	बाह्यानामादित्यादीनामान्तराणाम् च बुद्ध्यादीनामितरावभासकानामपि [चतु०]।
ज्योतिः	प्रकाशकम् [सुबो०]। अवभासकम् [चतु०]।
तमसः	अज्ञानात् [पै०/सुबो०]। अज्ञानात् भूतग्रासप्रसवहेतोः [चतु०]।
परम्	असंस्पृष्टम् [पै०]। तेन असंस्पृष्टम् [सुबो०]। दूरस्थम् [चतु०]।
ज्ञानम्	अमानित्वादि [शा०/पै०]। तदेव बुद्धिवृत्तावभिव्यक्तम् [सुबो०]।
	ज्ञानस्वरूपम् ज्ञानं ज्ञायते अनेनेति ज्ञानसाधनम् [टि०]।
ज्ञेयम्	अनादि मत्परं ब्रह्मेत्यादि [पै०]। तदेव रूपाद्याकारेण [सुबो०]। ब्रह्म [चतु०]।
ज्ञानगम्यम्	ज्ञेयम् एव ज्ञातं सत् ज्ञानफलम् इति ज्ञानगम्यम् [शा०]।
	प्राप्यं फलम्- ज्ञानेन गम्यम् [पै०]। ज्ञानेन गम्यम्, पूर्वोक्तेन ज्ञानसाधनेन प्राप्यम् [सुबो०]।
	ज्ञानेन अमानित्वादिना ज्ञानसाधनेन गम्यं प्राप्यम् [चतु०]।
सर्वस्य	प्राणिजातस्य [शा०/पै०]। प्राणिमात्रस्य [सुबो०]।
हृदि	बुद्धौ [शा०/पै०]।
विष्ठितम्	विशेषेण स्थितम् [शा०]। विशेषेण स्थितम् [पै०]।
	विशेषेणाप्रच्युतस्वरूपेण नियन्तृतया स्थितम् [सुबो०]।

===

❖ *संसारस्य अविद्यिकत्वं तन्निवर्तकं सफलं तत्त्वज्ञानं च* ❖

(६६) **समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्।**
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥ क्षेत्रक्षेत्रज्ञविभागयोगः **१३-२७ ॥**

पदच्छेदः समं सर्वेषु भूतेषु तिष्ठन्तं परम-ईश्वरम्।
विनश्यत्सु अविनश्यन्तं यः पश्यति स पश्यति॥

अन्वयः - यः विनश्यत्सु सर्वेषु भूतेषु परमेश्वरम् अविनश्यन्तं (च) समं तिष्ठन्तम् पश्यति सः पश्यति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
यः	यद् [पुं-प्र-एक]	(च)	(च [अव्य])

विनश्यत्सु	वि-नश् [कृत्-प्रत्ययः:शतृ-पुं-स-बहु]	**समम्**	समम् [अव्य]
सर्वेषु	सर्व [पुं-स-बहु]	**तिष्ठन्तम्**	स्था[कृत् प्रत्ययः:शतृ-पुं-द्वि.-एक]
भूतेषु	भूत [पुं-स-बहु]	**पश्यति**	दृश् [कर्तरि-लट्-प्र-एक-परस्मै]
परमेश्वरम्	परमेश्वर[पुं-द्वि-एक]	**सः**	तद् [पुं-प्र.-एक]
अविनश्यन्तम्	अवि-नश् [कृत् प्रत्ययः:शतृ-पुं-द्वि.-एक]	**पश्यति**	दृश् [कर्तरि-लट्-प्र-एक-परस्मै]

पदार्थः

मूलम्	**हिन्दी**	**English**
यः	जो	anyone
विनश्यत्सु	नष्ट होते हुए	in the perishable
सर्वेषु	सब	in all
भूतेषु	चराचर भूतों में	living entities
परमेश्वरम्	परमेश्वर को	the Supreme being
अविनश्यन्तम्	नाशरहित	imperishable
(च)	(और)	and
समम्	समभाव से	equally
तिष्ठन्तम्	स्थित	residing
पश्यति	देखता है	sees
सः	वह	he
पश्यति	देखता है	actually sees

भावार्थः

हिन्दी : जो पुरुष नष्ट होते हुए सब चराचर भूतों में परमेश्वर को नाशरहित और समभाव से स्थित देखता है वही यथार्थ देखता है।

English : He alone truly sees, who sees the Supreme being as imperishable and abiding equally in all perishable beings.

सन्धिः -	विनश्यत्सु+अविनश्यन्तं	विनश्यत्स्वविनश्यन्तं	यण्-सन्धिः[1]
	सः+पश्यति	स पश्यति	विसर्गलोप-सन्धिः[2]

समासः -	परमेश्वरम्	परमः च असौ ईश्वरः तम्	कर्मधारयः
	अविनश्यन्तम्	न विनश्यन् अविनश्यन् तम्	नञ्-तत्पुरुषः

पदार्थकोशः

यः परमात्मानं जीवात्मानं वा [टि०]।
विनश्यत्सु विशिनष्टि [शा०]। अदर्शनं गच्छत्सु [चतु०]।
सर्वेषु स्थावरजङ्गमात्मकेषु [सुबो०]।
भूतेषु ब्रह्मादिस्थावरान्तेषु प्राणिषु [शा०]। देहाद्याकारेण परिणतेषु [चतु०]।
परमेश्वरम् देहेन्द्रियमनोबुद्ध्यव्यक्तात्मनः अपेक्ष्य परमेश्वरः, तम् [शा०]। परमात्मानम् [सुबो०]। अन्तर्यामिणं सर्गस्थित्यन्तकर्तारम् [चतु०]।
अविनश्यन्तम् सर्वासु अपि अवस्थासु अदर्शनम् अगच्छन्तम् [चतु०]।
समम् निर्विशेषम् [शा०]। निर्विशेषं सद्रूपेण [सुबो०]। अपरिणामिनं कूटस्थं नित्यम् [चतु०]।
तिष्ठन्तम् स्थितिं कुर्वन्तम् [शा०]।
पश्यति जानाति [टि०]।
पश्यति जानाति [टि०]।

===

❖ *संसारस्य अविविक्तत्वं तन्निवर्तकं सफलं तत्त्वज्ञानं च* ❖

(६७) **प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः**
यः पश्यति तथात्मानमकर्तारं स पश्यति ॥ क्षेत्रक्षेत्रज्ञविभागयोगः **१३-२९॥**

पदच्छेदः प्रकृति एव च कर्माणि- क्रियमाणानि सर्वशः।
यः पश्यति तथा आत्मानम् अ-कर्तारं स पश्यति॥

अन्वयः - च यः कर्माणि सर्वशः प्रकृत्या एव क्रियमाणानि पश्यति तथा आत्मानम् अकर्तारं (पश्यति) सः पश्यति।

1 इको यणचि (६।१।७७)
2 एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६।१।१३२)

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
च	च [अव्य]	पश्यति	दृश् [कर्तरि-लट्-प्र-एक-परस्मै].
यः	यद् [पुं-प्र-एक]	तथा	तथा [अव्य]
कर्माणि	कर्मन् [नपुं-द्वि-बहु]	आत्मानम्	आत्मन् [पुं-द्वि-एक]
सर्वशः	सर्वशः [अव्य]	अकर्तारम्	न-कर्तृ [पुं-द्वि-एक]
प्रकृत्या	प्रकृति [स्त्री-तृ-एक]	(पश्यति)	(दृश् [कर्तरि-लट्-प्र-एक-परस्मै]).
एव	एव [अव्य]	सः	तद् [पुं-प्र-एक]
क्रियमाणानि	कृ [कृत् प्रत्ययः:यक्- नपुं-प्र-बहु]	पश्यति	दृश् [कर्तरि-लट्-प्र-एक-परस्मै].

पदार्थः

मूलम्	हिन्दी	English
च	और	also
यः	जो पुरुष	anyone who
कर्माणि	कर्मों को	actions
सर्वशः	सब प्रकार से	in all respects
प्रकृत्या	प्रकृति के द्वारा	by material nature
एव	ही	certainly
क्रियमाणानि	किये जाते हुए	engaged in performing
पश्यति	देखता है	sees
तथा	और	also
आत्मानम्	आत्मा को	himself
अकर्तारम्	अकर्ता	non-doer
(पश्यति)	देखता है,	sees
सः	वही	he
पश्यति	देखता है।	sees perfectly

भावार्थः

हिन्दी : और जो पुरुष सम्पूर्ण कर्मों को सब प्रकार से प्रकृति के द्वारा ही किये जाते हुए देखता है और आत्मा को अकर्ता देखता है, वही यथार्थ देखता है।

English : And he alone really sees, who sees all actions being performed in every way by prakṛti alone, and the self as the non-doer.

सन्धिः -	प्रकृत्या+एव	प्रकृत्यैव	वृद्धि-सन्धिः[1]
	तथा+आत्मानम्	तथात्मानम्	सवर्णदीर्घ-सन्धिः[2]
	सः+पश्यति	स पश्यति	विसर्गलोप-सन्धिः[3]

समासः - अकर्तारम् न कर्ता यस्य सः अकर्ता तम् नञर्थबहुव्रीहिः

पदार्थकोशः

च	चकारात् कर्म फलानुभवमपि प्रकृत्यैव क्रियमाणं पश्यति [टि०]।
कर्माणि	वाङ्मन:कायारभ्याणि [शा०]। वाङ्मन:कायै: आरब्धानि [चतु०]।
सर्वशः	सर्वप्रकारै: [शा०/पै०/सुबो०]। सर्वप्रकारेण [चतु०]।
प्रकृत्या	प्रकृति: भगवत: माया त्रिगुणात्मिका [शा०]। अविद्यया [पै०]। देहेन्द्रियाकारेण परिणतया [सुबो०]।
क्रियमाणानि	निर्वर्त्यमानानि [शा०]।
पश्यति	उपलभते [शा०]।
आत्मानम्	क्षेत्रज्ञम् [शा०]।
अकर्तारम्	सर्वोपाधिविवर्जितम् [शा०]। देहाभिमानेन एव आत्मन: कर्तृत्वं न स्वत: इति [सुबो०]।
सः	परमार्थदर्शी [टि०]।

❖ संसारस्य अविद्यिकत्वं तन्निवर्तकं सफलं तत्त्वज्ञानं च ❖

(६८) **अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः**
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते॥ क्षेत्रक्षेत्रज्ञविभागयोगः **१३-३१॥**

पदच्छेदः अनादित्वात् निः-गुणत्वात् परम-आत्मा अयम् अव्ययः।
शरीर-स्थः अपि कौन्तेय न करोति न लिप्यते॥

1 वृद्धिरेचि (६।१।८८)
2 अकः सवर्णे दीर्घः (६।१।१०१)
3 एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६।१।१३२)

अन्वयः - कौन्तेय अनादित्वात् निर्गुणत्वात् अयम् अव्ययः परमात्मा शरीरस्थः अपि न करोति (च) न लिप्यते।

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
कौन्तेय	कौन्तेय [पुं-सं-एक]	**शरीरस्थः**	शरीरस्थ [पुं-प्र-एक]
अनादित्वात्	अनादित्व [पुं-पं-एक]	**अपि**	अपि [अव्य]
निर्गुणत्वात्	निर्गुणत्व [पुं-पं-एक]	**न**	न [अव्य]
अयम्	इदम् [पुं-प्र-एक]	**करोति**	कृ [कर्तरि-लट्-प्र-एक-परस्मै]
अव्ययः	अव्यय [पुं-प्र-एक]	**(च)**	(च [अव्य])
परमात्मा	परमात्मन् [पुं-प्र-एक]	**न**	न [अव्य]
शरीरस्थः	शरीरस्थ [पुं-प्र-एक]	**लिप्यते**	लिप् [कर्तरि-लट्-प्र-एक-आत्मने]

पदार्थः

मूलम्	**हिन्दी**	**English**
कौन्तेय	हे अर्जुन	O Arjuna
अनादित्वात्	अनादि होने से	due to eternity
निर्गुणत्वात्	निर्गुण होने से	due to no attributes
अयम्	यह	this
अव्ययः	अविनाशी	inexhaustible
परमात्मा	परमात्मा	Supreme being
शरीरस्थः	शरीर में स्थित	dwelling in the body
अपि	भी	though
न	न	never
करोति	कुछ करता है	does anything
(च)	(और)	also
न	न	nor
लिप्यते	लिप्त होता है	is entangled

भावार्थः

हिन्दी : हे अर्जुन ! अनादि होने से और निर्गुण होने से यह अविनाशी परमात्मा शरीर में स्थित होने पर भी वास्तव में न तो कुछ करता है और न लिप्त ही होता है।

English : O Arjuna, being without beginning and without attributes, this indestructible Supreme being, though dwelling in the body, in fact does nothing nor gets entangled.

सन्धिः -	अनादित्वात्+निर्गुणत्वात्	अनादित्वान्निर्गुणत्वात्	अनुनासिक-सन्धिः[1]
	निर्गुणत्वात्+परमात्मा	निर्गुणत्वात्परमात्मा	जश्त्व >चर्त्व-सन्धिः[2]
	परमात्मा+अयम्	परमात्मायम्	सवर्णदीर्घ-सन्धिः[3]
	शरीरस्थः+अपि	शरीरस्थोऽपि	रुत्व >उत्व>गुण>पूर्वरुप-सन्धिः[4]

समासः -	अनादित्वात्	न आदित्वम् यस्य सः अनादित्वम् तस्मात्	नञर्थ-बहुव्रीहिः
	निर्गुणत्वात्	निर्गतः गुणत्वं यस्मात् निर्गुणत्वम् तस्मात्	प्रादि-बहुव्रीहिः
	अव्ययः	न व्ययः यस्य सः	नञर्थ-बहुव्रीहिः
	परमात्मा	परमः च असौ आत्मा	कर्मधारयः
	शरीरस्थः	शरीरे तिष्ठति	उपपदम्

पदार्थकोशः

कौन्तेय	अर्जुन [टि०]।
अनादित्वात्	अनादेः भावः अनादित्वम्, आदिः कारणम्, तत् यस्य न अस्ति तत् अनादि [शा०]।
निर्गुणत्वात्	गुणव्ययाद्व्येत्ययं न व्येतीति परमात्माऽयम् गुणाः सत्त्वाः; निर्गुणः तस्य भावः [टि०]।
अव्ययः	न अस्य व्ययो विद्यते इति अव्ययः [शा०]। अविकारि [सुबो०]। न व्येति परिच्छिद्यते देशतः कालतो वस्तुतः च इति [चतु०]।
परमात्मा	अयं सर्वेषां प्राणिनां नित्यापरोक्षः परमो देहादिभ्योऽपरमेभ्यः आत्मभ्योऽन्यः कोशपञ्चकातीत आत्मा [चतु०]।
शरीरस्थः	शरीरेषु आत्मनः उपलब्धिः भवति इति शरीरस्थः उच्यते [शा०]। शरीर उपलभ्यमानः [पै०]। शरीरे स्थितः [सुबो०]।
न	कर्मफलैः [सुबो०]।

---

1 यरोऽनुनासिकेऽनुनासिको वा (८।४।४५)
2 झलां जशोऽन्ते (८।२।३९)>खरि च (८।४।५५)
3 अकः सवर्णे दीर्घः (६।१।१०१)
4 ससजुषो रुः(८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)>आद् गुणः (६।१।८७)>एङः पदान्तादति (६।१।१०९)

❖ क्षेत्रज्ञोपाधिभूतानां गुणानां नामानि तत्कार्याणि ❖

(६९) **सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः**
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ गुणत्रयविभागयोगः **१४-०५**॥

पदच्छेदः - सत्त्वं रजः तम इति गुणाः प्रकृति-सम्भवाः।
निबध्नन्ति महा-बाहो देहे देहिनम् अव्ययम्॥

अन्वयः - महाबाहो सत्त्वं रजः तमः (च) इति प्रकृतिसम्भवाः गुणाः अव्ययं देहिनं देहे निबध्नन्ति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
महाबाहो	महाबाहु [पुं-सं-एक]	**प्रकृतिसम्भवाः**	प्रकृतिसम्भव [पुं-प्र-बहु]
सत्त्वम्	सत्त्व [नपुं-प्र-एक]	**गुणाः**	गुण [पुं-प्र-बहु]
रजः	रजस् [नपुं-प्र-एक]	**अव्ययम्**	अव्यय [पुं-द्वि-एक]
तमः	तमस् [नपुं-प्र-एक]	**देहिनम्**	देहिन् [पुं-द्वि-एक]
(च)	(च [अव्य])	**देहे**	देह [नपुं-स-एक]
इति	इति [अव्य]	**निबध्नन्ति**	नि-बन्ध् [कर्तरि-लट्-प्र-बहु;परस्मै]

पदार्थः

मूलम्	हिन्दी	English
महाबाहो	हे अर्जुन	O Arjuna
सत्त्वम्	सत्त्वगुण	Sattva
रजः	रजोगुण	Rajas
तमः	तमोगुण	Tamas
(च)	(और)	also
इति	ये	thus
प्रकृतिसम्भवाः	प्रकृति से उत्पन्न	produced of material nature
गुणाः	तीनों गुण	qualities
अव्ययम्	अविनाशी	eternal
देहिनम्	जीवात्मा को	the soul
देहे	शरीर में	in this body
निबध्नन्ति	बाँधते हैं	does condition

पदार्थः

भावार्थः हे अर्जुन ! सत्त्वगुण, रजोगुण और तमोगुण, ये प्रकृति से उत्पन्न तीनों गुण अविनाशी जीवात्मा को शरीर में बाँधते हैं।

English: Sattva, Rajas and Tamas - these three qualities born of nature tie down the eternal soul to the body, Arjuna.

सन्धिः	रजः+तमः	रजस्तमः	सत्व-सन्धिः[1]
	तमः+इति	तम इति	रुत्व >यत्व>लोप-सन्धिः[2]

समासः -	महाबाहो	महान्तौ बाहू यस्य सः महाबाहुः सम्बोधने	षष्ठ्यर्थबहुव्रीहिः
	प्रकृतिसम्भवाः	प्रकृतेः सम्भवः प्रकृतिसम्भवः ते	पञ्चम्यर्थबहुव्रीहिः
	अव्ययम्	न व्ययः यस्य सः अव्ययः तम्	नञर्थबहुव्रीहिः

पदार्थकोशः

महाबाहो	महान्तौ समर्थतरौ आजानुप्रलम्बौ बाहू यस्य स: महाबाहु: [शा०]।
इति	एवं सञ्ज्ञका: त्रय: [सुबो०]।
प्रकृतिसम्भवा:	भगवन्मायासम्भवा: [शा०]। अविद्यासम्भवा: [पै०]। प्रकृतित: सम्भवः उद्भवो येषां ते [सुबो०]। प्रकृति: सत्त्वरजस्तमसां साम्यावस्था तत: सकाशात् परस्पराङ्गाङ्गिभावेन वैषम्येण उद्रिच्यमाना: [चतु०]।
गुणा:	प्रकृतिगुणा: न गुणा: प्रकृत्यामका: अपितु तदसाधारणधर्मभूता: प्रकृत्यवस्थायामनुद्भूता: तद्विकारेषु महदादिषूद्भूता: [टि०]।
अव्ययम्	अव्ययत्वम् [शा०]। अविनाशिनम् [पै०]। निर्विकारम् [सुबो०]। अविकारिणम् [चतु०]।
देहिनम्	देहवन्तम् [शा०]। चिदंशम् [सुबो०]। स्थूणायाम् [चतु०]।
देहे	शरीरे [शा०]।
निबध्नन्ति	नियच्छन्ति [पै०]। स्वकार्यै: सुखदु:खमोहादिभि: संयोजयन्ति [सुबो०]।

---

1 विसर्जनीयस्य सः (८।३।३४)

2 ससजुषो रुः (८।२।६६)>भोभगो अघो अपूर्वस्य योऽशि (८।३।१७)>लोपः शाकल्यस्य (८।३।१९)

❖ सात्त्विकादिकर्मणां फलं सहेतुकम् ❖

(७०) **सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च**
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥ गुणत्रयविभागयोगः **१४-१७॥**

पदच्छेदः सत्त्वात् सञ्जायते ज्ञानं रजसः लोभ एव च।
प्रमाद-मोहौ तमसः भवतः न-ज्ञानम् एव च॥

अन्वयः - सत्त्वात् ज्ञानं सञ्जायते च रजसः एव लोभः (सञ्जायते) च तमसः प्रमादमोहौ भवतः (तमसः) अज्ञानम् एव (सञ्जायते)।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
सत्त्वात्	सत्त्व [नपुं-पं-एक]	**च**	च [अव्य]
ज्ञानम्	ज्ञान [नपुं-प्र-एक]	**तमसः**	तमस् [नपुं-पं-एक]
सञ्जायते	सम्-जन् [कर्तरि-लट्-प्र-एक-आत्मने]	**प्रमादमोहौ**	प्रमादमोह [पुं-प्र-द्वि]
च	च [अव्य]	**भवतः**	भू [कर्तरि-लट्-प्र-द्वि-परस्मै]
रजसः	रजस् [नपुं-पं-एक]	**(तमसः)**	(तमस् [नपुं-पं-एक])
एव	एव [अव्य]	**अज्ञानम्**	अज्ञान [नपुं-प्र-एक]
लोभः	लोभ [पुं-प्र-एक]	**एव**	एव [अव्य]

पदार्थः

मूलम्	हिन्दी	English
सत्त्वात्	सत्त्वगुण से	from the Sattva
ज्ञानम्	ज्ञान	knowledge
सञ्जायते	उत्पन्न होता है	develops
च	और	also
रजसः	रजोगुण से	from the Rajas
एव	ही	certainly
लोभः	लोभ	greed
(सञ्जायते)	(उत्पन्न होता है)	develops
च	तथा	also

तमसः	तमोगुण से	from the Tamas
प्रमामोहौ	प्रमाद और मोह	negligence and delusion
भवतः	उत्पन्न होते हैं	develops
(तमसः)	(तमोगुण से)	from the Tamas
अज्ञानम्	अज्ञान	ignorance
एव	भी	certainly
(सञ्जायते)	(उत्पन्न होता है)	develops

भावार्थः

हिन्दी : सत्वगुण से ज्ञान उत्पन्न होता है और रजोगुण से निस्सन्देह लोभ; तथा तमोगुण से प्रमाद और मोह उत्पन्न होते है और अज्ञान भी उत्पन्न होता है।

English : Wisdom follows from Sattva, and greed, undoubtedly, from Rajas, likewise negligence, delusion and also ignorance follow from Tamas.

सन्धिः -	सत्त्वात्+सञ्जायते	सत्त्वात्सञ्जायते	चर्त्व-सन्धिः[1]
	रजसः+लोभः	रजसो लोभः	रुत्व>उत्व>गुण-सन्धिः[2]
	लोभः+एव	लोभ एव	रुत्व >यत्व>लोप-सन्धिः[3]
	तमसः+भवतः	तमसो भवतः	रुत्व>उत्व>गुण-सन्धिः[4]
	भवतः+अज्ञानम्	भवतोऽज्ञानम्	रुत्व>उत्व>गुण>पूर्वरुप-सन्धिः[5]

समासः -	प्रमादमोहौ	प्रमादः च मोहः च	इतरेतरयोगद्वन्द्वः
	अज्ञानम्	न ज्ञानम्	नञ्-तत्पुरुषः

1 खरि च (८।४।५५)
2 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
3 ससजुषो रुः (८।२।६६)>भोभगो अघो अपूर्वस्य योऽशि (८।३।१७)> लोपः शाकल्यस्य (८।३।१९)
4 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
5 ससजुषो रुः(८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)>आद् गुणः (६।१।८७)>एङः पदान्तादति (६।१।१०९)

भावार्थः

सत्त्वात् लब्धात्मकात् [शा०]।
ज्ञानम् सर्वकरणद्वारकम् विवेकज्ञानम् [टि०]।
सञ्जायते समुत्पद्यते [शा०]।
रजसः रजोगुणात् [टि०]।
लोभः विषयसुखाभिलाषातिशयः [टि०]।
तमसः तमोगुणात् [टि०]।
प्रमादमोहौ अज्ञानानि फलानि [सुबो०]।
भवतः जायते [टि०]।
अज्ञानम् अज्ञानप्रापकं फलम् [सुबो०]। विवेकाभावः निद्रालस्यादिकम् [टि०]।

===

❖ *विरक्तिद्वारा भगवत्तत्त्वज्ञानाधिकारसिद्ध्यर्थं संसारवृक्षस्वरूपवर्णनम्* ❖

(७१) श्रीभगवानुवाच

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ पुरुषोत्तमयोगः **१५-०१॥**

पदच्छेदः ऊर्ध्व-मूलम् अधःशाखम् अश्वत्थं प्राहुः अव्ययम्।
छन्दांसि यस्य पर्णानि यः तं वेद स वेद-वित्॥

अन्वयः - (तम्) अव्ययम् अश्वत्थम् ऊर्ध्वमूलम् अधःशाखम् प्राहुः यस्य पर्णानि छन्दांसि (भवन्ति) यः तं वेद सः वेदवित् (भवति)।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
(तम्)	(तद् [पुं-द्वि-एक])	**छन्दांसि**	छन्दस् [नपुं-प्र-बहु]
अव्ययम्	अव्यय [पुं-द्वि-एक]	**(भवन्ति)**	(भू [कर्तरि-लट्-प्र-बहु-परस्मै])
अश्वत्थम्	अश्वत्थ [पुं-द्वि-एक]	**यः**	यद् [पुं-प्र-एक]
ऊर्ध्वमूलम्	ऊर्ध्वमूल [पुं-द्वि-एक]	**तम्**	तद् [पुं-द्वि-एक]
अधःशाखम्	अधःशाख [पुं-द्वि-एक]	**वेद**	विद् [कर्तरि-लट्-उ-एक-परस्मै]
प्राहुः	प्र-ब्रू [कर्तरि-लट्-प्र-बहु-परस्मै]	**सः**	तद् [पुं-प्र-एक]

यस्य	यद् [पुं-ष-एक]	**वेदवित्**	वेद-विद् [पुं-प्र-एक]
पर्णानि	पर्ण [नपुं-प्र-बहु]	**(भवति)**	(भू [कर्तरि-लट्-प्र-एक-परस्मै])

पदार्थः

मूलम्	**हिन्दी**	**English**
(तम्)	(उस)	that
अव्ययम्	अविनाशी	eternal
अश्वत्थम्	पीपल के वृक्ष को	Aśvattha (Pīpala) tree
ऊर्ध्वमूलम्	ऊपर मूल वाले	with roots above
अधःशाखम्	नीचे शाखा वाले	downward branches
प्राहुः	कहते है	said
यस्य	जिसके	of which
पर्णानि	पत्ते	the leaves
छन्दांसि	वेद	Vedic hymns
(भवन्ति)	(है)	become
यः	जो	anyone
तम्	उसको	that
वेद	जानता है	knows
सः	वह	he
वेदवित्	वेद को जानने वाला	the knower of the Vedas
(भवति)	(है)	becomes

भावार्थः

हिन्दी : इस संसार को अविनाशी पीपल का वृक्ष कहते हैं, जिसकी जड़ें ऊपर की ओर हैं और शाखाएँ नीचे की ओर तथा इस वृक्ष के पत्ते वेद स्वरूप हैं। जो इस अविनाशी वृक्ष को जानता है वही वेदों के अर्थों को जानने वाला है।

English - With roots above and branches below, the Aśvattha (Pīpala) tree is said to be eternal. The Vedic hymns are its leaves. One who knows it is the knower of the Vedas.

सन्धिः -	प्राहुः+अव्ययम्	प्राहुरव्ययम्	रेफ-सन्धिः[1]
	यः+तं	यस्तं	सत्व-सन्धिः[2]

समासः -	ऊर्ध्वमूलम्	ऊर्ध्वं मूलं यस्य सः ऊर्ध्वमूलः तम्	षष्ठ्यर्थबहुव्रीहिः
	अधःशाखम्	अधो शाखाः यस्य सः अधःशाखः तम्	षष्ठ्यर्थबहुव्रीहिः
	वेदवित्	वेदान् वेत्ति	उपपदम्

पदार्थकोशः

अव्ययम् अनाद्यन्तदेहादिसन्तानाश्रयः हि सुप्रसिद्धः, तम् अव्ययम् [शा०]। अविनाशिनम् [पै०]। प्रवाहरूपेण अविच्छेदात् [सुबो०]।

अश्वत्थम् न श्वः अपि स्थाता इति अश्वत्थः तं क्षणप्रध्वंसिनम् अश्वत्थम् [शा०]। श्वो न तिष्ठति इति, क्षणध्वंसिनम् [पै०]। विनश्वरत्वेन श्वः प्रभातपर्यन्तमपि न स्थास्यति इति विश्वासान् अर्हत्वात् [सुबो०]। न श्वः अपि स्थातुं योग्यमनृतत्वात्, संसारवृक्षम् [चतु०]।

ऊर्ध्वमूलम् कालतः सूक्ष्मत्वात् कारणत्वात् नित्यत्वात् महत्त्वात् च ऊर्ध्वम् उच्यते ब्रह्म अव्यक्तं मायाशक्तिमत्, तत् मूलं अस्य इति सः अयं संसारवृक्षः ऊर्ध्वमूलः [शा०]। यत् सर्वेषां लोकानामुपरिष्टात् वर्तमानं सत्यलोकनिवासिहिरण्यगर्भान्तःकरणाभिव्यक्तं सर्वस्य जगतः सृष्टिस्थितिसंहारहेतुभूतम् अव्यक्तात्मकं ब्रह्म तत् ऊर्ध्वं [तन्मूलं] कारणं यस्य सः; संसारवृक्षः [पै०]। ऊर्ध्वम् उत्तमः क्षराक्षराभ्याम् उत्कृष्टः पुरुषोत्तमो मूलं यस्य तम्[सुबो०]। मानुषानन्दमारभ्योत्तरोत्तरशतगुणविवृद्धानन्दसोपानपङ्क्तेरुपरिस्थितं परमानन्दाद्वयं वस्तु ऊर्ध्वं तदेव मूलं मूलकारणमस्य संसाराश्वत्थस्य तम् [चतु०]। मूलं प्रशान्तं रूपम् तत् ऊर्ध्वम् [गीता०]।

अधःशाखम् महदहङ्कारतन्मात्रादयः शाखा इव अस्य अधः भवन्ति इति सः अयं अधःशाखः, तम् अधःशाखम् [शा०]। तस्मात् सत्यलोकात् अधोभूतलोकान्तर्वासिशाखम् [पै०]। अधः इति ततोऽर्वाचीनाः कार्योपाधयो हिरण्यगर्भादयो गृह्यन्ते; ते तु शाखा इव शाखा यस्य तम् [सुबो०]। ऊर्ध्वादधोऽधः सोपानस्थानीयाः शाखाः इव शाखाः अव्यक्तमहदहङ्कारपञ्च-तन्मात्राषोडशविकारहिरण्यगर्भविराट्प्रजापतिसुरगन्धर्वासुरनरतिर्यक्स्थावररूपा यस्य सः, अत्र अश्वत्थरूपकेण संसारो वर्ण्यते [चतु०]।

प्राहुः कथयन्ति [शा०]।

---

1 ससजुषो रुः (८।२।६६)
2 विसर्जनीयस्य सः (८।३।३४)

यस्य	संसारवृक्षस्य [शा०]।
पर्णानि	पर्णसङ्घातवच्छोभाहेतवो यस्य तरोः [चतु०]।
छन्दांसि	छादनात् ऋग्यजुःसामलक्षणानि [शा०]। वेदाः [पै०/सुबो०]। वेदाः तदुपलक्षिताः यज्ञादयः [चतु०]।
वेदवित्	वेदार्थवित् [शा०/पै०/सुबो०]। विदितवेद्य [चतु०]।

==

❖ *संसारवृक्षस्य अन्यदवयवकल्पनं दुरुच्छेद्यत्वं च* ❖

(७२) **अधश्चोर्ध्वं प्रसृतास्तस्य शाखा**
गुणप्रवृद्धा विषयप्रवालाः
अधश्च मूलान्यनुसन्ततानि
कर्मानुबन्धीनि मनुष्यलोके ॥ पुरुषोत्तमयोगः **१५-०२॥**

पदच्छेदः अधः च ऊर्ध्वं प्र-सृताः तस्य शाखाः
गुणप्रवृद्धा विषय-प्रवालाः।
अधः च मूलानि अनु-सम्-ततानि
कर्म -अनुबन्धीनि मनुष्य-लोके॥

अन्वयः - तस्य गुणप्रवृद्धाः विषयप्रवालाः शाखाः अधः ऊर्ध्वं च प्रसृताः (सन्ति) मनुष्यलोके अधः (ऊर्ध्वम्) च कर्मानुबन्धानि मूलानि अनुसन्ततानि (सन्ति)।

पदपरिचयः

मूलम्	**पदपरिचयः**	**मूलम्**	**पदपरिचयः**
तस्य	तद् [पुं-ष-एक]	**प्रसृताः**	प्र-सृ [कृत्-प्रत्ययः-क्त-पुं-प्र-बहु]
गुणप्रवृद्धाः	गुणप्रवृद्ध[पुं-प्र-बहु]	**मनुष्यलोके**	मनुष्यलोक [पुं-स-एक]
विषयप्रवालाः	विषयप्रवाल [पुं-प्र-बहु]	**अधः**	अधः [अव्य]
शाखाः	शाखा [स्त्री-प्र-बहु]	**कर्मानुबन्धीनि**	कर्मानुबन्ध [नपुं-प्र-बहु]
अधः	अधः [अव्य]	**मूलानि**	मूल [नपुं-प्र-बहु]
ऊर्ध्वम्	ऊर्ध्वम् [अव्य]	**अनुसन्ततानि**	अनुसन्तत [नपुं-प्र-बहु]
च	च [अव्य]	**(सन्ति)**	(अस् [कर्तरि-लट्-प्र-बहु-परस्मै])

पदार्थः

मूलम्	हिन्दी	English
तस्य	उसकी	its
गुणप्रवृद्धाः	गुणों से वर्धित	developed guṇas
विषयप्रवालाः	विषय रूप कोंपलों वाली	buds of sense objects
शाखाः	शाखाएँ	branches
अधः	नीचे	downward
ऊर्ध्वम्	ऊपर	upward
च	और	and
प्रसृताः	फैली हुई	extended
(सन्ति)	(हैं)	are
मनुष्यलोके	मनुष्यलोक में	in the world of human society
अधः	नीचे	downward
(ऊर्ध्वम्)	(ऊपर)	upward
च	और	and
कर्मानुबन्धीनि	कर्मों के अनुसार बाँधने वाली	bound according to actions
मूलानि	जड़ें	roots
अनुसन्ततानि	लोकों में व्याप्त	extended
(सन्ति)	(हैं)	are

भावार्थः

हिन्दी : उसकी गुणों द्वारा बढ़ी हुई विषय रूप कोंपलों वाली शाखाएँ नीचे और ऊपर फैली हुई हैं। मनुष्यलोक में नीचे और ऊपर कर्मों के अनुसार बाँधने वाली जड़ें सम्पूर्ण लोक में व्याप्त हैं।

English - This tree extends its branches downward and upward, nourished by the guṇas. The sense objects are its buds. In the world of men, the binding roots pervade the whole world according to downward and upward actions.

सन्धिः -	सः+वेदवित्	स वेदवित्	विसर्गलोप-सन्धिः[1]
	अधः+च	अधश्च	सत्व>श्चुत्व-सन्धिः[2]
	च+ऊर्ध्वं	चोर्ध्वं	गुण-सन्धिः[3]
	प्रसृताः+तस्य	प्रसृतास्तस्य	सत्व-सन्धिः[4]
	शाखाः+गुणप्रवृद्धाः	शाखा गुणप्रवृद्धाः	रुत्व>यत्व>लोप-सन्धिः[5]
	गुणप्रवृद्धाः+विषयप्रवालाः	गुणप्रवृद्धा विषयप्रवालाः	रुत्व>यत्व>लोप-सन्धिः[6]
	अधः+च	अधश्च	सत्व>श्चुत्व-सन्धिः[7]
	मूलानि+अनुसन्ततानि	मूलान्यनुसन्ततानि	यण्-सन्धिः[8]

समासः -	गुणप्रवृद्धाः	गुणैः प्रवृद्धा गुणप्रवृद्धा ताः गुणप्रवृद्धाः	तृतीया-तत्पुरुषः
	विषयप्रवालाः	विषयाः प्रवालाः इव	समानाधिकरण-कर्मधारयः
	मनुष्यलोके	मनुष्याणां लोकः = मनुष्यलोकः तस्मिन्	षष्ठी-तत्पुरुषः
	कर्मानुबन्धीनि	कर्म एव अनुबन्धः येषां तानि	षष्ठ्यर्थ-बहुव्रीहिः

पदार्थकोशः

तस्य वृक्षस्य [शा०]। संसारवृक्षस्य [सुबो०]।

गुणप्रवृद्धाः गुणैः सत्त्वरजस्तमोभिः प्रवृद्धाः स्थूलीकृताः उपादानभूतैः [शा०]। गुणैः सत्त्वरजस्तमोभिः उपादानकारणभूतैः प्रवृद्धाः [पै०]। गुणैः सत्त्वादिवृत्तिभिः जलसेचनैः इव यथायथं प्रवृद्धिं प्राप्ताः [सुबो०]। गुणैः सत्त्वादिभिः प्रकर्षेण वृद्धाः [चतु०]।

विषयप्रवालाः विषयाः शब्दादयः प्रवालाः इव देहादिकर्मफलेभ्यः शाखाभ्यः अङ्कुरीभवन्तीव, तेन विषयप्रवालाः [शा०]। विषयाः शब्दस्पर्शरूपरसगन्धाः प्रवालाः इव यासां शाखानां ताः

---

1 एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६।१।१३२)

2 विसर्जनीयस्य सः (८।३।३४)>स्तोः श्चुना श्चुः (८।४।४०)

3 आद् गुणः (६।१।८७)

4 विसर्जनीयस्य सः (८।३।३४)

5 ससजुषो रुः (८।२।६६)>भोभगोअघो अपूर्वस्य योऽशि (८।३।१७)>हलि सर्वेषाम् (८।३।२२)

6 ससजुषो रुः (८।२।६६)>भोभगोअघो अपूर्वस्य योऽशि (८।३।१७)>हलि सर्वेषाम् (८।३।२२)

7 विसर्जनीयस्य सः (८।३।३४)>स्तोः श्चुना श्चुः (८।४।४०)

8 इको यणचि (६।१।७७)

	[पै०]। विषया: रूपादय: प्रवाला: पल्लवस्थानीया: यासां ता: [सुबो०]। विषया: एव रञ्जकतया कोमलपल्लवरूपाणि प्रवालानि यासां ता: [चतु०]।
शाखा:	कर्मज्ञानवासनारूपा: शरीरेन्द्रिविषयरूपा: कर्मफलभूता: [पै०]। शाखास्थानीयाभि: इन्द्रियवृत्तिभि: [सुबो०]।
अध:	मनुष्यादिभ्यो यावत् स्थावरम् [शा०]। महर्लोकप्रभृतिम् [पै०]। पश्वादियोनिषु [सुबो०]।
ऊर्ध्वम्	यावत् ब्रह्मण: विश्वसृजो धर्म इति एतद् अन्तम् [शा०]। महर्लोकप्रभृतिम् [पै०]। देवादियोनिषु [सुबो०]।
प्रसृता:	प्रगता: [शा०]। प्रसृतिं गता: [पै०]। विस्तारं गता: [सुबो०]। प्रसरं प्राप्ता: [चतु०]।
मनुष्यलोके	ग्रहणम् उपलक्षणार्थम् [पै०]। मनुष्यश्चासौ लोकश्च इति वा [टि०]।
कर्मानुबन्धीनि	कर्म धर्माधर्मलक्षणम् अनुबन्ध: पश्चाद्भावी, येषाम् उद्भूतिम् अनुभवति, इति तानि कर्मानुबन्धीनि [शा०]। कर्मनिमित्तानि [पै०]। कर्म एव अनुबन्धोऽनन्तरभावि येषां तानि [सुबो०]। कर्मैव धर्माधर्माख्यम् अनुबन्ध: पश्चाद्भावि येषां तानि [चतु०]।
मूलानि	निवृत्तधर्माणि तदुपकरणानि [पै०]। मुख्यं मूलमीश्वर एक एव, आन्तरमूलानि तत् तत् भोगवासनालक्षणानि [सुबो०]। वासनारूपाणि अवान्तरमूलानि [चतु०]।
अनुसन्ततानि	अनुप्रविष्टानि [शा०]। अनुसृतानि [पै०]। विरूढानि [सुबो०]। प्रवाहनित्यानि [चतु०]।]

===

❖ *दुरुच्छेदस्य अनर्थकरस्य संसारवृक्षस्य उच्छेदनोपायकथनद्वारा कर्तव्योपदेश:* ❖

(७३) **न रूपमस्येह तथोपलभ्यते**
नान्तो न चादिर्न च सम्प्रतिष्ठा
अश्वत्थमेनं सुविरूढमूलम्
असङ्गशस्त्रेण दृढेन छित्त्वा॥ पुरुषोत्तमयोग: **१५-०३॥**

(७४) **तत: पदं तत्परिमार्गितव्यं**
यस्मिन्गता न निवर्तन्ति भूय:
तमेव चाद्यं पुरुषं प्रपद्ये
यत: प्रवृत्ति: प्रसृता पुराणी ॥ पुरुषोत्तमयोग: **१५-०४॥**

पदच्छेदः न रूपम् अस्य इह तथा उपलभ्यते
न अन्तः न च आदिः न च सम्प्रतिष्ठा।
अश्वत्थम् एनं सु-विरूढ-मूलम्
अ-सङ्ग-शस्त्रेण दृढेन छित्त्वा॥

ततः पदं तत् परि-मार्गितव्यम्
यस्मिन् गताः न निवर्तन्ति भूयः।
तम् एव च अद्यं पुरुषं प्रपद्ये
यतः प्र-वृत्तिः प्रसृता पुराणी॥

अन्वयः - इह अस्य रूपं तथा न उपलभ्यते न आदिः च न अन्तः च न सम्प्रतिष्ठा (भवति) एनं सुविरूढमूलम् अश्वत्थम् असङ्गशस्त्रेण दृढेन छित्त्वा ततः तत् पदम् परिमार्गितव्यं यस्मिन् गताः भूयः न निवर्तन्ति च यतः पुराणी प्रवृत्तिः प्रसृता (अस्ति) तम् एव आद्यम् पुरुषम् (अहम्) प्रपद्ये।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
इह	इह [अव्य]	**ततः**	ततः [अव्य]
अस्य	इदम् [पुं-ष-एक]	**तत्**	तद् [पुं-प्र-एक]
रूपम्	रूप [नपुं-प्र-एक]	**पदम्**	पद [पुं-प्र-एक]
तथा	तथा [अव्य]	**परिमार्गितव्यम्**	परि-मार्ग् [कृत्-प्रत्ययः-तव्यत्]
न	न [अव्य]	**यस्मिन्**	यद् [पुं-स-एक]
उपलभ्यते	उप-लभ् [कर्मणि-लट्-प्र-एक-आत्मने]	**गताः**	गम् [कृत्-प्रत्ययः-क्त]
न	न [अव्य]	**भूयः**	भूयः [अव्य]
आदिः	आदि [पुं-प्र-एक]	**न**	न [अव्य]
च	च [अव्य]	**निवर्तन्ति**	नि-वृत् [कर्तरि-लट्-प्र-बहु-परस्मै]
न	न [अव्य]	**च**	च [अव्य]
अन्तः	अन्त [पुं-प्र-एक]	**यतः**	यतः [अव्य]
च	च [अव्य]	**पुराणी**	पुराणी [स्त्री-प्र-एक]
न	न [अव्य]	**प्रवृत्तिः**	प्रवृत्ति [स्त्री-प्र-एक]

सम्प्रतिष्ठा	सम्प्रतिष्ठा [स्त्री-प्र-एक]	**प्रसृता**	प्र-सृ [कृत्-प्रत्ययः-क्त-स्त्री-प्र-एक]
एनम्	इदम् [पुं-द्वि-एक]	**तम्**	तद् [पुं-द्वि-एक]
सुविरूढमूलम्	सुविरूढमूल [पुं-द्वि-एक]	**एव**	एव [अव्य]
अश्वत्थम्	अश्वत्थ [पुं-द्वि-एक]	**आद्यम्**	आद्य [पुं-द्वि-एक]
असङ्गशस्त्रेण	असङ्गशस्त्र [नपुं-तृ-एक]	**पुरुषम्**	पुरुष [पुं-द्वि-एक]
दृढेन	दृढ [नपुं-तृ-एक]	**(अहम्)**	(अस्मद् [प्र-एक])
छित्त्वा	छिद् [कृत्-प्रत्ययः-क्त्वा]	**प्रपद्ये**	प्र-पद् [कर्तरि-लट्-उ-एक-आत्मने]

पदार्थः

मूलम्	**हिन्दी**	**English**
इह	यहाँ	here
अस्य	इसका	of this tree
रूपम्	स्वरूप	form
तथा	वैसा	also
न	नहीं	not
उपलभ्यते	प्राप्त होता है	can be perceived
न	न	never
आदिः	आदि	beginning
च	और	also
न	न	never
अन्तः	अन्त	end
च	तथा	also
न	न	never
सम्प्रतिष्ठा	प्रतिष्ठित	the foundation
(भवति)	(है)	becomes
एनम्	इस	this
सुविरूढमूलम्	अति दृढ़ मूल वाले	strongly rooted
अश्वत्थम्	पीपल के वृक्ष को	aśvattha (pīpala) tree

असङ्गशस्त्रेण	वैराग्यरूप शस्त्र द्वारा	by the weapon of detachment
दृढेन	दृढ़	strong
छित्त्वा	काटकर	by cutting
ततः	पश्चात्	thereafter
तत्	उस	that
पदम्	पद को	state
परिमार्गितव्यम्	भली भाँति ढूंढना चाहिये	has to be searched out
यस्मिन्	जिसमें	where
गताः	गये हुए	going
भूयः	फिर	again
न	नहीं	never
निवर्तन्ति	वापस आते हैं	comes back
च	और	also
यतः	जिस	from whom
पुराणी	पुरातन	ancient
प्रवृत्तिः	प्रवृत्ति	beginning
प्रसृता	विस्तृत हुई	extended
(अस्ति)	(है)	is
तम्	उस	to Him
एव	ही	certainly
आद्यम्	आदि	foremost
पुरुषम्	ईश्वर की	God
(अहम्)	(मैं)	I
प्रपद्ये	शरण हूँ	surrender

भावार्थः

हिन्दी : यहाँ इसका स्वरूप वैसा नहीं प्राप्त होता है। न आदि है और न अन्त है तथा न ही प्रतिष्ठित है। इस अति दृढ़ मूल वाले पीपल के वृक्ष को वैराग्यरूप शस्त्र द्वारा दृढ़ता से काटकर उसके उपरान्त उस पद को भली भाँति ढूंढना चाहिये, जहाँ गए हुए लोग वापस नहीं आते हैं एवं जिसकी पुरातन प्रवृत्ति अति विस्तृत है, मैं उसी आदि पुरुष की शरणागति में जाता हूँ।

English - The form of the tree cannot be found in this world, nor its beginning, nor its end, nor its foundation. The strong roots of this Aśvattha (pīpala) tree can be cut only with the weapon of detachment. Thereafter, one has to search for that state from where one never comes back, by surrendering oneself to the First Being from whom has spread this ancient beginning.

सन्धिः -

अस्य+इह	अस्येह	गुण-सन्धिः[1]
तथा+उपलभ्यते	तथोपलभ्यते	गुण-सन्धिः[2]
न+अन्तः	नान्तः	सवर्णदीर्घ-सन्धिः[3]
अन्तः+न	अन्तो न	रुत्व>उत्व>गुण-सन्धिः[4]
च+आदिः	चादिः	सवर्णदीर्घ-सन्धिः[5]
आदिः+न	आदिर्न	रेफ-सन्धिः[6]
तत्+परिमार्गितव्यम्	तत्परिमार्गितव्यम्	जश्त्व >चर्त्व-सन्धिः[7]
गताः+न	गता न	रुत्व>यत्व>लोप-सन्धिः[8]
च+आद्यम्	चाद्यम्	सवर्णदीर्घ-सन्धिः[9]

समासः -

सुविरूढमूलम्	सुविरूढानि मूलानि यस्य सः सुविरुढमूलः तम्	षष्ठ्यर्थ-बहुव्रीहिः
असङ्गशस्त्रेण	न सङ्गः असङ्गः	नञ्-तत्पुरुषः
	असङ्गः एव शस्त्रम् असङ्गशस्त्रम् तेन	अवधारणापूर्वपदकर्मधारयः

1 आद् गुणः (६।१।८७)
2 आद् गुणः (६।१।८७)
3 अकः सवर्णे दीर्घः (६।१।१०१)
4 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
5 अकः सवर्णे दीर्घः (६।१।१०१)
6 ससजुषो रुः (८।२।६६)
7 झलां जशोऽन्ते (८।२।३९)>खरि च (८।४।५५)
8 ससजुषो रुः (८।२।६६)>भोभगोअघो अपूर्वस्य योऽशि (८।३।१७)>हलि सर्वेषाम् (८।३।२२)
9 अकः सवर्णे दीर्घः (६।१।१०१)

पदार्थकोशः	
इह	संसारे स्थितैः प्राणिभिः [सुबो०]। जीवत्येव देहे [चतु०]।
अस्य	संसारवृक्षस्य यथोपवर्णितस्य [पै०]। संसारवृक्षस्य [सुबो०]।
रूपम्	यथोक्तं रूपम् [पै०]। सम्यग्दृशा वीक्ष्यमाणम् [चतु०]।
तथा	ऊर्ध्वमूलत्वादिप्रकारेण [सुबो०]।
उपलभ्यते	ज्ञायते [टि०]।
आदिः	इदं प्रथमतया प्रवृत्तिः [पै०]। आरभ्यायं प्रवृत्त उत्पत्तिः [टि०]।
अन्तः	पर्यन्तः निष्ठा समाप्तिः वा [शा०]। अवसानम् [पै०/सुबो०]। पर्यन्तो निष्ठा समाप्तिर्वा नाशः [टि०]।
सम्प्रतिष्ठा	स्थितिः [शा०/सुबो०]। स्थितिः सम्यक् प्रतितिष्ठति अस्यामिति प्रतिष्ठा आश्रयः सा; स्थितिः मध्यमावस्था च स्थितिः [टि०]।
एनम्	यथोक्तम् [टि०]।
सुविरूढमूलम्	सुष्ठु विरूढानि विरोहं गतानि सुदृढानि मूलानि यस्य तम् एनं सुविरूढमूलम् [शा०]। अत्यन्तं बद्धमूलम् [सुबो०]। दृढतरमूलम् [चतु०]।
अश्वत्थम्	यथोक्तम् [पै०]।
असङ्गशस्त्रेण	असङ्गः पुत्रवित्तलोकेषणादिभ्यः व्युत्थानं तेन असङ्गशस्त्रेण [शा०]। सङ्गस्याभावो असङ्गः शस्त्रम् इव शस्त्रं तेन [पै०]। असङ्गः सङ्गराहित्यम् अहंताममतात्यागः तेन [सुबो०]। सङ्गो देहादितादात्म्यबुद्धिः तद्वर्जनम् असङ्गः स एव शस्त्रं तेन [चतु०]।
दृढेन	परमात्माभिमुख्यनिश्चयदृढीकृतेन पुनः पुनः विवेकाभ्यासाश्मनिशितेन [शा०]। परमार्थ-निश्चयदृढीकृतेन [पै०]। वैराग्येण शस्त्रेण सम्यक् विचारेण [सुबो०]। परिपक्वेन [चतु०]।
छित्त्वा	संसारवृक्षं सबीजम् उद्धृत्य [शा०]। संसारवृक्षं समूलम् उद्धृत्य [पै०]। पृथक् कृत्य [सुबो०]। अधोरूढानि मूलानि अस्य छिन्द्यात् [गीता०]।
ततः	पश्चात् [शा०/पै०]। पश्चात् छेदनानन्तरम् [टि०]।
पदम्	वैष्णवम् [शा०/पै०]। वस्तु वैष्णवं पदम् [सुबो०]। प्रशान्तम् अव्ययम् [गीता०]।
परिमार्गितव्यम्	परिमार्गणम् अन्वेषणं ज्ञातव्यम् [शा०]। अन्वेष्टव्यं ज्ञातव्यम् [पै०]। अन्वेष्टव्यम्[सुबो०]। श्रुतियुक्तिबलेन अहमेव ब्रह्मास्मीति ज्ञातव्यम् [चतु०]।
यस्मिन्	पदे निर्विकल्पे [चतु०]।
गताः	प्रविष्टाः [शा०]। यत्पदं प्राप्ताः [सुबो०]। प्राप्ताः [चतु०]।

भूयः	पुनः [शा०/चतु०]।
निवर्तन्ति	आवर्तन्ते [शा०/सुबो०]। निवर्तन्ते [चतु०]।
यतः	यस्मात् पुरुषात् [शा०]। यस्मात् संसारमायावृक्षस्य [पै०]।
पुराणी	चिरन्तनी [शा०/सुबो०]। नित्या [पै०]। आद्या [चतु०]।
प्रवृत्तिः	संसारमायावृक्षप्रवृत्तिः [शा०]। आविर्भावः [पै०]। संसारप्रवृत्तिः [सुबो०]।
प्रसृता	निःसृता [शा०/पै०]। विस्तृताः [सुबो०]।
तम्	विष्णुम् [पै०]। प्रत्यगानन्दम् [चतु०]।
आद्यम्	आदौ भवम् आद्यम् [शा०/पै०]।
पुरुषम्	जगत्पूर्वकम् [पै०]। पुरि शरीरे शयानम् [चतु०]।
प्रपद्ये	शरणं गच्छामि [पै०]। शरणं व्रजामि [सुबो०]। शरणागतोस्मीति भावयेत् [चतु०]।

==

❖ *मुक्तिपदं गच्छतां ससाधनलक्षणानि* ❖

(७५) **निर्मानमोहा जितसङ्गदोषा**
अध्यात्मनित्या विनिवृत्तकामाः
द्वन्द्वैर्विमुक्ताः सुखदुःखसञ्ज्ञै-
र्गच्छन्त्यमूढाः पदमव्ययं तत्॥१५-०५॥

पदच्छेदः निर्मान-मोहाः जित-सङ्ग-दोषाः
अध्यात्म-नित्या विनिवृत्त-कामाः।
द्वन्द्वैः विमुक्ताः सुखदुःख-सञ्ज्ञैः
गच्छन्ति अ-मूढाः पदम् अव्ययं तत्॥

अन्वयः - निर्मानमोहाः जितसङ्गदोषाः अध्यात्मनित्याः विनिवृत्तकामाः सुखदुःखसंज्ञैः द्वन्द्वैः विमुक्ताः अमूढाः तत् अव्ययम् पदं गच्छन्ति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
निर्मानमोहाः	निर्मानमोह [पुं-प्र-बहु]	**विमुक्ताः**	वि-मुच् [कृत्-प्रत्ययः-क्त-पुं-प्र-बहु]
जितसङ्गदोषाः	जितसङ्गदोष [पुं-प्र-बहु]	**अमूढाः**	अमूढ [पुं-प्र-बहु]

अध्यात्मनित्याः	अध्यात्मनित्य [पुं-प्र-बहु]	**तत्**	तद् [नपुं-द्वि-एक]
विनिवृत्तकामाः	विनिवृत्तकाम [पुं-प्र-बहु]	**अव्ययम्**	अव्यय [नपुं-द्वि-एक]
सुखदुःखसंज्ञैः	सुखदुःखसञ्ज्ञ [पुं-तृ-बहु]	**पदम्**	पद [नपुं-द्वि-एक]
द्वन्द्वैः	द्वन्द्व [पुं-तृ-बहु]	**गच्छन्ति**	गम् [कर्तरि-लट्-प्र-बहु-परस्मै]

पदार्थः

मूलम्	**हिन्दी**	**English**
निर्मानमोहाः	मान और मोह को नष्ट करने वाले	without pride and delusion
जितसङ्गदोषाः	आसक्ति रूप दोष विजयी	having conquered faulty association
अध्यात्मनित्याः	अध्यात्म में नित्य स्थित	eternal spirituality
विनिवृत्तकामाः	कामनाओं से निवृत्त	without desires
सुखदुःखसंज्ञैः	सुख-दुःख नामक	named happiness and distress
द्वन्द्वैः	द्वन्द्वों से	from duality
विमुक्ताः	विमुक्त	liberated
अमूढाः	ज्ञानीजन	undeluded
तत्	उस	that
अव्ययम्	अविनाशी	eternal
पदम्	पद को	state
गच्छन्ति	प्राप्त होते हैं	attains

भावार्थः

हिन्दी : जिनका मान और मोह नष्ट हो गया है, जिन्होंने आसक्ति रूप दोष को जीत लिया है और जिनकी अध्यात्म में नित्य अवस्थिति है। जिनकी कामनाएँ नष्ट हो गयी हैं। सुख-दुःख नामक द्वन्द्वों से विमुक्त ज्ञानीजन उस अविनाशी पद को प्राप्त होते हैं।

English - Without pride and delusion, free from the impurities of attachment, always spiritual, freed from desires and the sense of duality like happiness or distress, the undeluded persons attain that eternal state.

सन्धिः -	निर्मानमोहाः+जितसङ्गदोषाः	निर्मानमोहा जितसङ्गदोषाः	रुत्व>यत्व>लोप-सन्धिः[1]
	जितसङ्गदोषाः+अध्यात्मनित्याः	जितसङ्गदोषा अध्यात्मनित्याः	रुत्व >यत्व>लोप-सन्धिः[2]
	अध्यात्मनित्याः+विनिवृत्तकामाः	अध्यात्मनित्या विनिवृत्तकामाः	रुत्व>यत्व>लोप-सन्धिः[3]
	द्वन्द्वैः+विमुक्ताः	द्वन्द्वैर्विमुक्ताः	रेफ-सन्धिः[4]
	सुखदुःखसञ्ज्ञैः+गच्छन्ति	सुखदुःखसञ्ज्ञैर्गच्छन्ति	रेफ-सन्धिः[5]
	गच्छन्ति+अमूढाः	गच्छन्त्यमूढाः	यण्-सन्धिः[6]

समासः -	निर्मानमोहाः	मानः च मोहः च मानमोहौ,	इतरेतरयोगद्वन्द्वः
		निर्गतौ मानमोहौ यस्मात् निर्मानमोहः ते	पञ्चम्यर्थ-बहुव्रीहिः
	जितसङ्गदोषाः	सङ्गः एव दोषः सङ्गदोषः,	कर्मधारयः
		जितः सङ्गदोषः येन जितसङ्गदोषः ते	तृतीयार्थ-बहुव्रीहिः
	अध्यात्मानित्याः	आत्मनि इति अध्यात्मम्	अव्ययीभावः
		अध्यानि नित्यः अध्यात्मनित्यः ते	सप्तमी-तत्पुरुषः
	विनिवृत्तकामाः	विशेषतः निवृत्तः विनिवृत्तः	प्रादितत्पुरुषः
		विनिवृत्तः कामः येषां ते	षष्ठ्यर्थ-बहुव्रीहिः
	सुखदुःखसंज्ञैः	सुखं च दुःखं च सुखदुःखे	इतरेतरयोग-द्वन्द्वः
		सुखदुःखे संज्ञे येषां तानि सुखदुःखसंज्ञानि तैः	षष्ठ्यर्थ-बहुव्रीहिः
	अमूढाः	न मूढः अमूढः ते	नञ्-तत्पुरुषः
	अव्ययम्	न व्ययम् यस्य तत् अव्ययम् तम्	नञर्थ-बहुव्रीहिः

पदार्थकोशः

निर्मानमोहाः मानः च मोहः च मानमोहौ, तौ निर्गतौ येभ्यः ते निर्मानमोहाः मानमोहवर्जिताः [शा०]।
निर्गतौ मानमोहौ अहङ्कारमिथ्याभिनिवेशौ येभ्यः ते [सुबो०]।
मानो दर्पः; मोहो विपर्ययः तद्रहिताः [चतु०]।

---

1 ससजुषो रुः (८।२।६६)>भोभगोअघो अपूर्वस्य योऽशि (८।३।१७)>हलि सर्वेषाम् (८।३।२२)
2 ससजुषो रुः (८।२।६६)>भोभगो अघो अपूर्वस्य योऽशि (८।३।१७)>लोपः शाकल्यस्य (८।३।१९)
3 ससजुषो रुः (८।२।६६)>भोभगोअघो अपूर्वस्य योऽशि (८।३।१७)>हलि सर्वेषाम् (८।३।२२)
4 ससजुषो रुः (८।२।६६)
5 ससजुषो रुः (८।२।६६)
6 इको यणचि (६।१।७७)

जितसङ्गदोषा: सङ्ग एव दोष: सङ्गदोष:, जित: सङ्गदोष: यै: ते जितसङ्गदोषा: [शा०]। सङ्गो विषयसङ्कल्प: स एव दोषो जित: सङ्गदोषो यै: ते; विषयसङ्कल्परहिता: [पै०]। जित: पुत्रादिसङ्गरूपो दोषो यै: ते [सुबो०]। जित: सङ्ग: कर्ताहमित्यभिमान: दोषो रागादिश्च यै: ते [चतु०]।

अध्यात्मनित्या: परमात्मस्वरूपालोचननित्या: तत्परा: [शा०]। आत्मज्ञाननिरता: [पै०]। अध्यात्मे आत्मज्ञाने नित्या: परिनिष्ठिता: [सुबो०]। अध्यात्मम् आत्मनि नित्या: निष्ठावन्त: आत्मध्यानपरा: [चतु०]।

विनिवृत्तकामा: विशेषतो निर्लेपेन निवृत्ता: कामा: येषां ते विनिवृत्तकामा: [शा०]। त्यक्तकामा: [पै०]। विशेषेण निवृत्त: कामो येभ्य: ते [सुबो०]। त्यक्तसर्वपरिग्रहा: [चतु०]।

सुखदु:खसञ्ज्ञै: सुखादिशब्दवाच्यै: [पै०]। सुखदु:खसञ्ज्ञानि [सुबो०]। सुखदु:खेत्युपलक्षणं शीतोष्णादीनामपि [चतु०]।

द्वन्द्वै: प्रियाप्रियादिभि: [शा०]। शीतोष्णादीनि [सुबो०]।

विमुक्ता: परित्यक्ता: [शा०]। तितिक्षावन्त: [चतु०]।

अमूढा: मोहवर्जिता: [शा०]। अविवेकिन: [पै०]। निवृत्ताविद्या: [सुबो०]। विद्ययाऽविद्यानाशं कृतवन्त: [चतु०]।

तत् वैष्णवम् [पै०]।

अव्ययम् अविनाशि [पै०]। अपुनरावृत्ति [चतु०]।

पदम् वैष्णवम् [सुबो०]।

गच्छन्ति प्राप्नुवन्ति [पै०]।

==

❖ *मुक्तिपदस्य स्वरूपविवेचनम्* ❖

(७६) **न तद्भासयते सूर्यो न शशाङ्को न पावकः**
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ पुरुषोत्तमयोगः **१५-०६॥**

पदच्छेद: न तत् भासयते सूर्यः न शशाङ्कः न पावकः।
यत् गत्वा न निवर्तन्ते तत् धाम- परमं मम॥

अन्वयः - यत् गत्वा न निवर्तन्ते तत् मम परमं धाम (अस्ति) तत् (पदम्) न सूर्यः भासयते न शशाङ्कः (भासयते) न पावकः (भासयते)।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
यत्	यद् [नपुं-द्वि-एक]	(अस्ति)	(अस् [कर्तरि-लट्-प्र-एक-परस्मै])
गत्वा	गम् [कृत्-प्रत्ययः-क्त्वा]	तत्	तद् [नपुं-द्वि-एक]
न	न [अव्य]	(पदम्)	(पद [नपुं-द्वि-एक])
निवर्तन्ते	नि-वृत् [कर्तरि-लट्-प्र-बहु-आत्मने]	सूर्यः	सूर्य [पुं-प्र-एक]
तत्	तद् [नपुं-द्वि-एक]	भासयते	भास्-णिच् [कर्तरि-लट्-प्र-एक-आत्मने]
मम	अस्मद् [ष-एक]	न	न [अव्य]
परमम्	परम [नपुं-प्र-एक]	शशाङ्कः	शशाङ्क [पुं-प्र-एक]
धाम	धामन् [नपुं-प्र-एक]	पावकः	पावक [पुं-प्र-एक]

पदार्थः

मूलम्	हिन्दी	English
यत्	जिसको	where
गत्वा	प्राप्त होकर	going
न	नहीं	never
निवर्तन्ते	लौटकर आते	comes back
तत्	उसको	that
मम	मेरा	My
परमम्	परम	supreme
धाम	धाम	abode
(अस्ति)	(है)	is
तत्	उस	that
(पदम्)	(परमपद को)	abode
न	न	not
सूर्यः	सूर्य	the sun
भासयते	प्रकाशित कर सकता है	illuminates
न	न	nor
शशाङ्कः	चन्द्रमा	the moon

(भासयते)	(प्रकाशित कर सकता है)	illuminates
न	न	nor
पावकः	अग्नि	fire electricity
(भासयते)	(प्रकाशित कर सकता है)	illuminates

भावार्थः

हिन्दी : उस परम-धाम को न तो सूर्य प्रकाशित करता है, न चन्द्रमा प्रकाशित करता है और न ही अग्नि प्रकाशित करती है, जहाँ पहुँचकर कोई भी मनुष्य इस संसार में वापस नहीं आता है वही मेरा परमधाम है।

English - There shines neither the sun, nor the moon nor the fire, by going where men do not come back. That is My Supreme Abode.

सन्धिः -	तत्+भासयते	तद्भासयते	जश्त्व-सन्धिः[1]
	सूर्यः+न	सूर्यो न	रुत्व>उत्व>गुण-सन्धिः[2]
	शशाङ्कः+न	शशाङ्को न	रुत्व>उत्व>गुण-सन्धिः[3]
	यत्+गत्वा	यद्गत्वा	जश्त्व-सन्धिः[4]
	तत्+धाम	तद्धाम	जश्त्व-सन्धिः[5]

पदार्थकोशः

यत्	धाम वैष्णवं पदम् [टि०]।
तत्	धाम पदम् [टि०]।
मम	विष्णोः [शा०]।
भासयते	प्रकाशयन्ति [सुबो०]।
शशाङ्कः	चन्द्रः [शा०/चतु०]।

---

1 झलां जश् झशि (८।४।५३)
2 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
3 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
4 झलां जश् झशि (८।४।५३)
5 झलां जश् झशि (८।४।५३)

पावक:	अग्नि: [शा०]।
गत्वा	प्राप्य [शा०/सुबो०]। प्राप्य ज्ञात्वा [चतु०]।
निवर्तन्ते	पुनरागच्छन्ति [पै०]। पुन: संसारिणो भवन्ति [सुबो०]।
धाम	तेजोरूपं पदम् [शा०]। स्वरूपम्, वैष्णवतेजोरूपम् [सुबो०]। वृत्तिरूपज्ञानात् अपरमात् अन्यत् ज्योतिश्चिन्मात्रम् [चतु०]।
सूर्य:	आदित्य: सर्वावभासनशक्तिमत्त्वे [शा०]। सूर्यादय: [सुबो०]।

==

❖ *'तद्धाम परमं मम' इति निर्देष्टस्यैव संसारावस्था* ❖

(७७) **ममैवांशो जीवलोके जीवभूत: सनातन:।**
मन:षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥ पुरुषोत्तमयोग: **१५-०७॥**

पदच्छेद: मम एव अंश: जीव-लोके जीव-भूत: सनातन:।
मन:षष्ठानि इन्द्रियाणि प्रकृति-स्थानि कर्षति॥

अन्वय: - जीवलोके सनातन: जीवभूत: मम एव अंश: प्रकृतिस्थानि मन:षष्ठानि इन्द्रियाणि कर्षति।

पदपरिचय:

मूलम्	**पदपरिचय:**	**मूलम्**	**पदपरिचय:**
जीवलोके	जीवलोक [पुं-स-एक]	**अंश:**	अंश [पुं-प्र-एक]
सनातन:	सनातन [पुं-प्र-एक]	**प्रकृतिस्थानि**	प्रकृतिस्थ [नपुं-द्वि-बहु]
जीवभूत:	जीवभूत [पुं-प्र-एक]	**मन:षष्ठानि**	मन:षष्ठ [नपुं-द्वि-बहु]
मम	अस्मद् [ष-एक]	**इन्द्रियाणि**	इन्द्रिय [नपुं-द्वि-बहु]
एव	एव [अव्य]	**कर्षति**	कृष् [कर्तरि-लट्-प्र-एक-परस्मै]

पदार्थ:

मूलम्	**हिन्दी**	**English**
जीवलोके	देह में	in the mortal world
सनातन:	सनातन	eternal
जीवभूत:	जीवात्मा	the living entity

मम	मेरा	My
एव	ही	certainly
अंशः	अंश है	an aspect
प्रकृतिस्थानि	प्रकृति में स्थित	situated in Prakṛti
मनःषष्ठानि	मन सहित छह	mind and five
इन्द्रियाणि	इन्द्रियों को	senses
कर्षति	आकर्षण करता है	pulls towords it

भावार्थः

हिन्दी : हे अर्जुन! संसार में प्रत्येक शरीर में स्थित जीवात्मा मेरा ही सनातन अंश है, जो कि मन सहित छहों इन्द्रियों के द्वारा कार्य करता है।

English - The eternal living element (soul) in the mortal world is but an aspect of Me only. With all the six senses including the mind established in Prakriti, it pulls towords it.

सन्धिः -

मम+एव	ममैव	वृद्धि-सन्धिः[1]
एव+अंशः	एवांशः	सवर्णदीर्घ-सन्धिः[2]
अंशः+जीवलोके	अंशो जीवलोके	रुत्व>उत्व>गुण-सन्धिः[3]
मनःषष्ठानि+इन्द्रियाणि	मनःषष्ठानीन्द्रियाणि	सवर्णदीर्घ-सन्धिः[4]

समासः -

जीवलोके	जीवानां लोकः जीवलोकः तस्मिन्	षष्ठी-तत्पुरुषः
जीवभूतः	जीवानां भूतः जीवभूतः	षष्ठी-तत्पुरुषः
प्रकृतिस्थानि	प्रकृतौ तिष्ठति प्रकृतिस्थम् तानि	उपपदम्
मनःषष्ठानि	मनः षष्ठं यस्य तत् मनःषष्ठं तानि	बहुव्रीहिः

1 वृद्धिरेचि (६।१।८८)
2 अकः सवर्णे दीर्घः (६।१।१०१)
3 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
4 अकः सवर्णे दीर्घः (६।१।१०१)

पदार्थकोशः

जीवलोके	जीवानां लोके संसारे [शा०]। प्राणिसमूहे [पै०]। संसारे [सुबो०/चतु०]।
सनातनः	सर्वदा संसारित्वेन प्रसिद्धः [सुबो०]। सर्वदा एकरूपः [चतु०]।
जीवभूतः	कर्ता भोक्ता इति प्रसिद्धः [शा०]। क्षेत्रज्ञः [पै०]। प्राणी [चतु०]।
मम	परमात्मनः नारायणस्य [शा०]। ब्रह्मणः [गीता०]।
अंशः	भागः अवयवः एकदेशः इति अनर्थान्तरम् [शा०]। एकदेशः [पै०]। इति अंशांशिभावोक्तिः [चतु०]।
प्रकृतिस्थानि	स्वस्थाने कर्णशष्कुल्यादौ प्रकृतौ स्थितानि [शा०]। प्रकृतौ कारणे मायारूपे तिष्ठन्ति इति [पै०]। सुषुप्तिप्रलययोः प्रकृतौ लीनतया स्थितानि [सुबो०]। इन्द्रियाणां प्रकृतिः स्वभावो विषयप्रावण्यं तत्र स्थितानि [चतु०]।
मनःषष्ठानि	मनः षष्ठं येषां तानि [पै०/सुबो०]। मनः षष्ठं येषु तानि मनसा सह षडिन्द्रियाणि [चतु०]।
इन्द्रियाणि	श्रोत्रादीनि [शा०]। शब्दादिभिः विषयैः संयोजयति [पै०]।
कर्षति	आकर्षति [शा०/सुबो०]। आकर्षति श्रोत्रादीनि [पै०]। सुप्तिप्रलयसमकालेषु सङ्कोचयति [चतु०]।

==

❖ पूर्वदेहाद् इन्द्रियाकर्षणस्य कालः तदुपयोगः च ❖

(७८) **शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः**
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्॥ पुरुषोत्तमयोगः **१५-०८॥**

पदच्छेदः शरीरं यत् अवाप्नोति यत् च अपि उत्क्रामति ईश्वरः।
गृहीत्वा एतानि संयाति वायुः गन्धान् इव आशयात्॥

अन्वयः - आशयात् गन्धान् वायुः इव ईश्वरः अपि यत् उत्क्रामति एतानि गृहीत्वा च यत् शरीरम् अवाप्नोति (तस्मिन्) (शरीरे) संयाति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
आशयात्	आशय [पुं-पं-एक]	**उत्क्रामति**	उत्-क्रम् [कर्तरि-लट्-प्र-एक-परस्मै]
गन्धान्	गन्ध [पुं-द्वि-बहु]	**एतानि**	एतद् [नपुं-द्वि-बहु]
वायुः	वायु [पुं-प्र-एक]	**गृहीत्वा**	ग्रह [कृत्-प्रत्ययः-क्त्वा]

इव	इव [अव्य]	**च**	च [अव्य]
ईश्वरः	ईश्वर [पुं-प्र-एक]	**यत्**	यद् [नपुं-द्वि-एक]
अपि	अपि [अव्य]	**शरीरम्**	शरीर [नपुं-द्वि-एक]
यत्	यत् [अव्य]	**अवाप्नोति**	अव-आप् [कर्तरि-लट्-प्र-एक-परस्मै]
		संयाति	सम्-या [कर्तरि-लट्-प्र-एक-परस्मै]

पदार्थः

मूलम्	**हिन्दी**	**English**
आशयात्	गन्ध के स्थान से	from the source of smell
गन्धान्	गन्ध को	smell
वायुः	वायु	air
इव	जैसे	like
ईश्वरः	स्वामी	the Īśvara
अपि	भी	virtually
यत्	जिसका	that which
उत्क्रामति	त्याग करता है	gives up
एतानि	इनको	all these
गृहीत्वा	ग्रहण करके	taking
च	फिर	also
यत्	जिस	as much as
शरीरम्	शरीर को	body
अवाप्नोति	प्राप्त होता है	gets
(तस्मिन्)	(उस)	in that
(शरीरे)	(शरीर में)	in that body
संयाति	जाता है	goes away

भावार्थः

हिन्दी : शरीर का स्वामी जीवात्मा कार्यों को संस्कार रूप में ग्रहण करके एक शरीर का त्याग करके दूसरे शरीर में उसी प्रकार चला जाता है जिस प्रकार वायु गन्ध को एक स्थान से लेकर दूसरे स्थान में ले जाती है।

English - When the soul enters the body and then when it leaves , the Īśvara takes away all these just as the smell is carried away by the wind from its source.

सन्धिः -	यत्+अवाप्नोति	यदवाप्नोति	जश्त्व-सन्धिः[1]
	यत्+च	यच्च	जश्त्व >श्चुत्व>चर्त्व-सन्धिः[2]
	च+अपि	चापि	सवर्णदीर्घ-सन्धिः[3]
	अपि+उत्क्रामति	अप्युत्क्रामति	यण्-सन्धिः[4]
	उत्क्रामति+ईश्वरः	उत्क्रामतीश्वरः	सवर्णदीर्घ-सन्धिः[5]
	गृहीत्वा+एतानि	गृहीत्वैतानि	वृद्धि-सन्धिः[6]
	वायुः+गन्धान्	वायुर्गन्धान्	रेफ-सन्धिः[7]
	इव+आशयात्	इवाशयात्	सवर्णदीर्घ-सन्धिः[8]

पदार्थकोशः

वायुः	पवनः [शा०]।
यत्	यदा [टि०]।
उत्क्रामति	निर्गच्छति [पै०]। त्यजति [गीता०]।
एतानि	मनःषष्ठानीन्द्रियाणि [टि०]।
यत्	यदा [टि०]।
शरीरम्	देहम् [टि०]।
अवाप्नोति	प्राप्नोति [पै०]। गृह्णाति [गीता०]।
गन्धान्	गन्धवतः सूक्ष्मान् अंशान् [सुबो०]।
आशयात्	पुष्पादेः[शा०]। स्वस्थानात् कुसुमादेः सकाशात्[सुबो०]। स्वलयस्थानात्, पुष्पात्[चतु०]।

1 झलां जशोऽन्ते (८।२।३९)
2 झलां जशोऽन्ते (८।२।३९)>स्तोः श्चुना श्चुः (८।४।४०)>खरि च (८।४।५५)
3 अकः सवर्णे दीर्घः (६।१।१०१)
4 इको यणचि (६।१।७७)
5 अकः सवर्णे दीर्घः (६।१।१०१)
6 वृद्धिरेचि (६।१।८८)
7 ससजुषो रुः (८।२।६६)
8 अकः सवर्णे दीर्घः (६।१।१०१)

ईश्वरः	देहादिसङ्घातस्वामी जीवः [शा०]। पुरस्वामी क्षेत्रज्ञः [पै०]। देहादीनां स्वामी [सुबो०]।
संयाति	सम्यक् याति गच्छति [शा०/सुबो०]। विषयदेशं प्रतिगच्छति [चतु०]।

==

❖ *पूर्वदेहाद् इन्द्रियाकर्षणस्य कालः तदुपयोगः च* ❖

(७९) **श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च**

अधिष्ठाय मनश्चायं विषयानुपसेवते॥ पुरुषोत्तमयोगः **१५-०९॥**

पदच्छेदः श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणम् एव च ।

अधिष्ठाय मनः च अयं विषयान् उपसेवते॥

अन्वयः - अयं श्रोत्रं चक्षुः च स्पर्शनं च रसनं घ्राणं च मनः अधिष्ठाय एव विषयान् उपसेवते।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
अयम्	इदम् [पुं-प्र-एक]	**घ्राणम्**	घ्राण [पुं-द्वि-एक]
श्रोत्रम्	श्रोत्र [नपुं-द्वि-एक]	**च**	च [अव्य]
चक्षुः	चक्षुस् [नपुं-द्वि-एक]	**मनः**	मनस् [नपुं-द्वि-एक]
च	च [अव्य]	**अधिष्ठाय**	अधि-स्था [कृत्-प्रत्ययः-ल्यप्]
स्पर्शनम्	स्पर्शन [नपुं-द्वि-एक]	**एव**	एव [अव्य]
च	च [अव्य]	**विषयान्**	विषय [पुं-द्वि-बहु]
रसनम्	रसन [नपुं-द्वि-एक]	**उपसेवते**	उप-सेव् [कर्तरि-लट्-प्र-एक-आत्मने]

पदार्थः

मूलम्	हिन्दी	English
अयम्	यह	this
श्रोत्रम्	श्रोत्र	ears
चक्षुः	चक्षु	eyes
च	और	also
स्पर्शनम्	त्वचा को	skin
च	तथा	also

रसनम्	रसना	tongue
घ्राणम्	घ्राण	nose
च	और	and
मनः	मन को	mind
अधिष्ठाय	आश्रय करके	being situated
एव	ही	also
विषयान्	विषयों का	sense objects
उपसेवते	सेवन करता है	enjoys

भावार्थः

हिन्दी : जीवात्मा कान, आँख, त्वचा, जीभ, नाक और मन की सहायता से ही विषयों का सेवन करता है।

English - Established in the ears, eyes, skin, tongue, nose and also in the mind the soul enjoys the sense objects.

सन्धिः -	मनः+च	मनश्च	सत्व>श्चुत्व-सन्धिः[1]
	च+अयम्	चायम्	सवर्णदीर्घ-सन्धिः[2]

पदार्थकोशः

अयम् जीवः [सुबो०]।

श्रोत्रम् श्रोत्रादीनि बाह्येन्द्रियाणि [सुबो०]।

चक्षुः नेत्रम् [टि०]।

स्पर्शनम् त्वगिन्द्रियं स्पृशत्यनेनेति [टि०]।

रसनम् जिह्वेन्द्रियम् रसयत्यनेनेति [टि०]।

घ्राणम् जिघ्रत्यनेनेति [टि०]।

च चकारात् कर्मेन्द्रियाणि बुद्धिं च [टि०]।

मनः क्षेत्रज्ञः [पै०]। अन्तःकरणम् [सुबो०]। इत्यनेन अन्तःकरणम् उपलक्ष्यते [गीता०]। षष्ठं प्रत्येकमिन्द्रियेण सह मनुतेऽनेनेति [टि०]।

---

1 विसर्जनीयस्य सः (८।३।३४)>स्तोः श्चुना श्चुः (८।४।४०)

2 अकः सवर्णे दीर्घः (६।१।१०१)

अधिष्ठाय आश्रित्य [पै०/सुबो०]। व्यापारवन्ति कृत्वा [चतु०]।
विषयान् शब्दादीन् [शा०/पै०/सुबो०/चतु०]।
उपसेवते उपलभते [पै०]। उपभुङ्क्ते [सुबो०]। प्रकाशयति [चतु०]।

==

❖ पूर्वदेहाद् इन्द्रियाकर्षणस्य कालः तदुपयोगः च ❖

(८०) **उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम्**
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः॥ पुरुषोत्तमयोगः **१५-१०॥**

पदच्छेदः उत्क्रामन्तं स्थितं वा अपि भुञ्जानं वा गुण-अन्वितम्।
वि-मूढा न अनुपश्यन्ति पश्यन्ति ज्ञान-चक्षुषः॥

अन्वयः - उत्क्रामन्तं स्थितं वा भुञ्जानं गुणान्वितं वा अपि विमूढाः न अनुपश्यन्ति, ज्ञानचक्षुषः पश्यन्ति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
उत्क्रामन्तम्	उत्-क्रम् [कृत्-प्रत्ययः-शतृ-पुं-द्वि-एक]	अपि	अपि [अव्य]
वा	वा [अव्य]	विमूढाः	विमूढ [पुं-प्र-बहु]
स्थितम्	स्था [कृत्-प्रत्ययः-क्त-नपुं-द्वि-एक]	न	न [अव्य]
वा	वा [अव्य]	अनुपश्यन्ति	अनुदृश् [कर्तरि-लट्-प्र-बहु-परस्मै]
भुञ्जानम्	भुज् [कृत्-प्रत्ययः-शतृ-पुं-द्वि-एक]	ज्ञानचक्षुषः	ज्ञानचक्षुस् [नपुं-प्र-एक]
गुणान्वितम्	गुणान्वित [पुं-द्वि-एक]	पश्यन्ति	दृश् [कर्तरि-लट्-प्र-बहु-परस्मै]

पदार्थः

मूलम्	हिन्दी	English
उत्क्रामन्तम्	छोड़कर जाते हुए को	quitting the body
वा	अथवा	either
स्थितम्	स्थित हुए को	situated in the body

वा	अथवा	or
भुञ्जानम्	भोगते हुए को	enjoying
गुणान्वितम्	गुणों से अन्वित	under the influence of guṇas
अपि	भी	also
विमूढा:	अज्ञानीजन	deluded persons
न	नहीं	never
अनुपश्यन्ति	जानते	can see
ज्ञानचक्षुष:	ज्ञानरूप नेत्रों वाले	one who has the eyes of knowledge
पश्यन्ति	देखते हैं	can see

भावार्थ:

हिन्दी : जीवात्मा शरीर को कैसे छोड़ती है, कैसे शरीर में स्थित रहती है और किस प्रकार प्रकृति के गुणों के अधीन होकर विषयों का भोग करती है, मूर्ख मनुष्य कभी भी इस प्रक्रिया को नहीं देख पाते हैं। जिनकी आँखें ज्ञान के प्रकाश से प्रकाशित हो गयी हैं, केवल वही मनुष्य देख पाते हैं।

English - The deluded cannot see the soul either when departing the body or when established in the body, enjoying under the influence of the guṇas. Only those with the eyes of wisdom can see.

सन्धि: -	वा+अपि	वापि	सवर्णदीर्घ-सन्धि:[1]
	विमूढा:+न	विमूढा न	रुत्व>यत्व>लोप-सन्धि:[2]
	न+अनुपश्यन्ति	नानुपश्यन्ति	सवर्णदीर्घ-सन्धि:[3]

समास: -	गुणान्वितम्	गुणै: अन्वितम्	तृतीया-तत्पुरुष:
	ज्ञानचक्षुष:	ज्ञानम् एव चक्षु: येषां ते ज्ञानचक्षु: तानि	षष्ठ्यर्थ-बहुव्रीहि:

1 अक: सवर्णे दीर्घ: (६।१।१०१)

2 ससजुषो रु: (८।२।६६)>भोभगोअघो अपूर्वस्य योऽशि (८।३।१७)>हलि सर्वेषाम् (८।३।२२)

3 अक: सवर्णे दीर्घ: (६।१।१०१)

पदार्थकोशः

उत्क्रामन्तम् परित्यजन्तम् [शा०]। शरीरात् उद्गच्छन्तम् [पै०]।
देहात् देहान्तरं गच्छन्तम् [सुबो०]। उत्क्रमणेन [चतु०]। शरीरान्तरग्रहणाय [गीता०]।

वा इवार्थे [टि०]।

स्थितम् तिष्ठन्तम् [शा०]। तस्मिन् देहे [सुबो०]। स्थित्या [चतु०]।
शरीरस्थितियोगात् तिष्ठन्तम् [गीता०]।

भुञ्जानम् विषयानुपलभमानम् [पै०]। विषयान् [सुबो०/गीता०]। भोगेन [चतु०]।
शब्दादींश्चोपलभमानम् अनुभवन्तम् [टि०]।

गुणान्वितम् सुखदु:खमोहाख्यै: गुणै: अन्वितम् अनुगतं संयुक्तम् [शा०]।
गुणै: सत्त्वरजस्तमोभि: बुद्ध्याद्याकारपरिणतै: अन्वितम् [पै०]।
इन्द्रियादियुक्तं जीवम् [सुबो०]। सत्त्वरजस्तमोगुणयुक्तत्वेन [चतु०]।

विमूढा: दृष्टादृष्टविषयभोगबलाकृष्टचेतस्तया अनेकधा मूढा: [शा०]।
कार्यकरणसङ्घात आत्मत्वदर्शिनः [पै०]।

अनुपश्यन्ति अहो कष्टं वर्तते इति अनुक्रोशति [शा०]। उपलभन्ते [पै०]। अवलोकयन्ति [सुबो०]।

ज्ञानचक्षुष: प्रमाणजनितज्ञानचक्षुष:; विविक्तदृष्टय: [शा०]। ज्ञानं चक्षु: येषां ते [पै०]।
ज्ञानमेव चक्षु: येषां ते, विवेकिन: [सुबो०]।

पश्यन्ति यथावत् जानन्ति [टि०]।

===

❖ *पूर्वदेहाद् इन्द्रियाकर्षणस्य कालः तदुपयोगः च* ❖

(८१) **यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम्**
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः॥ पुरुषोत्तमयोगः **१५-११॥**

पदच्छेदः यतन्तः योगिनः च एनं पश्यन्ति आत्मनि अव-स्थितम्।
यतन्तः अपि अ-कृत-आत्मानः न एनं पश्यन्ति अ-चेतसः॥

अन्वयः - यतन्तः योगिनः आत्मनि अवस्थितम् एनम् पश्यन्ति च अकृतात्मानः अचेतसः यतन्तः अपि एनं न पश्यन्ति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
यतन्तः	यत् [कृत्-प्रत्ययः-शतृ-पुं-प्र-बहु]	अकृतात्मानः	अकृतात्मन् [पुं-प्र-बहु]
योगिनः	योगिन् [पुं-प्र-बहु]	अचेतसः	अचेतस् [नपुं-प्र-बहु]
आत्मनि	आत्मन् [पुं-स-एक]	यतन्तः	यत् [कृत्-प्रत्ययः-शतृ-पुं-प्र-बहु]
अवस्थितम्	अव-स्था [कृत्-प्रत्ययः-क्त-नपुं-द्वि-एक]	अपि	अपि [अव्य]
एनम्	इदम् [पुं-द्वि-एक]	एनम्	इदम् [पुं-द्वि-एक]
पश्यन्ति	दृश् [कर्तरि-लट्-प्र-बहु-परस्मै]	न	न [अव्य]
च	च [अव्य]	पश्यन्ति	दृश् [कर्तरि-लट्-प्र-बहु-परस्मै]

पदार्थः

मूलम्	हिन्दी	English
यतन्तः	यत्न करने वाले	endeavoring
योगिनः	योगीजन भी	Yogīs
आत्मनि	अपने हृदय में	in the Self
अवस्थितम्	स्थित	situated
एनम्	इसको	this
पश्यन्ति	देखते हैं	can see
च	किन्तु	also
अकृतात्मानः	अन्तःकरण को शुद्ध नहीं किया जिसने	without pure consciousness
अचेतसः	अज्ञानीजन	ignorant people
यतन्तः	यत्न करते रहने पर	endeavoring
अपि	भी	although
एनम्	इसको	this
न	नहीं	does not
पश्यन्ति	देखते हैं	see

भावार्थः

हिन्दी : योग के अभ्यास में प्रयत्नशील मनुष्य ही अपने हृदय में स्थित इस आत्मा को देख सकते हैं, किन्तु जो मनुष्य योग के अभ्यास में नहीं लगे हैं ऐसे अज्ञानी प्रयत्न करते रहने पर भी इस आत्मा को नहीं देख पाते हैं।

English - By effort, the Yogīs perceive the indwelling Self. But the ignorant, with impure minds, cannot perceive so even with effort.

सन्धिः -	यतन्तः+योगिनः	यतन्तो योगिनः	रुत्व>उत्व>गुण-सन्धिः[1]
	योगिनः+च	योगिनश्च	सत्व>श्चुत्व-सन्धिः[2]
	च+एनं	चैनं	वृद्धि-सन्धिः[3]
	पश्यन्ति+आत्मनि	पश्यन्त्यात्मनि	यण्-सन्धिः[4]
	आत्मनि+अवस्थितम्	आत्मन्यवस्थितम्	यण्-सन्धिः[5]
	यतन्तः+अपि	यतन्तोऽपि	रुत्व >उत्व>गुण>पूर्वरुप-सन्धिः[6]
	अपि+अकृतात्मानः	अप्यकृतात्मानः	यण्-सन्धिः[7]
	अकृतात्मानः+न	अकृतात्मानो न	रुत्व>उत्व>गुण-सन्धिः[8]
	न+एनं	नैनं	वृद्धि-सन्धिः[9]
	पश्यन्ति+अचेतसः	पश्यन्त्यचेतसः	यण्-सन्धिः[10]

समासः -	अकृतात्मानः	कृतः आत्मा यस्य सः कृतात्मा, ते	बहुव्रीहिः
		न कृतात्मा अकृतात्मा ते	नञ्-तत्पुरुषः
	अचेतसः	न चेतः यस्य सः अचेता ते	नञर्थ-बहुव्रीहिः

1 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
2 विसर्जनीयस्य सः (८।३।३४)>स्तोः श्चुना श्चुः (८।४।४०)
3 वृद्धिरेचि (६।१।८८)
4 इको यणचि (६।१।७७)
5 इको यणचि (६।१।७७)
6 ससजुषो रुः(८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)>आद् गुणः (६।१।८७)>एङः पदान्तादति (६।१।१०९)
7 इको यणचि (६।१।७७)
8 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
9 वृद्धिरेचि (६।१।८८)
10 इको यणचि (६।१।७७)

पदार्थकोश:

यतन्त:	प्रयत्नं कुर्वन्त: [शा०]। यमनियमादियोगानुष्ठानेन प्रयत्नं कुर्वाणा यतमाना [पै०]। ध्यानादिभि: प्रयतमाना: [सुबो०]। यत्नशीला: [चतु०]।
योगिन:	समाहितचित्ता: [शा०]। योग: सम्यग् ज्ञानं तत्र प्रवृत्ता: [पै०]।
आत्मनि	स्वस्यां बुद्धौ [शा०]। शरीरे [पै०]। देहे [सुबो०]। बुद्धौ [चतु०]।
अवस्थितम्	विविक्तम् [सुबो०]।
एनम्	प्रकृतम् आत्मानम् [शा०]। आत्मानम् [पै०/सुबो०]। विभुम् उत्क्रान्त्यादिहीनम् असङ्गम् [चतु०]।
पश्यन्ति	उपलभन्ते [पै०]।
अकृतात्मान:	असंस्कृतात्मान: तपसा इन्द्रियजयेन च, दुश्चरितात् अनुपरता:, अशान्तदर्पात्मान: [शा०]। अभ्यासवैराग्याभ्याम् असंस्कृतान्त:करणा: [पै०]। अविशुद्धचित्ता: [सुबो०]। यज्ञादिभिरशोधितचित्ता: [चतु०]।
अचेतस:	अविवेकिन: [शा०/पै०]। मन्दमतय: [सुबो०]। अनिर्जितचित्ता: [चतु०]।
यतन्त:	योगानुष्ठाने प्रयतमाना [पै०]।

==

❖ *ब्रह्मस्वरूपस्य भगवत: सर्वात्मकत्वं सर्वव्यवहारास्पदत्वं च* ❖

(८२) **यदादित्यगतं तेजो जगद्भासयतेऽखिलम्**
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्॥ पुरुषोत्तमयोग: **१५-१२॥**

पदच्छेद: यद् आदित्य-गतं तेजः जगत् भासयते अ-खिलम्।
यत् चन्द्रमसि यत् च-अग्नौ तत्-तेजः विद्धि मामकम्॥

अन्वय: - आदित्यगतं यत् तेजः अखिलं जगत् भासयते यत् चन्द्रमसि (विद्यते) यत् च अग्नौ (विद्यते) तत् मामकं तेजः विद्धि।

पदपरिचय:

मूलम्	**पदपरिचय:**	**मूलम्**	**पदपरिचय:**
आदित्यगतम्	आदित्यगत [नपुं-प्र-एक]	**यत्**	यत् [अव्य]
यत्	यत् [अव्य]	**च**	च [अव्य]
तेज:	तेजस् [नपुं-प्र-एक]	**अग्नौ**	अग्नि [पुं-स-एक]

अखिलम्	अखिल [नपुं-द्वि-एक]	**तत्**	तद् [नपुं-द्वि-एक]
जगत्	जगत् [नपुं-द्वि-एक]	**मामकम्**	मामक [पुं-द्वि-एक]
भासयते	भास्-णिच् [कर्तरि-लट्-प्र-एक-आत्मने]	**तेजः**	तेजस् [नपुं-द्वि-एक]
यत्	यत् [अव्य]	**विद्धि**	विद् [कर्तरि-लोट्-म-एक-परस्मै]
चन्द्रमसि	चन्द्रमस् [पुं-स-एक]		

पदार्थः

मूलम्	**हिन्दी**	**English**
आदित्यगतम्	सूर्य में स्थित	in the sunshine
यत्	जो	that
तेजः	तेज	splendor
अखिलम्	सम्पूर्ण	entire
जगत्	जगत् को	world
भासयते	प्रकाशित करता है	illuminates
यत्	जो	that
चन्द्रमसि	चन्द्रमा में	in the moon
यत्	जो	that
च	और	also
अग्नौ	अग्नि में	in the fire
तत्	उसको	that
मामकम्	मेरा	from me
तेजः	तेज	splendor
विद्धि	जान	understand

भावार्थः

हिन्दी : हे अर्जुन! जो प्रकाश सूर्य में स्थित है जिससे समस्त संसार प्रकाशित होता है, जो प्रकाश चन्द्रमा में स्थित है और जो प्रकाश अग्नि में स्थित है, उस प्रकाश को तुम मुझसे ही उत्पन्न समझो।

English - That brilliance coming from the sun illuminating the whole world and that which is also in the moon and in the fire, know that brilliance comes from Me.

सन्धिः -	यत्+आदित्यगतं	यदादित्यगतं	जश्त्व-सन्धिः[1]
	तेजः+जगत्	तेजो जगत्	रुत्व>उत्व>गुण-सन्धिः[2]
	जगत्+भासयते	जगद्भासयते	जश्त्व-सन्धिः[3]
	भासयते+अखिलम्	भासयतेऽखिलम्	पूर्वरूप-सन्धिः[4]
	यत्+चन्द्रमसि	यच्चन्द्रमसि	जश्त्व >श्चुत्व>चर्त्व-सन्धिः[5]
	यत्+च	यच्च	जश्त्व >श्चुत्व>चर्त्व-सन्धिः[6]
	च+अग्नौ	चाग्नौ	सवर्णदीर्घ-सन्धिः[7]
	तत्+तेजः	तत्तेजः	चर्त्व-सन्धिः[8]
	तेजः+विद्धि	तेजो विद्धि	रुत्व>उत्व>गुण-सन्धिः[9]

समासः -	आदित्यगतम्	आदित्यं गतम् आदित्यगतम्	द्वितीया-तत्पुरुषः
	अखिलम्	न खिलम् अखिलम्	नञ्-तत्पुरुषः

पदार्थकोशः

आदित्यगतम्	आदित्याश्रयम् [शा०]। आदित्यादिषु स्थितम् [सुबो०]। आदित्यादिषु बाह्यकरणाधिष्ठातृषु तत्तदधिष्ठेतेषु बाह्यकरणेषु च गतं विद्यमानम् [चतु०]।
यत्	अनेकप्रकारम् [सुबो०]।
तेजः	दीप्तिः प्रकाशः; चैतन्यात्मकं ज्योतिः [शा०]। प्रकाशः [पै०]। विषयप्रकाशनसामर्थ्यम् [चतु०]। प्रकाशत्वं धारकत्वं च [गीता०]।
अखिलम्	समस्तम् [शा०]। सर्वम् [चतु०]।
जगत्	विश्वम् [सुबो०]।
भासयते	प्रकाशयति [शा०/सुबो०]।

1 झलां जशोऽन्ते (८।२।३९)
2 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
3 झलां जश् झशि (८।४।५३)
4 एङः पदान्तादति (६।१।१०९)
5 झलां जशोऽन्ते (८।२।३९)>स्तोः श्चुना श्चुः (८।४।४०)>खरि च (८।४।५५)
6 झलां जशोऽन्ते (८।२।३९)>स्तोः श्चुना श्चुः (८।४।४०)>खरि च (८।४।५५)
7 अकः सवर्णे दीर्घः (६।१।१०१)
8 खरि च (८।४।५५)
9 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)

यत्	तेजः [टि०]।
चन्द्रमसि	शशभृति [शा०]। मनश्चन्द्रमसोर्यदान्तरप्रपञ्चप्रकाशनसामर्थ्यम् [चतु०]।
यत्	तेजः प्रकाशकं पोषकं च [गीता०]। तेजः [टि०]।
अग्नौ	हुतवहे [शा०]। अग्न्योरव्याकृतादिविषयप्रकाशनसामर्थ्यम् [चतु०]। तेजः प्रकाशनशोषणदहनस्वेदनपचनात्मकम् [गीता०]।
तत्	सर्वम् [सुबो०]। ज्योतिः सर्वम् अपि [टि०]।
मामकम्	मदीयं मम विष्णोः [शा०]। मदीयम् [चतु०]।
तेजः	अवभासकम् [टि०]।
विद्धि	विजानीहि [शा०]। जानीहि [सुबो०]।

==

❖ ***ब्रह्मस्वरूपस्य भगवतः सर्वात्मकत्वं सर्वव्यवहारास्पदत्वं च*** ❖

(८३) **गामाविश्य च भूतानि धारयाम्यहमोजसा**
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः॥१३॥

पदच्छेदः गाम्-आविश्य च भूतानि धारयामि अहम् ओजसा।
पुष्णामि च औषधीः सर्वाः सोमः भूत्वा रसात्मकः॥

अन्वयः - च अहं गाम् आविश्य ओजसा भूतानि धारयामि च रसात्मकः सोमः भूत्वा सर्वाः ओषधीः पुष्णामि।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
च	च [अव्य]	**च**	च [अव्य]
अहम्	अस्मद् [प्र-एक]	**रसात्मकः**	रसात्मक [पुं-प्र-एक]
गाम्	गो [स्त्री-द्वि-एक]	**सोमः**	सोम [पुं-प्र-एक]
आविश्य	आङ्-विश् [कृत्-प्रत्ययः-ल्यप्]	**भूत्वा**	भू [कृत्-प्रत्ययः-क्त्वा]
ओजसा	ओजस् [नपुं-तृ-एक]	**सर्वाः**	सर्वा [स्त्री-द्वि-बहु]
भूतानि	भूत [नपुं-द्वि-बहु]	**ओषधीः**	ओषधी [स्त्री-द्वि-एक]
धारयामि	धृ-णिच् [कर्तरि-लट्-उ-एक-परस्मै]	**पुष्णामि**	पुष् [कर्तरि-लट्-उ-एक-परस्मै]

पदार्थः

मूलम्	हिन्दी	English
च	और	also
अहम्	मैं	I
गाम्	पृथ्वी में	the earth
आविश्य	प्रवेश करके	entering
ओजसा	अपनी शक्ति से	by My energy
भूतानि	सब भूतों को	living entities
धारयामि	धारण करता हूँ	sustaining
च	और	and
रसात्मकः	औषधीय रसस्वरूप	supplying the medicinal properties
सोमः	चन्द्रमा	the moon
भूत्वा	होकर	becoming
सर्वाः	सम्पूर्ण	all
ओषधीः	ओषधियों को	medicinal plants
पुष्णामि	पुष्ट करता हूँ	nourish

भावार्थः

हिन्दी : मैं ही प्रत्येक लोक में प्रवेश करके अपनी शक्ति से सभी प्राणियों को धारण करता हूँ और मैं ही चन्द्रमा के रूप से ओषधियों का पोषण करता हूँ।

English - Entering the earth I sustain all beings by My energy. I am also nourishing all the plants by becoming the moon with medicinal properties.

सन्धिः -	धारयामि+अहम्	धारयाम्यहम्	यण्-सन्धिः[1]
	च+ओषधीः	चौषधीः	वृद्धि-सन्धिः[2]

1 इको यणचि (६।१।७७)

2 वृद्धिरेचि (६।१।८८)

	सोमः+भूत्वा	सोमो भूत्वा	रुत्व>उत्व>गुण-सन्धिः[1]

समासः -	रसात्मकः	रसः आत्मकः यस्य सः	बहुव्रीहिः

पदार्थकोशः

अहम्	आत्मा [पै०]।
गाम्	पृथिवीम् [शा०/पै०/सुबो०/चतु०]।
आविश्य	प्रविश्य [शा०]। अधिष्ठाय [सुबो०]। दृढां कृत्वा [चतु०]।
ओजसा	बलेन यत् बलं कामरागविवर्जितम् ऐश्वरं रूपम् [शा०]। बलेन [पै०/सुबो०/चतु०]। बलेन सामर्थ्येन मदीयदिव्यशक्त्या [टि०]।
भूतानि	जगत् [शा०]। स्थावरजङ्गमात्मकानि [पै०]। चराचराणि [सुबो०]।
धारयामि	बिभर्मि [पै०]।
रसात्मकः	रसस्वभावः [शा०]। रसाधारभूतः [पै०]। रसमयः [सुबो०]। जलात्मकः [चतु०]।
सोमः	सर्वरसात्मकः रसस्वभावः सर्वरसानाम् आकरः सोमः [शा०]।
सर्वाः	व्रीहियवाद्याः [टि०]।
ओषधीः	पृथिव्यां जाताः ओषधीः सर्वाः व्रीहियवाद्याः [शा०]। व्रीह्याद्यौषधीः [सुबो०]।
पुष्णामि	पुष्टिमतीः रसस्वादुमती [शा०]। सरसाः करोमि [पै०]। संवर्द्धयामि [सुबो०]। पुष्टाश्च करोमि [चतु०]।

❖ *ब्रह्मस्वरूपस्य भगवतः सर्वात्मकत्वं सर्वव्यवहारास्पदत्वं च* ❖

(८४) **अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः**
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्॥ पुरुषोत्तमयोगः **१५-१४॥**

पदच्छेदः अहं वैश्वानरः भूत्वा प्राणिनां देहम् आश्रितः।
प्राणापानसम्-आयुक्तः पचामि अन्नम् चतुर्विधम्॥

अन्वयः - अहम् प्राणिनां देहम् आश्रितः प्राणापानसमायुक्तः वैश्वानरः भूत्वा चतुर्विधम् अन्नम् पचामि।

1 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
अहम्	अस्मद् [प्र-एक]	वैश्वानरः	वैश्वानर [पुं-प्र-एक]
प्राणिनाम्	प्राणिन् [पुं-6-बहु]	भूत्वा	भू [कृत्-प्रत्ययः-क्त्वा]
देहम्	देह [नपुं-द्वि-एक]	चतुर्विधम्	चतुर्विध [नपुं-द्वि-एक]
आश्रितः	आङ्-श्रि [कृत्-प्रत्ययः-क्त- आङ् श्रिञ्-भ्वादिः-पुं-प्र-एक]	अन्नम्	अन्न [नपुं-द्वि-एक]
प्राणापान-समायुक्तः	प्राणापान-सम्-आङ्-युज् [कृत्-प्रत्ययः-क्त-पुं-प्र-एक]	पचामि	पच् [कर्तरि-लट्-उ-एक-परस्मै]

पदार्थः

मूलम्	हिन्दी	English
अहम्	मैं	I
प्राणिनाम्	सब प्राणियों के	of all living entities
देहम्	शरीर में	body
आश्रितः	स्थित	situated
प्राणापानसमायुक्तः	प्राण और अपान से संयुक्त	keeping balanced Prāṇa and Apāna
वैश्वानरः	वैश्वानर अग्निरूप	by Vaiśvānara as the digesting fire
भूत्वा	होकर	becoming
चतुर्विधम्	चार प्रकार के	four kinds of
अन्नम्	अन्न को	foodstuff
पचामि	पचाता हूँ	digest

भावार्थः

हिन्दी : मैं ही वैश्वानर अग्नि के रूप में समस्त जीवों के शरीर में स्थित रहता हूँ, मैं ही प्राण वायु और अपान वायु को संतुलित रखते हुए चार प्रकार के अन्न को पचाता हूँ।

English - In the living entities I become Vaiśvānara and stay in the body. United with balanced Prāṇa and Apāna I digest the four kinds of food.

सन्धिः -	वैश्वानरः+भूत्वा	वैश्वानरो भूत्वा	रुत्व>उत्व>गुण-सन्धिः[1]
	पचामि+अन्नम्	पचाम्यन्नम्	यण्-सन्धिः[2]

समासः - प्राणापानसमायुक्तः	प्राणः च अपानः च प्राणापानौ	द्वन्द्वः
	प्राणापानाभ्यां समायुक्तः	तृतीया-तत्पुरुषः
चतुर्विधम्	चत्वारः विधः यस्य सः चतुर्विधः तम्	बहुव्रीहिः

पदार्थकोशः

प्राणिनाम्	प्राणवताम् [शा०]। सर्वेषाम् [चतु०]। प्राणवतां प्राणा: एषां सन्तीति प्राणिन: तेषां प्राणिनाम् [टि०]।
आश्रित:	प्रविष्ट: [शा०]।
प्राणापानसमायुक्त:	प्राणापानाभ्यां समायुक्त: संयुक्त: [शा०]। प्राणश्च अपानश्च प्राणापानौ ताभ्यां समायुक्त: सन्धुक्षित: [पै०]। प्राणापानाभ्यां तदुद्दीपकाभ्यां सहित: [सुबो०]। प्राणापानाभ्यां वायुभ्यां समायुक्त: समुद्दीपित: [चतु०]।
वैश्वानर:	उदरस्थ: अग्नि: [शा०]। अग्नि: [पै०]। जाठरोऽग्नि: [सुबो०]। उदरस्थोऽग्नि: [चतु०]।
चतुर्विधम्	चतुष्प्रकारम् [शा०]। अशितं खादितं पीतं लीढम् [पै०]। प्राणिभि: भुक्तं भक्ष्यं भोज्यं लेह्यं चोष्यम् च इति [सुबो०]। चतुर्विधम् [चतु०]।
अन्नम्	अशनं भोज्यं भक्ष्यं चोष्यं लेह्यं च [शा०]। अदनीयं भक्ष्यं दन्तव्यापारापेक्षमपूपादि। भोज्यं तदनपेक्षं पायसादि। लेह्यं गुडशर्करादि। चोष्यं निश्चोष्य त्यज्यमानम् इक्षुदण्डादि [चतु०]।
पचामि	पक्तिं करोमि [शा०]।

---

1 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)

2 इको यणचि (६।१।७७)

❖ ब्रह्मस्वरूपस्य भगवतः सर्वात्मकत्वं सर्वव्यवहारास्पदत्वं च ❖

(८५) सर्वस्य चाहं हृदि सन्निविष्टो
मत्तः स्मृतिर्ज्ञानमपोहनं च
वेदैश्च सर्वैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम्॥ पुरुषोत्तमयोगः १५-१५॥

पदच्छेदः सर्वस्य च अहं हृदि सम्-निविष्टः
मत् तःस्मृतिः ज्ञानम् अपोहनं च।
वेदैः च सर्वैः अहम् एव वेद्यः
वेदान्त-कृत् वेद-वित् एव च अहम्॥

अन्वयः - अहं सर्वस्य हृदि सन्निविष्टः (अस्मि) च मत्तः स्मृतिः ज्ञानं च अपोहनं (भवति) च सर्वैः वेदैः अहम् एव वेद्यः (अस्मि) अहं वेदान्तकृत् च वेदवित् एव (अस्मि)।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
अहम्	अस्मद् [प्र-एक]	**सर्वैः**	सर्व [पुं-तृ-बहु]
सर्वस्य	सर्व [पुं-ष-एक]	**वेदैः**	वेद [पुं-तृ-बहु]
हृदि	हृद् [नपुं-स-एक]	**अहम्**	अस्मद् [प्र-एक]
सन्निविष्टः	सम्-नि-विष् [कृत्-प्रत्ययः-क्त-पुं-प्र-एक]	**एव**	एव [अव्य]
(अस्मि)	(अस् [कर्तरि-लट्-उ-एक-परस्मै])	**वेद्यः**	विद् [कृत्-प्रत्ययः-ण्यत्-पुं-प्र-एक]
च	च [अव्य]	**(अस्मि)**	(अस् [कर्तरि-लट्-उ-एक-परस्मै])
मत्तः	मत्त [तसिल्]	**अहम्**	अस्मद् [प्र-एक]
स्मृतिः	स्मृति [स्त्री-प्र-एक]	**वेदान्तकृत्**	वेदान्तकृत् [पुं-प्र-एक]
ज्ञानम्	ज्ञान [नपुं-प्र-एक]	**च**	च [अव्य]
च	च [अव्य]	**वेदवित्**	वेदविद् [पुं-प्र-एक]
अपोहनम्	अपोहन [नपुं-प्र-एक]	**एव**	एव [अव्य]
(भवति)	(भू [कर्तरि-लट्-प्र-एक-परस्मै])	**(अस्मि)**	(अस् [कर्तरि-लट्-उ-एक-परस्मै])
च	च [अव्य]		

पदार्थः

मूलम्	हिन्दी	English
अहम्	मैं	I
सर्वस्य	सब प्राणियों के	of all living beings
हृदि	हृदय में	in the heart
सन्निविष्टः	स्थित	being situated
(अस्मि)	(हूँ)	am
च	तथा	and
मत्तः	मुझसे	from Me
स्मृतिः	स्मृति	remembrance
ज्ञानम्	ज्ञान	knowledge
च	और	and
अपोहनम्	अपोहन	forgetfulness
(भवति)	(होता है)	becomes
च	और	also
सर्वैः	सब	all
वेदैः	वेदों द्वारा	by the Vedas
अहम्	मैं	I
एव	ही	certainly
वेद्यः	जानने के योग्य	knowable
(अस्मि)	(हूँ)	am
अहम्	मैं	I
वेदान्तकृत्	वेदान्त का कर्ता	the compiler of Vedānta
च	और	and
वेदवित्	वेदों को जानने वाला	the knower of the Vedas
एव	ही	certainly
(अस्मि)	(हूँ)	am

भावार्थः

हिन्दी : मैं ही समस्त जीवों के हृदय में आत्मा रूप में स्थित हूँ, मेरे द्वारा ही जीव को वास्तविक स्वरूप की स्मृति, विस्मृति और ज्ञान होता है, मैं ही समस्त वेदों के द्वारा जानने योग्य हूँ, मुझसे ही समस्त वेद उत्पन्न होते हैं और मैं ही समस्त वेदों को जानने वाला हूँ।

English - I am situated in the heart of all living beings. From Me come memory, knowledge and also forgetfulness. I am all that is to be known from the Vedas. I am the compiler of the Vedas and scholar of the Vedas as well.

सन्धिः -	च+अहं	चाहं	सवर्णदीर्घ-सन्धिः[1]
	सन्निविष्टः+मत्तः	सन्निविष्टो मत्तः	रुत्व>उत्व>गुण-सन्धिः[2]
	स्मृतिः+ज्ञानम्	स्मृतिर्ज्ञानम्	रेफ-सन्धिः[3]
	वेदैः+च	वेदैश्च	सत्व>श्चुत्व-सन्धिः[4]
	सर्वैः+अहम्	सर्वैरहम्	रेफ-सन्धिः[5]
	वेद्यः+वेदान्तकृत्	वेद्यो वेदान्तकृत्	रुत्व>उत्व>गुण-सन्धिः[6]
	वेदान्तकृत्+वेदवित्	वेदान्तकृद्वेदवित्	जश्त्व-सन्धिः[7]
	वेदवित्+एव	वेदविदेव	जश्त्व-सन्धिः[8]
	च+अहम्	चाहम्	सवर्णदीर्घ-सन्धिः[9]

---

1 अकः सवर्णे दीर्घः (६।१।१०१)
2 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
3 ससजुषो रुः (८।२।६६)
4 विसर्जनीयस्य सः (८।३।३४)>स्तोः श्चुना श्चुः (८।४।४०)
5 ससजुषो रुः (८।२।६६)
6 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
7 झलां जशोऽन्ते (८।२।३९)
8 झलां जशोऽन्ते (८।२।३९)
9 अकः सवर्णे दीर्घः (६।१।१०१)

समासः -	वेदान्तकृत्	वेदानाम् अन्तः वेदान्तः	षष्ठी-तत्पुरुषः
		वेदान्तं करोति	उपपदम्
	वेदवित्	वेदान् वेत्ति वेदवित्	उपपदम्

पदार्थकोशः

अहम्	आत्मा [शा०]।
सर्वस्य	प्राणिजातस्य [शा०/पै०/सुबो०/चतु०]। वेद्यस्य [गीता०]।
हृदि	बुद्धौ [शा०]। हृत्पुण्डरीके [पै०]। समस्ताहरणस्वतन्त्रबोधस्वभावम् [गीता०]।
सन्निविष्टः	सम्यक् अन्तर्यामिरूपेण प्रविष्टः [सुबो०]।
मत्तः	आत्मनः [शा०/चतु०]। हेतोः [सुबो०]। मत्सामर्थ्यात् [गीता०]।
स्मृतिः	स्मरणं संस्कारशेषतां नीतस्य संहृतस्य पुनरवभासनात्मकम् [गीता०]।
ज्ञानम्	विषयेन्द्रियसंयोगजम् [सुबो०]।
अपोहनम्	अपायनम् अपगमनं च [शा०]। हेयबुद्धिः तस्योपलक्षणार्थत्वेन अपादेयबुद्धिश्च [पै०]। विस्मरणमज्ञानम् [चतु०]। अनेनाकृतेनेदं भवति इति व्यतिरेकबुद्धिः [गीता०]।
वेदैः	तत् तत् देवतादिरूपेण [सुबो०]। कर्मोपास्तिज्ञानकाण्डात्मकेः [चतु०]।
अहम्	परमात्मा [शा०/चतु०]।
वेद्यः	वेदितव्यः [शा०]।
वेदान्तकृत्	वेदान्तार्थसम्प्रदायकृत् [शा०]। निश्चयकृत् [पै०]। तत्सम्प्रदायप्रवर्तकः [सुबो०]। वेदान्तोक्तविद्यासम्प्रदायकृत् [चतु०]। वेदान्तं करोति इत्यात्मसाद्भावेन [गीता०]।
वेदवित्	वेदार्थवित् [शा०/सुबो०/चतु०]। वेदं वेत्ति इति; वेदार्थवित् [पै०]। वेदार्थवित् वेदान्तं करोति उपदिशतीति; आचार्यः, वेदवेदार्थतत्त्वज्ञानी ब्रह्मवित् [टि०]।

==

❖ ***क्षराक्षरशब्दवाच्यकार्यकारणोपाधिविनिर्मुक्तं***
नित्यशुद्धबुद्धमुक्तस्वभावं पुरुषोत्तमाख्यं परमात्मस्वरूपम् ❖

(८६) **द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च**
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥ पुरुषोत्तमयोगः **१५-१६॥**

पदच्छेदः द्वौ इमौ पुरुषौ लोके क्षरः च अ-क्षर एव च।
क्षरः सर्वाणि भूतानि कूट-स्थः अ-क्षर उच्यते॥

अन्वयः - लोके क्षरः च अक्षरः एव इमौ द्वौ पुरुषौ (स्तः) सर्वाणि भूतानि क्षरः (उच्यते) च कूटस्थः अक्षरः उच्यते।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
लोके	लोक [पुं-स-एक]	**सर्वाणि**	सर्व [नपुं-प्र-बहु]
क्षरः	क्षर [पुं-प्र-एक]	**भूतानि**	भूत [नपुं-प्र-बहु]
च	च [अव्य]	**क्षरः**	क्षर [पुं-प्र-एक]
अक्षरः	अक्षर [पुं-प्र-एक]	**(उच्यते)**	(वच् [कर्मणि-लट्-प्र-एक-आत्मने])
एव	एव [अव्य]	**च**	च [अव्य]
इमौ	इदम् [पुं-प्र-द्वि]	**कूटस्थः**	कूटस्थ [पुं-प्र-एक]
द्वौ	द्वि [पुं-प्र-द्वि]	**अक्षरः**	अक्षर [पुं-प्र-एक]
पुरुषौ	पुरुष [पुं-प्र-द्वि]	**उच्यते**	वच् [कर्मणि-लट्-प्र-एक-आत्मने]
(स्तः)	(अस् [कर्तरि-लट्-प्र-द्वि-परस्मै])		

पदार्थः

मूलम्	हिन्दी	English
लोके	इस संसार में	in the world
क्षरः	नाशवान्	perishable
च	और	and
अक्षरः	अविनाशी	imperishable
एव	भी	certainly
इमौ	ये	in this
द्वौ	दो प्रकार के	two
पुरुषौ	पुरुष	Puruṣas
(स्तः)	(हैं)	are
सर्वाणि	सम्पूर्ण	all
भूतानि	भूतप्राणियों के शरीर	living entities
क्षरः	नाशवान्	the perishable

(उच्यते)	(कहा जाता है)	is said
च	और	and
कूटस्थः	जीवात्मा	in oneness
अक्षरः	अविनाशी	imperishable
उच्यते	कहा जाता है	is said

भावार्थः

हिन्दी : हे अर्जुन! संसार में दो प्रकार के ही जीव होते हैं एक नाशवान् और दूसरे अविनाशी, इनमें समस्त जीवों के शरीर तो नाशवान् होते हैं और समस्त जीवों की आत्मा को अविनाशी कहा जाता है।

English - Two types of Puruṣas are there in this world, the perishable and the imperishable. All the living beings are perishable, but the innermost Soul is said to be imperishable.

सन्धिः -	द्वौ+इमौ	द्वाविमौ	यान्तवान्त-सन्धिः[1]
	क्षरः+च	क्षरश्च	सत्व>श्चुत्व-सन्धिः[2]
	च+अक्षरः	चाक्षरः	सवर्णदीर्घ-सन्धिः[3]
	अक्षरः+एव	अक्षर एव	रुत्व >यत्व>लोप-सन्धिः[4]
	कूटस्थः+अक्षरः	कूटस्थोऽक्षरः	रुत्व >उत्व>गुण>पूर्वरुप-सन्धिः[5]
	अक्षरः+उच्यते	अक्षर उच्यते	रुत्व >यत्व>लोप-सन्धिः[6]

समासः -	अक्षरः	न क्षरः अक्षरः	नञ्-तत्पुरुषः
	कूटस्थः	कूटे तिष्ठति कूटस्थः	उपपदम्
	अक्षरः	न क्षरः अक्षरः	नञ्-तत्पुरुषः

---

1 एचोऽयवायावः (६।१।७८)

2 विसर्जनीयस्य सः (८।३।३४)>स्तोः श्चुना श्चुः (८।४।४०)

3 अकः सवर्णे दीर्घः (६।१।१०१)

4 ससजुषो रुः (८।२।६६)>भोभगो अघो अपूर्वस्य योऽशि (८।३।१७)>लोपः शाकल्यस्य (८।३।१९)

5 ससजुषो रुः (८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)>आद्‌गुणः (६।१।८७)>एङः पदान्तादति(६।१।१०९)

6 ससजुषो रुः (८।२।६६)>भोभगो अघो अपूर्वस्य योऽशि (८।३।१७)>लोपः शाकल्यस्य (८।३।१९)

पदार्थकोशः

लोके संसारे [शा०]।

क्षरः क्षरति इति क्षरः विनाशी [शा०]। एकः [पै०]। विनाशी [चतु०]।

अक्षरः तद्विपरीतः, भगवतः मायाशक्तिः, क्षराख्यस्य पुरुषस्य उत्पत्तिबीजम् अनेकसंसारिजन्तुकामकर्मादि संस्काराश्रयः, अक्षरः पुरुषः [शा०]।

एव एवकारात् न तृतीयः प्रभेदोऽस्तीति ज्ञायते [टि०]।

इमौ पृथग्राशीकृतौ [टि०]।

द्वौ पुरुषौ [स्तः]।

सर्वाणि ब्रह्मादिस्थावरान्तानि; समुदायविवक्षया एकवचनम् [टि०]।

भूतानि समस्तं विकारजातम् [शा०]। प्राणिनः [पै०]। ब्रह्मादिस्थावरान्तानि शरीराणि [सुबो०]। प्राणवन्ति [चतु०]।

क्षरः पुरुषः [सुबो०]। क्षरतीति क्षर इति व्युत्पत्या; पुरुषः [टि०]।

कूटस्थः कूटः राशी राशिः इव स्थितः। अथवा, कूटः माया वञ्चना जिह्मता कुटिलता इति पर्यायाः, अनेकमायादिप्रकारेण स्थितः कूटस्थः, संसारबीजानन्त्यात् [शा०]। अचलो अव्याकृतात्मा सः [पै०]। चेतनो भोक्ता [सुबो०]। निर्विकारः [चतु०]।

अक्षरः न क्षरति इति अक्षरः [शा०]। मायोपाधिरक्षरः, उपाधिदोषेण अवशीकृतत्वात् चासौ न क्षरति स्वरूपात् न च्यवत इति [चतु०]।

==

❖ *क्षराक्षरशब्दवाच्यकार्यकारणोपाधिविनिर्मुक्तं नित्यशुद्धबुद्धमुक्तस्वभावं पुरुषोत्तमाख्यं परमात्मस्वरूपम्* ❖

(८७) **उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः**
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥ पुरुषोत्तमयोगः **१५-१७॥**

पदच्छेदः उत्तमः पुरुषः तु अन्यः परम-आत्मा इति उदाहृतः।
यः लोक-त्रयम् आविश्य बिभर्ति अव्यय ईश्वरः॥

अन्वयः - उत्तमः पुरुषः तु अन्यः (अस्ति) यः लोकत्रयम् आविश्य बिभर्ति (सः) अव्ययः ईश्वरः परमात्मा (च) इति उदाहृतः (अस्ति)।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
उत्तमः	उत्तम [पुं-प्र-एक]	**(सः)**	(तद् [पुं-प्र-एक])
पुरुषः	पुरुष [पुं-प्र-एक]	**अव्ययः**	अव्यय [पुं-प्र-एक]
तु	तु [अव्य]	**ईश्वरः**	ईश्वर [पुं-प्र-एक]
अन्यः	अन्य [पुं-प्र-एक]	**परमात्मा**	परमात्मन् [पुं-प्र-एक]
यः	यद् [पुं-प्र-एक]	**(च)**	(च [अव्य])
लोकत्रयम्	लोकत्रय [नपुं-द्वि-एक]	**इति**	इति [अव्य]
आविश्य	आङ्-विश् [कृत्-प्रत्ययः-ल्यप्]	**उदाहृतः**	उत्-आङ्-हृ [कृत्-प्रत्ययः-क्त-पुं-प्र-एक]
बिभर्ति	भृ [कर्तरि-लट्-प्र-एक-परस्मै]	**(अस्ति)**	(अस् [कर्तरि-लट्-प्र-एक-परस्मै])

पदार्थः

मूलम्	हिन्दी	English
उत्तमः	उत्तम	the best
पुरुषः	पुरुष	personality
तु	तो	but
अन्यः	अन्य	another
(अस्ति)	(है)	is
यः	जो	one who
लोकत्रयम्	तीनों लोकों में	the three divisions of the universe
आविश्य	प्रवेश करके	entering
बिभर्ति	धारण पोषण करता है	maintaining and sustaining
(सः)	(वह)	he
अव्ययः	अविनाशी	inexhaustible
ईश्वरः	परमेश्वर	īśvara
परमात्मा	परमात्मा	the Supreme Self
(च)	(और)	also
इति	इस प्रकार	thus
उदाहृतः	कहा गया	said
(अस्ति)	(है)	is

भावार्थः

हिन्दी : उत्तम पुरुष तो अन्य ही है जो तीनों लोकों में प्रवेश करके सभी प्राणियों का भरण-पोषण करता है। वह अविनाशी परमेश्वर एवं परमात्मा नाम से सम्बोधित किया जाता है।

English - Another Supreme Self besides is said to enter the three worlds and maintain as well as sustain them. He is the inexhaustible Iśwara.

सन्धिः -	पुरुषः+तु	पुरुषस्तु	सत्व-सन्धिः[1]
	तु+अन्यः	त्वन्यः	यण्-सन्धिः[2]
	परमात्मा+इति	परमात्मेति	गुण-सन्धिः[3]
	इति+उदाहृतः	इत्युदाहृतः	यण्-सन्धिः[4]
	यः+लोकत्रयम्	यो लोकत्रयम्	रुत्व>उत्व>गुण-सन्धिः[5]
	बिभर्ति+अव्ययः	बिभर्त्यव्ययः	यण्-सन्धिः[6]
	अव्ययः+ईश्वरः	अव्यय ईश्वरः	रुत्व >यत्व>लोप-सन्धिः[7]

समासः -	लोकत्रयम्	लोकानां त्रयम् लोकत्रयम्	षष्ठी-तत्पुरुषः
	अव्ययः	न व्ययः यस्य सः अव्ययः	नञर्थ-बहुव्रीहिः
	परमात्मा	परमः च असौ आत्मा परमात्मा	कर्मधारयः

पदार्थकोशः

उत्तमः उत्कृष्टतमः [शा०]। प्रकृष्टतमः [पै०]।
पुरुषः पूर्णमनेन जगदिति [पै०]।
अन्यः विलक्षणः [सुबो०]।

1 विसर्जनीयस्य सः (८।३।३४)
2 इको यणचि (६।१।७७)
3 आद् गुणः (६।१।८७)
4 इको यणचि (६।१।७७)
5 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
6 इको यणचि (६।१।७७)
7 ससजुषो रुः (८।२।६६)>भोभगो अघो अपूर्वस्य योऽशि (८।३।१७)>लोपः शाकल्यस्य (८।३।१९)

लोकत्रयम्	भूर्भुव:स्वराख्यम् [शा०]। पृथिवीम् अन्तरिक्षं स्वर्गम् [पै०]। कृत्स्नम् [सुबो०]। उत्तममध्यमाधमशरीररूपम् [चतु०]।
आविश्य	स्वकीयया चैतन्यबलशक्त्या प्रविश्य [शा०]। प्रविश्य [चतु०]।
बिभर्ति	स्वरूपसद्भावमात्रेण बिभर्ति धारयति [शा०]। बलेन धारयति [पै०]। पालयति [सुबो०]। धारयति [चतु०]।
अव्ययः	न अस्य व्ययः विद्यते इति अव्ययः [शा०]। निर्विकारः [सुबो०]। सर्वज्ञत्वेन ईश्वरधर्मेण अल्पज्ञत्वेन जीवधर्मेण वा न व्येति वर्धते क्षीयते वा इत्यर्थः [चतु०]।
ईश्वरः	सर्वज्ञः नारायणाख्यः ईशनशीलः [शा०]। स्वामी [पै०]। ईशनशीलः [सुबो०]।
परमात्मा	परमः च असौ देहाद्यविद्याकृतात्मभ्यः, आत्मा च सर्वभूतानां प्रत्यक्चेतनः, इत्यतः परमात्मा [शा०]। परमः च असौ आत्मा इति [सुबो०]।
उदाहृतः	उक्तः [शा०/सुबो०]। उक्तो वेदान्तेषु [पै०]।

==

❖ पुरुषोत्तमशब्दस्य नामनिर्वचनम् ❖

(८८) **यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः।**
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥ पुरुषोत्तमयोगः **१५-१८॥**

पदच्छेदः यस्मात् अ-क्षरम् अतीतः अहम् अ-क्षरात् अपि च उत्तमः।
अतः अस्मि लोके वेदे च प्रथितः पुरुष-उत्तमः॥

अन्वयः - यस्मात् अहं क्षरम् अतीतः (अस्मि) च अक्षरात् अपि उत्तमः (अस्मि) अतः लोके च वेदे पुरुषोत्तमः प्रथितः अस्मि।

पदपरिचयः

मूलम्	संस्कृतम्	मूलम्	संस्कृतम्
यस्मात्	यस्मात् [अव्य]	**उत्तमः**	उत्तम [पुं-प्र.एक]
अहम्	अस्मद् [प्र.एक]	**अतः**	अतः [अव्य]
क्षरम्	क्षर [नपुं-द्वि-एक]	**लोके**	लोक [पुं-स.एक]
अतीतः	अतीत [पुं-प्र.एक]	**च**	च [अव्य]
(अस्मि)	अस् [कर्तरि-लट्-उ-एक-परस्मै]	**वेदे**	वेद [पुं-स.एक]

च	च [अव्य]	**पुरुषोत्तमः**	पुरुषोत्तम [पुं-प्र.एक]
अक्षरात्	अक्षर [नपुं-प.एक]	**प्रथितः**	प्रथित [पुं-प्र.एक]
अपि	अपि [अव्य]	**अस्मि**	अस् [कर्तरि-लट्-उ-एक-परस्मै]

पदार्थः

मूलम्	**हिन्दी**	**English**
यस्मात्	क्योंकि	because
अहम्	मैं	I
क्षरम्	नाशवान्	the perishable
अतीतः	अतीत	transcendental
(अस्मि)	हूँ	am
च	और	and
अक्षरात्	अविनाशी से	from the imperishable
अपि	भी	better than that
उत्तमः	उत्तम	the best
(अस्मि)	हूँ,	am
अतः	इसलिये	therefore
लोके	लोक में	in the world
च	और	and
वेदे	वेद में	in the Vedic literature
पुरुषोत्तमः	पुरुषोत्तम नाम से	as the Supreme Personality
प्रथितः	प्रसिद्ध	renowned
अस्मि	हूँ।	am

भावार्थः

हिन्दी : क्योंकि मैं ही क्षर और अक्षर दोनों से परे स्थित सर्वोत्तम हूँ, इसलिये इसलिए संसार में तथा वेदों में पुरुषोत्तम रूप में विख्यात हूँ।

English - Because I am beyond perish and also Supreme among the imperishable, I am renowned in the world and in the Vedas as the Supreme Being.

सन्धिः -	यस्मात्+क्षरम्	यस्मात्क्षरम्	चर्त्व-सन्धिः[1]
	अतीतः+अहम्	अतीतोऽहम्	रुत्व >उत्व>गुण>पूर्वरुप-सन्धिः[2]
	अक्षरात्+अपि	अक्षरादपि	जश्त्व-सन्धिः[3]
	च+उत्तमः	चोत्तमः	गुण-सन्धिः[4]
	अतः+अस्मि	अतोऽस्मि	रुत्व >उत्व>गुण>पूर्वरुप-सन्धिः[5]

समासः -	अक्षरात्	न क्षरम् अक्षरम् तस्मात्	नञ्-तत्पुरुषः
	पुरुषोत्तमः	पुरुषेषु उत्तमः पुरुषोत्तमः	सप्तमी-तत्पुरुषः

पदार्थकोशः

क्षरम् पुरुषम् [पै०]। जडवर्गम् [सुबो०]। उपाधिम् [चतु०]।
अतीतः संसारमायावृक्षम् अश्वत्थाख्यम् अतिक्रान्तः [शा०]।
अतिक्रम्य स्थितः [पै०/चतु०]। अतिक्रान्तः [सुबो०]। भूतानां जडत्वात् [गीता०]।
च चशब्दात् क्षरादपि [चतु०]।
अक्षरात् संसारवृक्षबीजभूताद् अपि [शा०]। पुरुषात् [पै०]। चेतनवर्गात् [सुबो०]।
उत्तमः उत्कृष्टतमः ऊर्ध्वतमः [शा०]। उत्कृष्टतमः [पै०/चतु०]। नियन्त्रित्वात् [सुबो०]। [
अतः क्षराक्षराभ्याम् उत्तमत्वात् [शा०]। हेतोः [पै०]।
पुरुषोत्तमः पुरुषेभ्यः उत्तमः [टि०]।
प्रथितः प्रख्यातः [शा०/सुबो०]।
अस्मि भवामि [शा०]।

===

1 खरि च (८।४।५५)
2 ससजुषो रुः (८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)>आद्गुणः (६।१।८७)>एङः पदान्तादति (६।१।१०९)
3 झलां जशोऽन्ते (८।२।३९)
4 आद् गुणः (६।१।८७)
5 ससजुषो रुः (८।२।६६)>अतो रोरप्लुतादप्लुते (६।१।११३)>आद्गुणः (६।१।८७)>एङः पदान्तादति (६।१।१०९)

❖ *भगवतः पुरुषोत्तमस्य परमात्मनः पुरुषोत्तमयोगाध्यायस्य च ज्ञानफलम्* ❖

(८९) **यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्**
स सर्वविद्भजति मां सर्वभावेन भारत॥ पुरुषोत्तमयोगः **१५-१९॥**

पदच्छेदः यः माम एवम् अ-सम्मूढः जानाति पुरुष-उत्तमम्।
स सर्व-वित् भजति मां सर्व-भावेन भारत॥

अन्वयः - भारत यः असम्मूढः माम् एवम् पुरुषोत्तमं जानाति सः सर्वविद् सर्वभावेन माम् भजति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
भारत	भारत [पुं-सं-एक]	**जानाति**	ज्ञा [कर्तरि-लट्-प्र-एक-परस्मै]
यः	यद् [पुं-प्र-एक]	**सः**	तद् [पुं-प्र-एक]
असम्मूढः	असम्मूढ [पुं-प्र-एक]	**सर्वविद्**	सर्वविद् [पुं-प्र-एक]
माम्	अस्मद् [द्वि-एक]	**सर्वभावेन**	सर्वभाव [पुं-तृ-एक]
एवम्	एवम् [अव्य]	**माम्**	अस्मद् [द्वि-एक]
पुरुषोत्तमम्	पुरुषोत्तम [पुं-द्वि-एक]	**भजति**	भज् [कर्तरि-लट्-प्र-एक-परस्मै]

पदार्थः

मूलम्	हिन्दी	English
भारत	हे भारत	O son of Bhārata
यः	जो	anyone
असम्मूढः	ज्ञानी पुरुष	without delusion
माम्	मुझको	unto Me
एवम्	इस प्रकार	certainly
पुरुषोत्तमम्	पुरुषोत्तम	the Supreme Personality
जानाति	जानता है	knows
सः	वह	he
सर्वविद्	सर्वज्ञ पुरुष	knower of everything
सर्वभावेन	सब प्रकार से	in all respects
माम्	मुझ को	unto Me
भजति	भजता है	renders devotional service

भावार्थः

हिन्दी : हे भरतवंशी अर्जुन! जो ज्ञानी पुरुष इस प्रकार मुझको संशय-रहित होकर भगवान् रूप से जानता है, वह सर्वज्ञ पुरुष मुझे ही सब प्रकार से मेरी ही भक्ति करता है।

English - He who knows Me thus without delusion as the Supreme Puruṣa, he, the all knowing, worships Me in all respects O Bhārata.

सन्धिः -	यः+माम्	यो माम्	रुत्व>उत्व>गुण-सन्धिः[1]
	असम्मूढः+जानाति	असम्मूढो जानाति	रुत्व>उत्व>गुण-सन्धिः[2]
	सः+सर्ववित्	स सर्ववित्	विसर्गलोप-सन्धिः[3]
	सर्ववित्+भजति	सर्वविद्भजति	जश्त्व-सन्धिः[4]
समासः -	असम्मूढः	न सम्मूढः असम्मूढः	नञ्-तत्पुरुषः
	पुरुषोत्तमम्	पुरुषेषु उत्तमः पुरुषोत्तमः तम्	सप्तमी-तत्पुरुषः
	सर्वविद्	सर्वं वेत्ति सर्वविद्	उपपदम्
	सर्वभावेन	सर्वश्चासौ भावश्च सर्वभावः तेनन	कर्मधारयः

पदार्थकोशः

असम्मूढः	सम्मोहवर्जितः [शा०]। निश्चितबुद्धिः [पै०]। निश्चितमतिः [सुबो०]। संशयविपर्यासादिहीनः [चतु०]।
माम्	ईश्वरं यथोक्तविशेषणम् [शा०]। परमेश्वरम् [पै०]।
एवम्	यथोक्तेन प्रकारेण [शा०]। नामकर्मस्वरूपबलवीर्यतेजोभिः [पै०]। उक्तप्रकारेण [सुबो०]।
जानाति	वेत्ति [पै०]।
सर्वविद्	सर्वात्मना सर्वं वेत्ति इति सर्वज्ञः सर्वभूतस्थम् [शा०]। सर्वज्ञः [सुबो०]।
सर्वभावेन	सर्वात्मचित्ततया [शा०]। सर्वप्रकारेण [सुबो०]। सर्वात्मना सर्वैः प्रकारैः [चतु०]। सर्वेण भावेन [गीता०]।
भजति	भजते [गीता०]।

---

1 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
2 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)
3 एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६।१।१३२)
4 झलां जश् झशि (८।४।५३)

❖ भगवतः पुरुषोत्तमस्य परमात्मनः पुरुषोत्तमयोगाध्यायस्य च ज्ञानफलम् ❖

(९०) **इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ**
एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥ पुरुषोत्तमयोगः **१५-२०॥**

पदच्छेदः इति गुह्य-तमं शास्त्रम् इदम् उक्तं मया-अनघ।
एतत् बुद्ध्वा बुद्धिमान् स्यात् कृत-कृत्यः च भारत॥

अन्वयः - अनघ भारत इति इदं गुह्यतमं शास्त्रम् मया उक्तम् एतद् बुद्ध्वा बुद्धिमान् (स्यात्) च कृतकृत्यः स्यात्।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
अनघ	अनघ [पुं-सं-एक]	**उक्तम्**	वच् [कृत्-प्रत्ययः-क्त-नपुं-प्र-एक]
भारत	भारत [पुं-सं-एक]	**एतद्**	एतद् [नपुं-द्वि-एक]
इति	इति [अव्य]	**बुद्ध्वा**	बुध् [कृत्-प्रत्ययः-क्त्वा]
इदम्	इदम् [नपुं-प्र-एक]	**बुद्धिमान्**	बुद्धिमत् [पुं-प्र-एक]
गुह्यतमम्	गुह्यतम [नपुं-प्र-एक]	**च**	च [अव्य]
शास्त्रम्	शास्त्र [नपुं-प्र-एक]	**कृतकृत्यः**	कृतकृत्य [पुं-प्र-एक]
मया	अस्मद् [तृ-एक]	**स्यात्**	अस् [कर्तरि-विधिलिङ्-प्र-एक-परस्मै]

पदार्थः

मूलम्	हिन्दी	English
अनघ	हे निष्पाप	O sinless one
भारत	अर्जुन	O son of Bharata
इति	इस प्रकार	thus
इदम्	यह	this
गुह्यतमम्	गोपनीय	the most confidential
शास्त्रम्	शास्त्र	revealed scripture
मया	मेरे द्वारा	by Me
उक्तम्	कहा गया	disclosed
एतद्	इसको	this
बुद्ध्वा	तत्त्व से जानकर	understanding

बुद्धिमान्	ज्ञानवान्	intelligent
च	और	and
कृतकृत्यः	कृतार्थ	the most perfect
स्यात्	हो जाता है	becomes

भावार्थः

हिन्दी : हे निष्पाप अर्जुन! इस प्रकार यह अति गोपनीय रहस्य मेरे द्वारा कहा गया है, हे भरतवंशी जो मनुष्य इस तत्त्व-ज्ञान को समझता है वह बुद्धिमान् हो जाता है और कृतार्थ हो जाता है।

English - Thus I have spoken the most confidential scripture, O Sinless One, by knowing which, O Bharata, one succeeds in becoming wise and intelligent.

सन्धिः -	मया+अनघ	मयानघ	सवर्णदीर्घ-सन्धिः[1]
	एतत्+बुद्ध्वा	एतद्बुद्ध्वा	जश्त्व-सन्धिः[2]
	स्यात्+कृतकृत्यः	स्यात्कृतकृत्यः	चर्त्व-सन्धिः[3]
	कृतकृत्यः+च	कृतकृत्यश्च	सत्व>श्चुत्व-सन्धिः[4]

समासः -	अनघ	न अघम् यस्य अनघः सम्बोधने	नञर्थबहुव्रीहिः
	कृतकृत्यः	कृतं कृत्यं येन सः	तृतीयार्थ-बहुव्रीहिः

पदार्थकोशः

अनघ अपाप [शा०]। व्यसनशून्य [सुबो०]। निर्व्यसन् [चतु०]।

इति अनेन सङ्क्षेपप्रकारेण [सुबो०]।
शास्त्रस्य समाप्तिः सूचिताः, वक्तव्यस्य परिपूर्णतया समाप्तत्वात् [गीता०]।

---

1 अकः सवर्णे दीर्घः (६।१।१०१)
2 झलां जश् झशि (८।४।५३)
3 खरि च (८।४।५५)
4 विसर्जनीयस्य सः (८।३।३४)>स्तोः श्चुना श्चुः (८।४।४०)

इदम्	गीताशास्त्रम्, अस्मिन्नध्याये; इदमित्यस्य अस्मिन्नित्यर्थः [टि०]।
गुह्यतमम्	गोप्यतमम्, अत्यन्तरहस्यम् [शा०]। अतिरहस्यम् [सुबो०]। अत्यन्तरहस्यम् [चतु०]।
शास्त्रम्	शासनात् त्राणनात् च [पै०]। सम्पूर्णं सर्वशास्त्रम् [सुबो०]।
उक्तम्	कथितम् [शा०]। अभिहितम् [पै०]।
एतद्	शास्त्रं यथादर्शितार्थम् [शा०]। शास्त्रम् [पै०/सुबो०]। रहस्यम् [चतु०]।
बुद्ध्वा	ज्ञात्वा [टि०]।
बुद्धिमान्	ब्रह्मवित् [पै०]। सम्यक् ज्ञानी [सुबो०]। ज्ञानी, आत्मवित् [चतु०]।
च	अद्भुतद्योतकः [गीता०]।
कृतकृत्यः	कृतं कृत्यं कर्तव्यं येन सः कृतकृत्यः विशिष्टजन्मप्रसूतेन ब्राह्मणेन यत् कर्तव्यं तत् सर्वं भगवत्तत्त्वे विदिते कृतं भवेत् इत्यर्थः। न च अन्यथा कर्तव्यं परिसमाप्यते कस्यचित् इति अभिप्रायः [शा०]। कृतं कृत्यं येन सः [पै०]।
स्यात्	भवेत् [शा०]।

==

❖ *मुक्त्यधिकारिणां दैवीसम्पद्वतां लक्षणानि* ❖

श्रीभगवानुवाच

(९१) **अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः**
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥ दैवासुरसम्पद्विभागयोगः **१६-०१॥**

(९२) **अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्**
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥ दैवासुरसम्पद्विभागयोगः **१६-०२॥**

(९३) **तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता**
भवन्ति सम्पदं दैवीमभिजातस्य भारत॥ दैवासुरसम्पद्विभागयोगः **१६-०३॥**

पदच्छेदः अभयं सत्व-सं-शुद्धिः ज्ञानयोग-व्यवस्थितिः।
दानं दमः च यज्ञः च स्व-अध्यायः तप आर्जवम्॥
अ-हिंसा सत्यम् अ-क्रोधः त्यागः शान्तिः अ-पैशुनम्।
दया-भूतेषु अ-लोलुप्त्वम् आर्दवं ह्रीः अ-चापलम्॥
तेजः क्षमा धृतिः शौचम् अ-द्रोहः न अति-मानिता।
भवन्ति सम्पदं दैवीम् अभिजातस्य भारत॥

अन्वयः - अभयं सत्त्वसंशुद्धिः ज्ञानयोगव्यवस्थितिः च दानं दमः यज्ञः स्वाध्यायः तपः च आर्जवम् अहिंसा सत्यम् अक्रोधः त्यागः शान्तिः अपैशुनम् भूतेषु दया अलोलुप्त्वम् मार्दवम् ह्रीः अचापलं तेजः क्षमा धृतिः शौचम् अद्रोहः नातिमानिता भारत दैवीं सम्पदम् अभिजातस्य भवन्ति।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
अभयम्	अभय [नपुं-प्र-एक]	**भूतेषु**	भूत [पुं-स-बहु]
सत्त्वसंशुद्धिः	सत्त्व-संशुद्धि [स्त्री-प्र-एक]	**दया**	दया [स्त्री-प्र-एक]
ज्ञानयोगव्यवस्थितिः	ज्ञानयोगव्यवस्थिति [स्त्री-प्र-एक]	**अलोलुप्त्वम्**	अलोलुप्त्व [नपुं-प्र-एक]
च	च [अव्य]	**मार्दवम्**	मार्दव [नपुं-प्र-एक]
दानम्	दान [नपुं-प्र-एक]	**ह्रीः**	ह्री [स्त्री-प्र-एक]
दमः	दम [पुं-प्र-एक]	**अचापलम्**	अचापल [नपुं-प्र-एक]
यज्ञः	यज्ञ [पुं-प्र-एक]	**तेजः**	तेजस् [नपुं-प्र-एक]
स्वाध्यायः	स्वाध्याय [पुं-प्र-एक]	**क्षमा**	क्षमा [स्त्री-प्र-एक]
तपः	तपस् [नपुं-प्र-एक]	**धृतिः**	धृति [स्त्री-प्र-एक]
च	च [अव्य]	**शौचम्**	शौच [नपुं-प्र-एक]
आर्जवम्	आर्जव [नपुं-प्र-एक]	**अद्रोहः**	अद्रोह [पुं-प्र-एक]
अहिंसा	अहिंसा [स्त्री-प्र-एक]	**अतिमानिता**	अतिमानिता [स्त्री-प्र-एक]
सत्यम्	सत्य [नपुं-प्र-एक]	**भारत**	भारत [पुं-सं-एक]
अक्रोधः	अक्रोध [पुं-प्र-एक]	**दैवीम्**	दैवी [स्त्री-द्वि-एक]
त्यागः	त्याग [पुं-प्र-एक]	**सम्पदम्**	सम्पद् [स्त्री-द्वि-एक]
शान्तिः	शान्ति [स्त्री-प्र-एक]	**अभिजातस्य**	अभि जन् [कृत्-प्रत्ययः-क्त--पुं-ष-एक]
अपैशुनम्	अपैशुन [नपुं-प्र-एक]	**भवन्ति**	भू [कर्तरि-लट्-प्र-बहु-परस्मै]

पदार्थः

मूलम्	हिन्दी	English
अभयम्	भय का अभाव	fearlessness
सत्त्वसंशुद्धिः	अन्तःकरण की निर्मलता	purity of one's consciousness

ज्ञानयोगव्यवस्थितिः	ज्ञानयोग में दृढ़ स्थिति	permanence in knowledge and yoga
च	और	and
दानम्	दान	charity
दमः	दम	controlling the mind
यज्ञः	यज्ञ	performance of sacrifice
स्वाध्यायः	स्वाध्याय	study of Vedic scriptures
तपः	तप	austerity
च	और	and
आर्जवम्	अन्तःकरण की सरलता	simplicity
अहिंसा	अहिंसा	non-violence
सत्यम्	सत्य	truthfulness
अक्रोधः	क्रोध का न होना	freedom from anger
त्यागः	अभिमान का त्याग	renunciation
शान्तिः	शान्ति	tranquillity
अपैशुनम्	निन्दादि न करना	aversion to fault-finding
भूतेषु	सब भूतप्राणियों में	towards all living entities
दया	दया	compassionate
अलोलुप्त्वम्	आसक्ति का न होना	freedom from greed
मार्दवम्	कोमलता	gentleness
ह्रीः	लज्जा	modesty
अचापलम्	व्यर्थ चेष्टाओं का अभाव	determination
तेजः	तेज	vigorous
क्षमा	क्षमा	forgiving
धृतिः	धैर्य	fortitude
शौचम्	शुद्धि	cleanliness
अद्रोहः	शत्रुभाव का अभाव	freedom from enmity
अतिमानिता	अभिमान का अभाव	without pride

भारत	हे अर्जुन	O son of Bharata
दैवीम्	दैवी	daivī
सम्पदम्	सम्पदा को	qualities
अभिजातस्य	उत्पन्न हुए पुरुष के	of one who is born of
भवन्ति	हैं	become

भावार्थः

हिन्दी - भय का सर्वथा अभाव, अन्तःकरण की पूर्ण निर्मलता, तत्त्वज्ञान के लिये ध्यानयोग में निरन्तर दृढ़ स्थिति और सात्त्विकदान, इन्द्रियों का दमन, यज्ञ स्वाध्याय स्वधर्मपालन के लिये तप करना और शरीर तथा इन्द्रियों के सहित अन्तःकरण की सरलता, अहिंसा, यथार्थ और प्रिय भाषण, क्रोध का न होना, अभिमान का त्याग, अन्तःकरण की उपरति, किसी की भी निन्दादि न करना, सब भूतप्राणियों में हेतुरहित दया, इन्द्रियों का विषयों के साथ संयोग होने पर भी उनमें आसक्ति का न होना, कोमलता, लोक और शास्त्र से विरुद्ध आचरण में लज्जा, व्यर्थ चेष्टाओं का अभाव, तेज, क्षमा, धैर्य, बाह्य शुद्धि, शत्रुभाव का न होना, अपने में अभिमान का अभाव होना ये सभी लक्षण दैवी सम्पदा को लेकर उत्पन्न हुए पुरुष के होते हैं।

English - Fearlessness, purity of one's consciousness, permanence in knowledge and yoga, charity, self-control, performance of sacrifice, study of scriptures, austerity and simplicity, non-violence, truthfulness, without anger, renunciation, tranquility, being non-critical, compassionate to all beings, without greed, gentle, modest, firm-minded, vigorous, forgiving nature, fortitude, cleanliness, without envy, without egoistic pride - these O Bharata are the daivī qualities (virtues) of those born with divine nature.

सन्धिः - सत्त्वसंशुद्धिः+ज्ञानयोगव्यवस्थितिः सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः रेफ-सन्धि[1]

दमः+च दमश्च सत्व>श्चुत्व-सन्धिः[2]

---

1 ससजुषो रुः (८।२।६६)

2 विसर्जनीयस्य सः (८।३।३४)>स्तोः श्चुना श्चुः (८।४।४०)

यज्ञः+च	यज्ञश्च	सत्व>श्चुत्व-सन्धिः[1]
स्वाध्यायः+तपः	स्वाध्यायस्तपः	सत्व-सन्धिः[2]
तपः+आर्जवम्	तप आर्जवम्	रुत्व >यत्व>लोप-सन्धिः[3]
अक्रोधः+त्यागः	अक्रोधस्त्यागः	सत्व-सन्धिः[4]
शान्तिः+अपैशुनम्	शान्तिरपैशुनम्	रेफ-सन्धिः[5]
भूतेषु+अलोलुप्त्वम्	भूतेष्वलोलुप्त्वम्	यण्-सन्धिः[6]
ह्रीः+अचापलम्	ह्रीरचापलम्	रेफ-सन्धिः[7]
अद्रोहः+नातिमानिता	अद्रोहो नातिमानिता	रुत्व>उत्व>गुण-सन्धिः[8]

समासः -	अभयम्	न भयम्	नञ्-तत्पुरुषः
	सत्त्वसंशुद्धिः	सत्त्वस्य संशुद्धिः	षष्ठी-तत्पुरुषः
	ज्ञानयोगव्यवस्थितिः	ज्ञानं च योगश्च इति ज्ञानयोगौ,	इतरेतरयोगद्वन्द्वः
		ज्ञानयोगयोः व्यवस्थितिः	सप्तमी तत्पुरुषः
	स्वाध्यायः	स्वस्य अध्यायः	षष्ठी-तत्पुरुषः
	अहिंसा	न हिंसा	नञ्-तत्पुरुषः
	अक्रोधः	न क्रोधः	नञ्-तत्पुरुषः
	अपैशुनम्	न पैशुनम्	नञ्-तत्पुरुषः
	अलोलुप्त्वम्	न लोलुप्त्वम्	नञ्-तत्पुरुषः
	अचापलम्	न चापलम्	नञ्-तत्पुरुषः
	अद्रोहः	न द्रोहः	नञ्-तत्पुरुषः

---

1 विसर्जनीयस्य सः (८।३।३४)>स्तोः श्चुना श्चुः (८।४।४०)

2 विसर्जनीयस्य सः (८।३।३४)

3 ससजुषो रुः (८।२।६६)>भोभगो अघो अपूर्वस्य योऽशि (८।३।१७)>लोपः शाकल्यस्य (८।३।१९)

4 विसर्जनीयस्य सः (८।३।३४)

5 ससजुषो रुः (८।२।६६)

6 इको यणचि (६।१।७७)

7 ससजुषो रुः (८।२।६६)

8 ससजुषो रुः (८।२।६६)>हशि च (६।१।११४)>आद् गुणः (६।१।८७)

पदार्थकोशः

अभयम् अभीरुता [शा०/पै०]। भयाभावः [सुबो०]। स्वोच्छेदबुद्ध्यभावः [चतु०]।

सत्त्वसंशुद्धिः सत्त्वस्य अन्तःकरणस्य संव्यवहारेषु परवञ्चनमायानृतादिपरिवर्जनं शुद्धभावेन व्यवहारः [शा०]। अवञ्चनम् [पै०]। सत्त्वस्य चित्तस्य संशुद्धिः सुप्रसन्नता [सुबो०]। चित्तनैर्मल्यम् [चतु०]।

ज्ञानयोगव्यवस्थितिः ज्ञानं शास्त्रतः आचार्यतः च आत्मादिपदार्थानाम् अवगमः, अवगतानाम् इन्द्रियाद्युपसंहारेण एकाग्रतया स्वात्मसंवेद्यतापादनं योगः, तयोः ज्ञानयोगयोः व्यवस्थितिः [शा०]। ज्ञानं शास्त्राचार्योपदेशेनाऽऽत्मादिपदार्थावगमः। अवगतानां योगानुष्ठानेन साक्षात्करणं योगः। ज्ञानं च योगश्च ज्ञानयोगौ तयोः व्यवस्थितिः [पै०]। ज्ञानयोगे आत्मज्ञानोपाये व्यवस्थितिः परिनिष्ठा [सुबो०]। ज्ञानं श्रवणादिजन्यं; योगो ज्ञातेऽर्थे चित्तप्रणिधानं तयोः व्यवस्थितिः [चतु०]।

दानम् यथाशक्तिसंविभागः अन्नादीनाम् [शा०/चतु०]। अर्थिभ्यः स्वद्रव्यसमर्पणम् [पै०]। स्वभोज्यस्य अन्नादेः यथोचितं संविभागः [सुबो०]।

दमः बाह्यकरणानाम् उपशमः अन्तःकरणस्य उपशमं शान्तिं वक्ष्यति [शा०]। अन्तःकरणोपरतिः [पै०]। बाह्येन्द्रियसंयमः [सुबो०]। बाह्येन्द्रियनियमः [चतु०]। इन्द्रियजयः [गीता०]।

यज्ञः श्रौतः अग्निहोत्रादिः। स्मार्तः च देवयज्ञादिः [शा०]। स्मार्ताः पञ्च महायज्ञाः श्रौता अग्निष्टोमादयः [पै०]। यथाधिकारं दर्शपूर्णमासादिः [सुबो०]। श्रौतस्मार्तादिः [चतु०]।

स्वाध्यायः ऋग्वेदाद्यध्ययनम् अदृष्टार्थम् [शा०]। वेदाभ्यासः [पै०]। ब्रह्मयज्ञादिः जपयज्ञः [सुबो०]। वेदाध्ययनम् [चतु०]।

तपः वक्ष्यमाणं शारीरादि [शा०]। त्रिविधं कायिकं वाचिकं मानसं च [पै०]। वक्ष्यमाणलक्षणं शारीरादित्रिविधम् [चतु०]।

आर्जवम् ऋजुत्वं सर्वदा [शा०/चतु०]। अवक्रता [पै०/सुबो०]।

अहिंसा अहिंसनं प्राणिनां पीडावर्जनम् [शा०]। प्राणिनामपीडा [पै०]। परपीडावर्जनम् [सुबो०]। प्राणिपीडावर्जनम् [चतु०]।

सत्यम् अप्रियानृतवर्जितं यथाभूतार्थवचनम् [शा०]। यथार्थभाषणम् [सुबो०]। अप्रियानृतवर्जनं यथाभूतार्थभाषणम् [चतु०]।

अक्रोधः परैः आक्रुष्टस्य अभिहतस्य वा प्राप्तस्य क्रोधस्य उपशमनम् [शा०]।

	प्रसक्तस्य क्रोधस्य त्याग: [पै०]। ताडितस्यापि चित्ते क्षोभानुत्पत्ति: [सुबो०]। परैराक्रुष्टस्याभिहतस्य वा प्राप्तस्य क्रोधस्योपशमनम् [चतु०]।
त्याग:	सन्न्यास:, पूर्वं दानस्य उक्तत्वात् [शा०]। औदार्यम् [सुबो०]। सर्वकर्मसन्न्यास: पूर्वं दानस्योक्तत्वात् [चतु०]।
शान्ति:	अन्त:करणस्य उपशम: [शा०]। बाह्येन्द्रियोपरति: [पै०]। चित्तोपरति: [सुबो०]। अन्त:करणस्योपरम: [चतु०]।
अपैशुनम्	अपिशुनता परस्मै पररन्ध्रप्रकटीकरणं पैशुनम्, तदभाव: अपैशुनम् [शा०]। पररन्ध्रप्रच्छादनम् [पै०]। पैशुनं परोक्षे परदोषप्रकाशनम् तद्वर्जनम् [सुबो०]। परदोषप्रकाशनं पैशुनं तद्वर्जनम् [चतु०]।
भूतेषु	दु:खितेषु [शा०/चतु०]। दीनेषु [सुबो०]।
दया	कृपा [शा०/चतु०]। रक्षितव्यबुद्धि: [पै०]। कृपा परदु:खासहिष्णुत्वम् [टि०]।
अलोलुप्त्वम्	इन्द्रियाणां विषयसन्निधौ अविक्रिया [शा०/पै०/चतु०]। लोपाभाव:, अवर्णलोप आर्ष: [सुबो०]।
मार्दवम्	मृदुता अक्रौर्यम् [शा०]। अक्रौर्यम् [पै०]। मृदुत्वम् अक्रूरता [सुबो०]। मृदुता [चतु०]। चित्तस्य काठिन्यराहित्यं शीतलता [गीता०]।
ह्री:	लज्जा [शा०/चतु०]। अकार्यप्रवृत्तौ लोकलज्जा [सुबो०]।
अचापलम्	असति प्रयोजने वाक्पाणिपादादीनाम् अव्यापारयितृत्वम् [शा०]। व्यर्थचेष्टावर्जनम् [पै०]। व्यर्थक्रियाराहित्यम् [सुबो०]। असति प्रयोजने वाक्पाणिपादादीनाम् अव्यापारयितृत्वम् [चतु०]। चापलं पूर्वापरमविमृश्य यत्करणं तदभाव: [गीता०]।
तेज:	प्रागल्भ्यं न त्वग्गता दीप्ति: [शा०]। प्रताप: [पै०]। प्रागल्भ्यम् [सुबो०/चतु०]। आत्मनि उत्साहग्रहणेन मितत्वापाकरणम् [गीता०]।
क्षमा	आक्रुष्टस्य ताडितस्य वा अन्तर्विक्रियानुत्पत्ति: [शा०]। क्रोधकारणेषु सत्सु चित्तस्य अविक्रिया [पै०]। परिभवादिषु उत्पद्यमानेषु क्रोधप्रतिबन्ध: [सुबो०]। आक्रुष्टस्य ताडितस्य वान्तर्विक्रियानुत्पत्ति: [चतु०]।
धृति:	देहेन्द्रियेषु अवसादं प्राप्तेषु तस्य प्रतिषेधक: अन्त:करणवृत्तिविशेष:, येन उत्तम्भितानि करणानि देह: च न अवसीदन्ति [शा०]। क्षुत्पिपासादिसहनम् [पै०]। दु:खादिभि: अवसीदत: चित्तस्य स्थिरीकरणम् [सुबो०]। देहेन्द्रियेष्ववसादं प्राप्तेषु तस्य प्रतिषेधकोऽन्त:करणवृत्तिविशेषो येनोत्तम्भितानि देहादीनि न

	अवसीदन्ति [चतु०]।
शौचम्	मृज्जलकृतं बाह्यम् आभ्यन्तरं च मनोबुद्ध्योः नैर्मल्यं मायारागादिकालुष्याभावः एवं द्विविधं शौचम् [शा०]। मलशोधनम् [पै०]। बाह्याभ्यन्तरशुद्धिः [सुबो०]। द्विविधं मृज्जलाभ्यां बाह्यम्, आन्तरं मनोबुद्ध्योर्नैर्मल्यं मायारागादि-कालुष्याभावः[चतु०]।
अद्रोहः	परजिघांसाभावः अहिंसनम् [शा०]। परजिघांसाभावः [पै०]। जिघांसाराहित्यम् [सुबो०]। परजिघांसाया अभावः [चतु०]।
नातिमानिता	अत्यर्थं मानः अतिमानः, सः यस्य विद्यते सः अतिमानी, तद्भावः अतिमानिता, तदभावः नातिमानिता आत्मनः पूज्यतातिशयभावनाभावः [शा०]। आत्मनः पूज्यताप्रतिपत्तिः [पै०]। आत्मन्यतिपूज्यत्वाभिमानः तदभावः [सुबो०]। अत्यन्तं मानराहित्यम् [चतु०]।
भारत	अर्जुन [टि०]।
दैवीम्	देवानाम् [शा०]। देवानाम् इयम् [पै०]। सत्त्वप्रधानाम् [चतु०]।
सम्पदम्	स्वभावम् उत्कर्षशब्दितां समृद्धिम्, भगवदाज्ञानुवृत्तिरूपा ताम्[टि०]।
अभिजातस्य	अभिलक्ष्य जातस्य देवविभूत्यर्हस्य भाविकल्याणस्य [शा०]। अभिलक्ष्य जातस्य, सम्पदं लब्ध्वा जातस्य [पै०]। अभिलक्ष्य जातस्य स्वभावतः [चतु०]।
भवन्ति	जायन्ते [पै०]।

==

❖ *शास्त्रोक्तधर्मानादरपूर्वकं स्वच्छन्दानुगुणतः कर्मकारिणः फलम्* ❖

(९४) **यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः**
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥ दैवासुरसम्पद्विभागयोगः **१६-२३**॥

पदच्छेदः यः शास्त्र-विधिम् उत्-सृज्य वर्तते काम-कारतः।
न स सिद्धिम् अवाप्नोति न सुखं न परां गतिम्॥

अन्वयः - यः शास्त्रविधिम् उत्सृज्य कामकारतः वर्तते सः न सिद्धिम् अवाप्नोति न परां गतिम् (अवाप्नोति) (च) न सुखम् (अवाप्नोति)।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
यः	यद् [पुं-प्र-एक]	सिद्धिम्	सिद्धि [स्त्री-द्वि-एक]
शास्त्रविधिम्	शास्त्रविधि [पुं-द्वि-एक]	अवाप्नोति	अव-आप् [कर्तरि-लट्-प्र-एक-परस्मै]
उत्सृज्य	उत्-सृज् [कृत्-प्रत्ययः-ल्यप्]	न	न [अव्य]
कामकारतः	कामकार [तसिल्]	पराम्	परा [स्त्री-द्वि-एक]
वर्तते	वृत् [कर्तरि-लट्-प्र-एक-आत्मने]	गतिम्	गति [स्त्री-द्वि-एक]
सः	तद् [पुं-प्र-एक]	न	न [अव्य]
न	न [अव्य]	सुखम्	सुख [नपुं-द्वि-एक]

पदार्थः

मूलम्	हिन्दी	English
यः	जो	anyone
शास्त्रविधिम्	शास्त्रविधि को	the scriptural regulations
उत्सृज्य	त्यागकर	giving up
कामकारतः	अपनी इच्छा से	desire driven actions
वर्तते	आचरण करता है	remains
सः	वह	he
न	न	never
सिद्धिम्	सिद्धि को	spiritual perfection
अवाप्नोति	प्राप्त होता है	achieves
न	न	never
पराम्	परम	the Supreme
गतिम्	गति को	goal
(अवाप्नोति)	(प्राप्त होता है)	achieves
(च)	(और)	also
न	न	never
सुखम्	सुख को	happiness
(अवाप्नोति)	(प्राप्त होता है)	achieves

भावार्थः

हिन्दी - जो पुरुष शास्त्र विधि को त्यागकर अपनी इच्छा से आचरण करता है, वह न सिद्धि को प्राप्त होता है, न परमगति को और न सुख को ही।

English - He who discards the scriptural regulations and indulges in desire driven actions, neither attains spiritual success, nor happiness nor the Supreme Goal.

सन्धिः - सः+सिद्धिम् स सिद्धिम् विसर्गलोप-सन्धिः[1]

समासः - शास्त्रविधिम्	शास्त्रसम्मतो विधिः इति शास्त्रविधिः तम्	कर्मधारयः
कामकारतः	कामेन कारः कामकारः तेन अर्थे तसिल्	तृतीया-तत्पुरुषः

पदार्थकोशः

शास्त्रविधिम्	कर्तव्याकर्तव्यज्ञानकारणं विधिप्रतिषेधाख्यम् [शा०]। वेदविहितं धर्मम् [सुबो०]। शास्त्रेण इष्टसाधनतयाऽनिष्टसाधनतया च ज्ञापितम् [चतु०]।
उत्सृज्य	त्यक्त्वा [शा०]। त्यजतः [गीता०]।
कामकारतः	कामप्रयुक्तः [शा०]। यथेच्छम् [सुबो०]।
वर्तते	प्रवर्तते [टि०]।
सिद्धिम्	पुरुषार्थयोग्यताम् [शा०]। पुरुषार्थप्राप्तियोग्यताम् [पै०]। तत्त्वज्ञानम् [सुबो०]। चित्तशुद्धिम् [चतु०]।
अवाप्नोति	प्राप्नोति [सुबो०]। आप्नोति [टि०]।
पराम्	प्रकृष्टाम् [शा०]।
गतिम्	स्वर्गं मोक्षं वा [शा०]। मोक्षम् [पै०]। मुक्तिम् [सुबो०]।
सुखम्	स्वर्गम् [पै०]। उपशमम् [सुबो०]। वैराग्यादिजनितां तृप्तिम् [चतु०]। ऐहिकम्, स्वर्गसुखम्, कर्मफलम् ऐहिकमामुष्मिकं च [टि०]।

===

1 एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६।१।१३२)

❖ अर्जुनस्य शास्त्रीये कर्मणि भगवत्प्रवर्तनम् ❖

(९५) **तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ**
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि॥ दैवासुरसम्पद्विभागयोगः **१६-२४॥**

पदच्छेदः तस्मात् शास्त्रम् प्रमाणं ते कार्याकार्य-व्यवस्थितौ।
ज्ञात्वा शास्त्रविधान-उक्तम् कर्म कर्तुम् इह अर्हसि॥

अन्वयः - तस्मात् ते इह कार्याकार्यव्यवस्थितौ शास्त्रम् प्रमाणम् (अस्ति) (तत्) ज्ञात्वा (त्वम्) शास्त्रविधानोक्तं कर्म कर्तुम् अर्हसि।

पदपरिचयः

मूलम्	पदपरिचयः	मूलम्	पदपरिचयः
तस्मात्	तस्मात् [अव्य]	(तत्)	(तद् [नपुं-द्वि-एक])
ते	युष्मद् [च-एक]	ज्ञात्वा	ज्ञा [कृत्-प्रत्ययः-क्त्वा-ज्ञा-क्र्यादिः]
इह	इह [अव्य]	(त्वम्)	(युष्मद् [प्र-एक])
कार्याकार्य-व्यवस्थितौ	कार्याकार्यव्यवस्थिति [स्त्री-स-एक]	शास्त्र-विधानोक्तम्	शास्त्रविधान-वच् [कृत्-प्रत्ययः-क्त-नपुं-द्वि-एक]
शास्त्रम्	शास्त्र [नपुं-प्र-एक]	कर्म	कर्मन् [नपुं-द्वि-एक]
प्रमाणम्	प्रमाण [नपुं-प्र-एक]	कर्तुम्	कृ [कृत्-प्रत्ययः-तुमुन्-डुकृञ्-तनादिः]
(अस्ति)	(अस् [कर्तरि-लट्-प्र-एक-परस्मै])	अर्हसि	अर्ह् [कर्तरि-लट्-म-एक-परस्मै-अर्हँ-भ्वादिः]

पदार्थः

मूलम्	हिन्दी	English
तस्मात्	इससे	therefore
ते	तुम्हारे लिये	your
इह	इस	this
कार्याकार्यव्यवस्थितौ	कर्तव्य और अकर्तव्य की स्थिति में	in determining appropriate and inappropriate actions
शास्त्रम्	शास्त्र	scriptures

प्रमाणम्	प्रमाण	evidence
(अस्ति)	(है)	is
(तत्)	(वह)	that
ज्ञात्वा	जानकर	knowing
(त्वम्)	(तुम)	you
शास्त्रविधानोक्तम्	शास्त्र विधि से कहे हुए	as declared by scriptural injunctions
कर्म	कर्म को	actions
कर्तुम्	करने	to do
अर्हसि	योग्य हो	should do

भावार्थः

हिन्दी - इससे तेरे लिए इस कर्तव्य और अकर्तव्य की व्यवस्था में शास्त्र ही प्रमाण है। ऐसा जानकर तुम शास्त्र विधि से नियत कर्म ही करने योग्य हो।

English - Therefore let the scriptures be your guide in deciding appropriate and inappropriate actions. Knowing the scriptural injunctions properly you should perform your actions.

सन्धिः -	तस्मात्+शास्त्रम्	तस्माच्छास्त्रम्	जश्त्व>श्चुत्व>चर्त्व>छत्व[1]
	इह+अर्हसि	इहार्हसि	सवर्णदीर्घ-सन्धिः[2]

समासः - कार्याकार्यव्यवस्थितौ	न कार्यम् अकार्यम्,	नञ्-तत्पुरुषः
	कार्यं च अकार्यं च कार्याकार्ये,	इतरेतर-योगद्वन्द्वः
	कार्याकार्ययोः व्यवस्थितिः	षष्ठी-तत्पुरुषः
	कार्याकार्यव्यवस्थितिः तस्याम्	
